दधिव्योषंतद्धाप्यितास्रदाहजित् १ सगुडंवातनुद्वृष्यंवृंहणंतर्पणंगुरु नराश्चौदधिसेवेतनवाप्यघनशर्करं २ नामुद्गसूपंनाक्षौद्रंनोष्णं
नामलकैर्विना शस्यतेदधिनोरात्रौशस्तंचांबुघृतान्वितं रक्तपित्तकफोत्थेषुविकारेषुहितंननत् मूत्रकृच्छ्रेप्रतिश्यायेशीतगेविषमज्वरे
अतिसारेरुचौकार्श्येदिवाचदधिशस्यते हेमंतेशिशिरेचैववर्षासुदधिशस्यते ५ शरद्ग्रीष्मवसंतेषुप्रायशस्तद्विगर्हितं दध्नस्तु
स्त्रियतोयंतन्मस्तुपरिकीर्तितं मस्तुक्लमहरंबल्यंलघुभक्ताभिलाषकृत् श्रोतोविशोधनाल्हादिकफतृष्णानिलापहं ७ अवृष्यंप्री
णनंशीघ्रंभिनत्तिमलसंचयं इतिमस्तुगुणाः अथसरगुणाः दध्नस्तूपरिभागोयोघनःस्नेहसमन्वितः लोकेसरइतिख्यातोदध्नो
मंडस्तुभण्यते सरःस्वादुर्गुरुर्वृष्योवातवह्निप्रणाशनः बस्तेर्विधमनश्चाम्लःपित्तश्लेष्मविवर्धनः अथतक्रगुणाः घोलंमथित
मुदश्वित्तक्रंचतुर्विधंज्ञेयं ससरंनिर्जलंघोलंमथितंरसवर्जितं १तक्रंपादजलंप्रोक्तमुदश्विच्चार्धवारिकं दिवोदासप्रभृतयस्तक्र
मर्धजलंजगुः पादतोयंविनिगदंत्युदश्विदपित्तैस्तथा तक्रगुणाः वातपित्तहरंघोलंमथितंकफपित्तनुत् तक्रंत्रिदोषशमनंउद
श्वित्कफदंस्मृतं १गव्यंतुदीपनंतक्रंमेदमध्यस्त्रिदोषनुत् हितंगुल्मातिसारेषुप्लीहार्शोग्रहणीगदे माहिषंश्लेष्मलंतक्रंसांद्रंशो
फकरंगुरु २ रूक्षंस्निग्धंछागलंतक्रंलघुदोषत्रयापहं गुल्मार्शोग्रहणीशोफपांड्वामयविनाशनं ३वातेम्लंसैंधवोपेतंस्वादुपि
त्तेसशर्करं पिबेत्तक्रंकफेरूक्षंव्योषक्षारसमन्वितं ४ मूत्रकृच्छ्रेतुसगुडंपांडुरोगेसचित्रकं हिंगुजीरयुतंघोलंसैंधवेनावधूलितं
तद्भवेदतिवातघ्नमर्शोतिसारनाशनं रुरुच्योपुष्टिदंबल्यंबस्तिशूलविनाशनं ६ शीतकालेग्निमांद्येचकफवातामयेषुच अरु
चौस्रोतसांरोधेतस्योक्तंदमृतोपमं ७ नैवतक्रंक्षतेदद्यान्नोष्णकालेनदुर्बले नमूर्छाभ्रमदाहेषुनरोगेरक्तपित्तजे ८ तक्रंतल्लव
णोपेतंदीपनंग्रहणीगदे तक्रंलवणहीनंयत्तद्ग्रहण्यर्शोविकारकृत् ९ क्षुद्वर्धनंनेत्ररुजापहंचप्राणप्रदंशोणितमांसदंच
आमाभिघातंकफवातहंतृप्रोक्तागुणावैकथिताहितक्रे १० अथकथिततक्रगुणाः तक्रमामंकफंकोष्ठेहंतिकंठेकरोतिच पीन
सश्वासकासादौपक्वमेवविशिष्यते ११ नतक्रसेवीव्यथतेकदाचिन्नतक्रदग्धाःप्रभवंतिरोगाः यथासुराणाममृतंप्रधानंतथा
नराणांभुवितक्रमाहुः तक्राल्लघुनरोमंथःकुर्चिकादधितक्रवत् गोजाविमहिषीतक्रंतद्वदधिगुणाःपृथक् कैलासेयदितक्रं १४

31
1936

स्त्रिगिरिशःकिन्नीलकंठोभवेद्वैकुंठेयदिकृष्णतामनुभवेद्याप्तिकिंकेशवः इंद्रोदुर्भगतांक्षयंद्विजपतिर्लंबोदरत्वंगणःकुष्ठत्वंचकुबेरको
दहनत्वामग्निश्चकिंविंदति १४ इतितक्रगुणाः अथनवनीतं नवनीतंहितंगव्यंवृष्यंवर्णबलाग्निकृत् संग्राहीवातपित्तार्शःक्षयार्शो
र्दितकासजित् १ तद्धितंबालकेवृद्धेविशेषादमृतंशिशोः इतिगव्यं माहिषंनवनीतंतुवातश्लेष्मकरंगुरु दाहपित्तश्रमहरंमेदःशु
क्रविवर्धनं इतिमाहिषं आजंत्रिदोषशमनंनवनीतंतयोर्वरं क्षीरोत्थंतद्धितस्निग्धंचक्षुष्यंरक्तपित्तनुत् १वृष्यंबलकरंग्राहिमधु
रंशीतलंपरं इत्याजं नवनीतंतुसद्यस्कंस्वादुग्राहिहिमंलघु मध्येकिंचित्कषायाम्लमीषत्तक्रांशसंक्रमात् २सद्योनवनीतगुणाः
सक्षारकटुकाम्लत्वाछर्दरशःकुष्टकोपनं श्लेष्मलंगुरुमेदस्यंनवनीतंचिरंतनं १ इतिचिरंतननवनीतगुणाः अथघृतगुणाः धीकां
तिस्मृतिकारकंबलकरंमेधाकरंपुष्टिकृत् वातघ्नंश्रमनाशनंस्वरकरंपित्तापहंपुष्टिदं वह्नेर्वृद्धिकरंविपाकमधुरंवृष्यंवपुस्थैर्यदं
सेव्यंगव्यघृतोत्तमंबहुगुणंसद्यःसमावर्जितं सर्पिर्गवांचामृतकंविषघ्नंचक्षुष्यमारोग्यकरंचवृष्यं रसायनंमंदमतीवमेध्यंस्नेहो
त्तमंचेतिबुधास्तुवंति इतिगव्यं अथमाहिषं सर्पिर्माहिषमुत्तमंधृतिकरंसौख्यप्रदंकांतिदं वातश्लेष्मनिबर्हणंबलकरंवर्णप्रसाद
क्षमं दुर्नामग्रहणीविकारशमनंमंदानलेदीपनंचक्षुष्यंनवगव्यतःपरमिदंहृद्यंमनोहारिच १ अथाज्यं आजंघृतंदीपनीयंच
क्षुष्यंबलवर्धनं कासेश्वासेक्षयेवापिपथ्यंपानेषुतल्लघु अथाविकं आविकंघृतमतीवगुरुत्वाद्वर्ज्यमेवसुकुमारनराणां सद्यएव
बलपुष्टिकरंस्याद्दोष्ट्रकंश्वयथुनाशकरंच इत्याविकमौष्ट्रंच अथनूतनघृतगुणाः योजयेन्नवमेवाज्यंभोजनेतर्पणेश्रमे बल
क्षयेपांडुरोगेकामलानेत्ररोगयोः अथपुराणघृतं सर्पिःपुराणंविज्ञेयंदशवर्षस्थितंतुयत् सर्पिःपुरातनंश्रेष्ठंत्रिदोषतिमिरा
पहं मूर्छाकुष्ठविषोन्मादग्रहापस्मारनाशनं दशसंवत्सरादूर्ध्वमाज्यमुक्तंरसायनं १ शतवर्षस्थितंयत्तुकुंभसर्पिस्तदुच्यते रक्षो
घ्नंकुंभसर्पिःस्यात्परतस्तुमहाघृतं २ पेयंमहाघृतंभूतैःसर्वेतोपिगुणाधिकं यथायथाजरांयातिगुणवत्स्यात्तथातथा ३भक्ष
णात्कासरोगघ्नमंजनान्नेत्ररोगजित् शिरोभ्यंगादूर्ध्वजत्रुरोगघ्नंतत्पुरातनं ४ अथरोगविशेषेघृतनिषेधः राजयक्ष्मणिबाले
वृद्धेश्लेष्मामयेगदे रोगेसामेविषूच्यांचविबंधेचमदात्यये १ज्वरेमंदानलेमेहेनसर्पिर्बहुमन्यते इतिघृतगुणाः अथतैलगु

णाः सर्ववातहरं तैलं तिलोत्थमलसंभवं तैलं संयोगसंस्कारात्सर्वरोगहरं स्मृतं १ तिलतैलमलं करोति केशान्मधुरं तिक्तकषायमुष्णतीक्ष्णं बलकृत्कफवात
जंतु खर्जुव्रणकंडूतिहरं च कांतिदायि २ कंडूहरं कांतिविवर्धनं च वीर्यं विवृद्धिं वपुरोपणं च तिलस्य जातं खलु यच्च तैलं बालेषु वृद्धेष्वपि पथ्यमेतत् न
पित्तरोगेन च शोणिते च पथ्यं महावातविकारसंघे तिलोद्भवं तैलमुदाहरंति वाताश्रितान्हंति समस्तदोषान् इतितिलतैलं अथैरंडतैलगुणाः तैल
मैरंडजं बल्यं गुरूष्णमधुरं समं तिक्तोष्णं पित्तलं विस्त्रं कैरंडोद्भवं भृशं एरंडतैलं कृमिनाशनं च सर्वत्र शूलघ्नमरुत्प्रणाशं कुष्ठापहं चापि रसायनं च
पित्तप्रकोपानिलशोधनं च वृध्मगुल्मानिलकफानुदरं विषमज्वरं वातशूलगजेंद्राणामेरंडकेसरी इत्येरंडतैलं अथसार्षपं सार्षपं कृमिनुत्तैलं
कुष्ठकंडुहरं लघु पित्तास्रदूषणं हंति मेदः कर्णशिरोग्रहान् अथकुसुंभतैलं कुसुंभतैलं विष्टंभी पाके च कटुकं गुरु विदाहि च विशेषेण सर्वदोषप्रको
पनं १ अथराजिकातैलं सार्षपेण समं तैलं राजिकायाश्च कुष्ठजित् कंडुपामाहरं दद्रुकृमिनुत्तीक्ष्णकं पुनः २ सोमतैलं मचाक्षुष्यं पित्तकृद्दाननाश
नं आक्षजं कफवातघ्नं केश्यं दृक्श्रोत्रतर्पणं २ इत्यसाविभितकतैलं च ज्योतिष्मतीभवं तैलं पित्तलं स्मृतिबुद्धिदं निंबतैलं जयेत्कुष्ठं व्रणमेहमहाकृमी
न् इतिज्योतिष्मतीनिंबतैलं च अथधान्यतैलं सर्वधान्यसमावर्त्तजातानि फलजानि च तैलवतानि तल्लेपः खर्जूरकंडूविनाशनः १ इतिधान्यतै
लं इतितैलानि अथमधु त्रिदोषघ्नमधु शीतकमन्यस्यात्सन्निपातहृत् हिक्काश्वासकृमिच्छर्दिमोहतृष्णाविषापहं तत्रभेदाः माक्षिकाभ्राम
रं क्षौद्रं पौत्तिकं छात्रमेव च आर्घ्यमौदालिकं दालमित्यष्टौ मधुजातयः १ माक्षिकं तैलसंकाशं भ्रामरं स्फाटिकोज्वलं क्षौद्रं कपिशवर्णं च पौ
त्तिकं तैलसन्निभं १ छात्रं तलीत कपिलमार्घ्यं श्वेतपिशंगकं औदालं पीतकपिलं नानावर्णं तु दालकं १ माक्षिकं मधु कं श्रेष्ठं नेत्रामयहरं ल
घु पौत्तिकं लघु संग्राहि कफभ्रवातपित्तकृत् २ क्षौद्रं माक्षिकवज्ज्ञेयं विशेषान्मेहनाशनं भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ३ नवीनं
श्लेष्माभिष्यंदि स्निग्धं श्लेष्महरं परं पुराणं ग्राहि तद्रूक्षं मेदोघ्नमतिलेखनं ४ त्रिदोषशोषज्वरनाशनं च श्वासप्रमेहं व्रणशोधनं च पित्तं च तृष्णां
नयने जलं च रक्तं च गुल्मं कृमिशूलकुष्ठं ५ शस्त्राभिघातं उरसोभिघातं क्षयं प्रमेहं उदरं च हिक्कां पित्तातिसारं ग्रहणीगदं च सर्वांश्च रोगान्वि
निहंति क्षौद्रं अथविशिष्टगुणाः क्षयेमाक्षिकमुद्दिष्टं भ्रामरं रक्तपित्तनुत् क्षौद्रं मेहहरं पांडुव्रणपौत्तिकमुत्तमं छात्रं सर्वत्र शस्तं स्यादा
र्घ्यं चाक्षुष्यमुत्तमं औद्दालकं कुष्ठहरं विकद्दालमीरितं ८ एतेविशिष्टाः कथिता मधूनां मुनिभिर्गुणाः प्रत्येकं मधुनः क्षीराद्दवां च कुडवद्वयं १५

33/1936

निशाभयारजोदद्यात्प्रत्येकं वपलं पलं मध्वावसानं विपचेन्मधुपाके त्वयं विधिः इतिमधुगुणाः अथेक्षुगुणाः इक्षुः स्वादुर्गुरुः शीतो वृष्यः स्नि
ग्धो बलप्रदः जीवनो वातपित्तघ्नः कुर्यान्मूत्रकफकृमीन् १ समूलोमधुरोत्यर्थं मध्यं मधुर एव तु अग्रे ग्रंथिषु विज्ञेयो लवणो रसतस्तथा इतिसा
मान्येक्षुः अथेक्षुभेदः लोहितोक्षुर्गुरुः शीतो दाहपित्तास्रकुष्ठजित् पौंड्रकः शीतलः स्निग्धो बृंहणः कफकृत्सरः कृष्णेक्षुस्तद्गुणैर्ज्ञेयो
विशेषाद्दाहनाशनः वंशेक्षुः क्षारोष्णकफकृत्पथ्यः स्निग्धो विबंधनुत् २ कृष्णापौंड्रकगंडकाः सुरुचिराश्चंद्रांशुभिर्भाविताः प्रत्यूषेथ यथाबलं
भजति यो युक्त्या ज्वरार्तिश्चिरं मुक्तः स्याद्विरेण शीतकमुखाज्जीर्णज्वराद्यक्ष्मतः पित्तं याति शमं प्रयाति वपुषः पुष्टिं बलं पावकः २ दृष्यो रक्ता
स्रपित्तश्रमशमनपरः शीतलः श्लेष्मदोस्यं स्निग्धो हृद्यश्च रुच्यो रचयति समुदं मूत्रशुद्धिं विधत्ते कांतिं देहस्य धत्ते बलमपि कुरुते बृंहणस्त्वनि
दायी दंतैर्निष्पीडितः कांडेर्म्रदुयदि रससितो भक्षितश्चेक्षुदंडः ४ अभुक्ते पित्तहंता रो भुक्ते पित्तप्रकोपनाः भुक्तिमध्ये गुरुतमा इतीक्षुर्गुणाश्रि
युः अथफाणितं काकवी फाणितं गुर्वभिष्यंदि दोषलं मूत्रशोधनं अथगुडः गुडः समधुरः क्षारो गुरूष्णः कफवातनुत् अहितः पित्तरक्ते च जी
र्णश्चैव रसायनः १ अथजीर्णगुडगुणाः पित्तघ्नः पवनापहो रुचिकरो हृद्यस्त्रिदोषार्तिनुत्संयोगेन विशोषनो ज्वरहरः संतापशांतिप्रदः
विण्मूत्रामयनाशयोग्निजननः पांडुप्रमेहापहो स्निग्धः स्वादुरसो लघुः श्रमहरः पथ्यः पुराणो गुडः इतिगुडः अथशर्करागुणाः सितो
पलासरा गुर्वी वातपित्तहरा हिमा तृष्णाश्रमकृमच्छर्दिदाहमूर्छामदापहा इतिनाबनशर्करा अथरायपुरी रुच्या पुष्टिप्रदा स्निग्धा मोह
दाहमरुभ्रमान् निहंति खंडशिशिरो गुरु पित्तसमीरजित् अथातिश्वेतशर्करा बुरादेशभाषा सितामत्स्यंडिकापल्लीति मदनपालनिघंटौ
चिनीशर्करा सिताहिमा सरा वृष्या बलत्वग्निकरा लघुः तद्भूक्लमश्रमपित्तास्रदाहमोहानिलापहः १ माधवीशर्करा रूक्षा कफपित्तास्रजिद्गुरुः
इतिमधुशर्करा इतिशर्करागुणाः अथमूत्राष्टकं महिषाजागोश्वानां खराणामुष्ट्रहस्तीनां मूत्राष्टकमिति ख्यातं सर्वशास्त्रेषु संमतं १
गोमूत्रं कटु तिक्तोष्णं सक्षारं लेखनं सरं लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् २ शूलगुल्मोदरानाहविकारेस्थापनादिषु मूत्रप्रयोगसा
रेषु गव्यं मूत्रं प्रयोजयेत् अथमूत्रं भाजायाः कासश्वासापहं शोफकामलापांडुरोगजित् छागं रूक्षोष्णकटुकमीषन्मारुतकोपनं अथा
विमूत्रं प्लीहोदरश्वासकासशोफवर्चोग्रहे हितं सक्षारकटुकं तिक्तमुष्णं वातघ्नमाविकं माहिषमूत्रं दुर्नामोदरशूलेषु कुष्ठमेहविशु

यो०र०
१६

चिका आनाहशोफगुल्मेषुपांडुरोगेचमाहिषं १ गजमूत्रं सतिक्तलवणंभेदीवातघ्नंपित्तकोपनं तीक्ष्णंक्षारंकिलासेच गजमूत्रंप्रयोजयेत्
१ अश्वमूत्रं दीपनंकटुतिक्तोष्णंवातरोगविकारनुत् अश्वंकफहरंरूक्षंकृमिदद्रुविनाशनं १ औष्ट्रमूत्रं औष्ट्रंकुष्ठोदरोन्मादशोफार्शःकृ
मिवातनुत् गरचेतोविकारघ्नंतीक्ष्णंजठररोगजित् गर्दभमूत्रं दीपनंगर्दभंमूत्रंकृमिवातकफापहं कषायतिक्तमेतेषु हिक्काश्वासहरंपरं
१ मानुषमूत्रं पित्तरक्तकृमिहरंरेचनंकफवातजित् तिक्तंमोहहरंमूत्रंमानुषंतुविषापहं इत्यष्टमूत्राणि अथत्रिफला एकाहरीतकीयो
ज्याद्वौचयोज्यौविभीतकौ चत्वार्यामलकान्येवत्रिफलैषाप्रकीर्तिता: त्रिफलामेहशोफघ्नीनाशयेद्विषमज्वरान् दीपनीश्लेष्मपित्तघ्नीकु
ष्ठहंत्रीरसायणी २ सर्पिर्मधुभ्यांसंयुक्तासेवनेत्रामयाञ्जयेत् अथत्रिकटु पिप्पलीमरिचंशुंठीत्रयमेतद्धिमिश्रितं त्रिकटुत्र्यूषणंव्यूष
कटुत्रिकमथोच्यते १ दीपनंरुचिदंवातश्लेष्ममंदाग्निशूलनुत् अथपंचकोलं पिप्पलीपिप्पलीमूलंचव्यचित्रकनागरैः एकत्रमिश्रितै
रेभिः पंचकोलकमुच्यते पंचकोलस्त्रिदोषघ्नोरुच्योदीपनपाचनः स्वरभेदहरश्चैवशूलगुल्मार्तिनाशनः इतिपंचकोलं पंचकोलं
समरिचंषड्षणमुदीर्यते पंचकोलगुणंतत्तुविशेषादग्निवर्धनं इतिषडूषणं अथचतुरूषणं त्र्यूषणंग्रंथिकयुतंजायतेचतुरूषणं
चतुरूषणमोख्यातंगुणैस्त्र्यूषणवद्बुधैः १ कफाग्निमांद्यविष्टंभारुचिपीनसश्वासनुत् अथचातुर्जातं त्वगेलापत्रकैस्तुल्यैस्त्रिसुगंधि
त्रिजातकं नागकेसरसंयुक्तंचातुर्जातकमुच्यते १ स्वरभेदश्वासकासमुखदोषविनाशनं वृष्यंबल्यंचयोगार्हंचातुर्जातंरसायनं २
अथदशमूलं बिल्वाग्निमंथस्योनाकःकाश्मरीपाटलास्थिरा त्रिकंटकंपृश्निपर्णीबृहतीकंटकारिका दशमूलमिदंश्वाससन्निपात
ज्वरापहं १ तच्चलघुमहत्चमूलभेदः शालिपर्णीपृश्निपर्णीबृहतीकंटकारिका तथागोक्षुरसंयुक्तंपंचमूलमिदंलघु १ बिल्वोग्नि
मंथस्योनाकःकाश्मरीचाथपाटला ज्ञेयंमहत्चमूलंदशमूलमुभेयुते २ पंचमूलंत्रिदोषघ्नंवातघ्नंदशमूलकं ज्वरकासंश्वास
शूलंमंदाग्न्यारुचिनाशनं ३ इतिदशमूलगुणाः अथमध्यमपंचमूलानि बलापुनर्नवैरंडसूर्यपर्णीद्वयेनच मध्यमंकफवातघ्नं
नातिपित्तकरंपरं अथपंचवल्कलानि न्यग्रोधोदुंबरोश्वत्थप्लक्षवेतसवल्कलैः सर्वैरेकत्रमिलितैः पंचवल्कलमुच्यते १ रसेकषा
यशीतंचवर्ण्यंदाहतृषापहं योनिदोषंकफंशोफंहंतिदंपंचवल्कलं अथपंचभृंगगुणाः देवदातिशमीभृंगीनिर्गुंडीशमकंतथा १८

35
1936

रोगार्त्तैस्नानमानार्हंपंचभृंगमितिस्मृतं अथाम्लपंचकं बीजपूरकजंबीरंनारिंगंसाम्लवेतसं फलंपंचाम्लकंख्यातंनिंबिडीसहितंपरं पंचा
म्लकंसमुद्दिष्टंतथोक्तंचापिपंचकं अथपंचांगानि त्वक्पत्रफलानिपुष्पाण्येकस्यशाखिनः पंचांगमितिबोद्धव्यंप्राज्ञैरेकत्रमिश्रितं अथ
संतर्पणगुणाः द्राक्षादाडिमखर्जूरैर्मर्दितांबुसशर्करं लाजाचूर्णंसमध्वाज्यंसंतर्पणमुदाहृतं १ संतर्पणंशीतलपानेनेत्ररोगविनाश
नं बल्यंरसायनंहृद्यंवीर्यवृद्धिकरंपरं २ अथयक्षकर्दमगुणाः कुंकुमागरुकर्पूरंकस्तूरीचंदनानिच महासुगंधइत्युक्तोनामतोयक्षक
र्दमः १ यक्षकर्दमएवंस्याच्छीतोत्वग्दोषहृत्परः सुगंधिःकांतिदश्चैवशिरोर्तिविषनाशनः अथराजनिघंटौकेशरनामगुणाश्च ज्ञेयं
कुंकुममग्निशिखंवरमस्रकाश्मीरजंपीतकं काश्मीरंरुचिरंवरंचपिशुनंरक्तंशठंशोणितं वाल्हीकंघुसृणंवरेण्यमसृग्कालेयकंजागु
डकांतंवह्निशिखंचकेशरवरंरागौवराक्षीरितं कुंकुमंसुरभितिक्तकटुष्णंकासवातकफकंठरुजघ्नं मूर्धशूलविषदोषविनोदंरोचनंच
तनुकांतिकरंच २ वसंतकालेघुसृणेनयुक्तःकस्तूरिकाचंदनचारुलेपः आवासितश्चेन्नवमल्लिकाभिस्त्रिदोषजीन्नथजन्मभूमिः
३ अथपंचसुगंधिगुणाः कंकोलंपूगफलंलवंगकुसुमानिच जातीफलानिकर्पूरमेतत्पंचसुगंधिकं १ सुगंधिपंचकंशीतंरक्त
पित्तविनाशनं हंत्यास्यमुखवैरंगंध्यंपीनसंवाककफास्त्रजित् अथषड्रसाः कटुतिक्तकषायश्चलवणोम्लस्तुपंचमः मधुरेणसमायुक्तः
षड्रसोयमुदाहृतः अथमधुरत्रिकं घृतंगुडोमाक्षिकंचविज्ञेयंमधुरत्रयं ज्ञेयंत्रिमधुरंचैवप्रोक्तंचमधुरत्रयं अथसमत्रिकं
हरीतकीनागरंचगुडंचैकत्रमिश्रितं त्रिसमंभाषतेप्राज्ञस्तथाचापिसमत्रिकं अथक्षारत्रयं सर्जिक्षारंयवक्षारंटंकणंक्षारमेवच
क्षारत्रयंसमाख्यातंत्रिक्षारंचप्रकीर्तितं अथक्षारपंचकं पलाशतिलमुष्कानांक्षारास्वर्जियवाग्रजैः समांशमिलिताःपंचक्षार
पंचकमादिशेत् अथक्षाराष्टकं अपामार्गपलाशार्कतिलमुष्कयवाग्रजं सर्जिटंकणसंयुक्तंक्षाराष्टकमुदाहृतं अथक्षारद्वयं
स्वर्जिकायावशूकश्चक्षारद्वयमुदाहृतं ज्ञेयौवह्निसमौक्षारौस्वर्जिकायावशूकजौ १ क्षाराश्चान्येपिगुल्मार्शोग्रहणीरुक्छिदः
सराः पाचनाःकृमिपुंस्त्वघ्नाःशर्कराश्मरिनाशनाः इतिक्षारौ अथलवणत्रयं सैंधवंरुचकंचैवबिडंचलवणत्रयं एतत्त्रि
लवणंप्रोक्तंनामतःशास्त्रकोविदैः अथलवणपंचकं सौवर्चलंसैंधवंचबिडमौद्भिदमेवच सामुद्रेणसमायुक्तंज्ञेयंपंचलवणं

चकं १ एकद्वित्रिचतुःपंचलवणानिक्रमाद्विदुः मधुरंसृष्टविण्मूत्रंस्निग्धंसूक्ष्मबलापहं १ वीर्योष्णंदीपनंतीक्ष्णंकफहृत्पित्तवर्धनं अथ
लवणषट्कं सामुद्रंसिंधुरुचकंबिंदुरोमकपांड्वं षडेतेचसमाख्यातालवणाःशास्त्रकोविदैः १ अथचंदनं स्वादेतिक्तंकषेपीतंछेदेरक्तं
तनौसितं ग्रंथिकोटरसंयुक्तंचंदनंश्रेष्ठमुच्यते चंदनपरीक्षा चंदनंशीतलंरूक्षंतिक्तमाल्हादनंलघु हृद्यंवर्ण्यंविषश्लेष्मतृष्णापित्ता
स्रदाहजित् १ कालीयकंरक्तगुणंविशेषाद्रोगनाशनं कृष्णागरू छकर्णाक्षिरोगनुछीतलंलघु २ अथगुडूचीसत्वगुणाः छिन्नास
त्वंहरतिसकलंदुस्तरंतीव्रनापंकालेचोक्तंभवतिचनृणांयौवनेपुज्वरेषु दाहंमेहंज्वरमरुचितषाश्वासपांडुप्रहिक्कास्त्रीणांरक्तप्रदरज
नितेरोगराजेषुशस्तं १ इतिसारसंग्रहेछिन्नागुणागुणकथनंनामवर्गः अथात्रस्वरसः अथातःस्वरसःकल्कःक्वाथश्चहिमफांट
कौ ज्ञेयाःकषायाः पंचैतेलघवस्युर्यथोत्तरं तेषुस्वरसकल्पना आहतात्तत्क्षणाकृष्टाद्द्रव्यात्क्षुण्णात्समुद्भवेत् वस्त्रनिष्पीडितो
यःस्यात्स्वरसोरसउच्यते १ कुडवंचूर्णितंद्रव्यंक्षिप्तंचद्विगुणेजले अहोरात्रस्थितंतस्माद्भवेद्वारसउत्तमं २ आदायशुष्कद्रव्यंवास्व
रसानामसंभवे जलेष्टगुणितेसाध्यंपादशिष्टंचगृह्यते स्वरसस्यगुरुत्वाच्चपलमर्धंप्रयोजयेत् निशोषितंचाग्निसिद्धंपलमात्रंरसं
पिवेत् ४ मधुश्वेतागुडक्षारान्जीरकंलवणंतथा घृततैलंचचूर्णादीन्कोलमात्रान्रसेक्षिपेत् ५ सयथा अमृतायारसःक्षौद्र
युक्तःसर्वप्रमेहजित् हरिद्राचूर्णसंयुक्तोरसोधात्र्याःसमाक्षिकः इत्यादि पुटपक्वस्यकल्कस्यस्वरसोगृह्यतेयतः अतस्तुपुट
पाकानांयुक्तिरत्रोच्यतेमया पुटपाकस्यमात्रेयंलेपस्यांगारवर्णता लेपंचत्र्यंगुलंस्थूलंकुर्याद्वांगुष्ठमात्रकं १ काश्मरीवटजंबादि
पत्रैर्वेष्टनमुत्तमं पलमात्रोरसोग्राह्याःकर्षमात्रंमधुक्षिपेत् २ कल्कचूर्णद्रवाद्यास्तुदेयाःस्वरसवद्बुधैः सयथा तत्कालोत्कृष्ट
कुटजत्वचंतंडुलवारिणा पिष्टंचतुःपलमितंजंबूपल्लववेष्टितं सूत्रेणबद्धंगोधूमपिष्टेनपरिवेष्टितं लिप्तंचघनपंकेनगोमये
र्वह्निनादहेत् अंगारवर्णंचमृदंदृष्ट्वावह्निसमुद्धरेत् ततोरसंगृहीत्वाचशीतंक्षौद्रयुतंपिवेत् जयेत्सर्वानतीसारान्दुस्तरान्
सुचिरोत्थितान् अतिसारेकुटजपुटपाकः इत्यादि अथकल्कः द्रव्यमार्द्रंशिलापिष्टंशुष्कंवासजलंभवेत् प्रक्षेपावापकल्कास्ते
तन्मात्राकर्षसंमिता कल्केमधुघृतंतैलंदेयंद्विगुणमात्रया सितागुडंसमंदद्याद्द्रवादेयाश्चतुर्गुणाः २ सयथा त्रिवृद्ध्यापंचक १७

37
1936

ध्यावासमहृध्याथवाकणा पिबेत्त्रिशृद्दशादिनंतात्स्यथैवापकर्षयेत् एवंविंशद्दिनांसिध्यंपिप्पलीवर्धमानकं अनेनपांडुवातास्रकास
श्वासारुचिज्वराः २ उदरार्शःक्षयश्लेष्मवातानश्यंतुरोग्रहाः इत्यादि अथक्वाथः पानीयंषोडशगुणेक्षुण्णाद्द्रव्यंपलंक्षिपेत् मृत्पात्रे
क्वाथयेद्ग्राह्यमष्टमांशावशेषितं तज्जलंपाययेद्धीमान्कोष्णंमृद्वग्निसाधितं शृतःक्वाथःकषायश्चनिर्यूहःसंनिगद्यते २ आहार
रसपाकेचसंजातेद्विपलोन्मिते वृद्धवैद्योपदेशेनपिबेत्क्वाथंसुपाचितं ३ क्वाथेक्षिपेत्सितामंशैश्चतुर्थाष्टमषोडशैः पित्तवातकफातं
केविपरीतंमधुस्मृतं ४ जीरकंगुग्गुलंक्षारंलवणानिशिलाजतु हिंगुत्रिकटुकंचैवक्वाथेशाणमितान्क्षिपेत् क्षीरंघृतंतैलंमूत्रंचा
न्यद्द्रव्यंतथाक्षिपेत् कल्कंचूर्णादिकंक्वाथेनिक्षिपेत्कर्षसंमितं ५ गुडूचीधान्यकारिष्टपद्मकंरक्तचंदनं गुडूच्यादिरयंक्वाथःसर्व
ज्वरहरःस्मृतः ७ अथहिमकल्पना क्षुण्णद्रव्यपलंसम्यक्षड्भिर्नीरपलैःसृतं निशोषितंहिमःसस्यात्तथाशीतकषायकः १
तन्मानंफांटवज्ज्ञेयंसर्वत्रैषविनिश्चयः सयथा आम्रजंबूचककुभंचूर्णीकृत्यजलेक्षिपेत् हिमंतस्यपिबेत्प्रातःसक्षौद्रंरक्तपित्तजित्
इत्यादि अथफांटकल्पना क्षुण्णद्रव्यपलेसम्यक्जलमुष्णंविनिक्षिपेत् मृत्पात्रेकुडवोन्मानंततस्तुस्रावयेत्सदा १ सस्याच्चूर्णद्र
वःफांटस्तन्मानंद्विपलोन्मितं मधुश्वेतागुडादींश्चक्वाथवत्तत्रनिक्षिपेत् सयथा मधूकपुष्पंमधुकंचंदनंसाटरूषकं मृणालं
कमलंलोध्रंगंभारीनागकेशरं १ त्रिफलासारिवाद्राक्षालाजाकोष्णजलेक्षिपेत् सितामधुयुतःपेयोफांटोवासोहिमोथवा २
वातपित्तज्वरंदाहंतृष्णामूर्छारतिभ्रमान् रक्तपित्तंमदंहन्यान्नात्रकार्याविचारणा ३ इतिमधुकादिफांटः अथमंथः मं
थोपिफांटभेदःस्यात्तेनवात्रैवकथ्यते जलेचतुःपलेशीतेक्षुण्णंद्रव्यंपलंक्षिपेत् मृत्पात्रेमंथयेत्सम्यक्तस्माच्चद्विपलंपिबेत्
इत्यादि अत्यंतशुष्कंयद्द्रव्यंसुपिष्टंवस्त्रगालितं तस्यचूर्णंरजःक्षौद्रंतन्मात्राकर्षसंमिता १ चूर्णेगुडःसमोदेयःशर्कराद्वि
गुणाभवेत् चूर्णेषुभर्जितांहिंगुजीरकंचैतिकेचन २ लिहेच्चूर्णंद्रवैःसर्वैर्घृताद्यैर्द्विगुणोन्मितैः पिबेच्चतुर्गुणैरेवचूर्णमालोड्य
तंद्रवैः चूर्णावलेहगुटिकाकल्कानामनुपानकं पित्तवातकफातंकेत्रिद्व्येकपलमाहरेत् यथातैलंजलेक्षिप्तंक्षणेनैवप्रसर्पति अनु
पानबलादंगेतथासर्पतिभेषजं द्रवेणयावतासम्यक्चूर्णंसर्वप्लुतंभवेत् भावनायाःप्रमाणंतुचूर्णेप्रोक्तंभिषग्वरैः १ अथवटककल्पना

चरकाअक्कथ्यतेतन्नामगुटिकावटी मोदकोवटिकापिंडागुडोवर्त्तिस्तथोच्यते १ लेहवत्साध्यतेवह्नौगुडोवाशर्करायथवा गुग्गुलुर्वा
क्षिपेत्तत्र चूर्णंनिर्मितावटी २ कुर्यादवह्निसिद्धेनक्वचिद्गुग्गुलुनावटी द्रवेणमधुनावापिगुटिकांकारयेद्बुधः सिताचतुर्गुणादेया
वटीषुद्विगुणोगुडः सर्वचूर्णसमःकार्योगुग्गुलुर्मधुतत्समं ४ द्रवंचद्विगुणंदेयंमोदकेषुभिषग्वरैः कर्षप्रमाणातन्मात्राबलंदृष्ट्वा
प्रयोजयेत् अथावलेहः क्वाथोदेयःपुनःपाकात्घनत्वंसरसंनयेत् सोवलेहश्चलेहश्चतन्मात्रास्यात्पलोन्मिता १ सिताचतुर्गुणा
कार्याचूर्णाद्वद्विगुणोगुडः द्रवंचतुर्गुणंदद्यादितिसर्वत्रनिश्चयः २ दुग्धमिक्षुरसोयूषः पंचमूलकषायनः वासाक्वाथोयथा
योग्यमनुपानंप्रशस्यते ३ अथस्नेहपाकविधिः आदौसंचारयेत्क्वाथंदुग्धंकल्कंततःक्रमात् ततोन्यत्करभिद्रव्यमेषःस्नेहविधिः
क्रमात् १ इतिमतिमुकुरात् तैलंकृत्वाकटाहेदृढतरविमलेमंदमंदानलेनसम्यङ्निःफेनभावंगतमिहहियदाशैत्यभावंसमे
त्य मंजिष्ठारात्रिलोध्रैर्जलधरतनुकैःसामलैःसाक्षपथ्यैःसूचीपुष्पाभिनीरैरुपहितमथितैस्तैलगंधंजहाति २ आम्रजंबूक
पित्थानांबीजपूरकबिल्वयोः शोधनंतिलतैलस्यपल्लवानांतुपंचकं ३ चरकात् कल्काच्चतुर्गुणःस्नेहः स्नेहक्वाथंचतुर्गुणं
क्वाथाच्चतुर्गुणंवारिक्वाथःक्वाथ्यसमोमतः ४ मृदौचतुर्गुणंदेयंकठिनेष्टगुणंजलं कठिनात्कठिनेद्रव्येवारिषोडशभागिकं
५ कर्षादितःपलंयावद्वारिषोडशकंक्षिपेत् तदूर्ध्वंकुडवंयावत्क्षिपेदष्टगुणंजलं ६ प्रस्थादितःक्षिपेन्नीरंखारियावत्
चतुर्गुणं शब्दहीनोग्निनिक्षिप्तःस्नेहसिद्धिर्भवेत्तदा ७ योगरत्नावलीतः यदाफेनोद्गमस्तैलेफेनशांतिश्चसर्पिषि
वर्णगंधरसोत्पत्तिःस्नेहसिद्धिस्तदाभवेत् ८ अकल्कद्रव्ययोग्यानांकठिनानांविचारतः क्वाथोविधीयतेन्येषांकल्क
एषभिषग्मतः ९ इतिवैद्यालंकारात् ईषत्सिद्धोभवेत्कल्कः क्वाथोग्निकथितोमतः स्नेहपाकस्त्रिधाप्रोक्तोमृदुर्मध्यः
खरस्तथा १० ईषत्खरःसकल्कस्तुस्नेहपाकोमृदुर्भवेत् मध्यपाकश्चसिद्धश्चकल्केनीरसकोमले ईषत्कठिनक
ल्कश्चस्नेहपाकोभवेत्खरः तदूर्ध्वंदग्धपाकःस्याद्दाहकृत्तिःप्रयोजकः २ आमपाकश्चनिर्वीर्योवह्निमांद्यकरोगु
रुः नस्यार्थंस्यान्मृदुःपाकेमध्यमःसर्वकर्मसु ४ अभ्यंगार्थंखरःप्रोक्तोयुंज्यादेवंयथोचितं घृततैलगुडादींश्च १८

39
1936

साधयेन्नैकवासरे ५ प्रकुर्वंत्युषिताश्चैतेविशेषाद्गुणसंचयं इतिशारंगधरात् अथसारसंग्रहात् तैलसंस्थापपात्रेविधिवदथपचेद्रास
सदग्निमानात्क्वाथैर्दुग्धैश्चकल्कैस्तदनुसुरभिभिःशोधनीयैर्विशिष्टैः कस्तूरीचंदनैलाजलजलदजटीरक्तपाणीरकुष्ठत्वग्मंजिष्ठागुरु
क्वागरुनखरदलःपीतकंकोलमुख्यैः इतिस्नेहपाकविधिः अथलाक्षारसविधिः दशांशलोध्रमादायतद्दशांशंचसर्जिका किंचि
द्रोषबदरीपत्रंवारिषोडशधास्मृतं १ वस्त्रपूतोरसोग्राह्योलाक्षायाःपादशेषतः अथआसवारिष्टाः द्रवेषुचिरकालस्थंद्रव्यंयत्सं
धितंभवेत् आसवारिष्टभेदैस्तत्प्रोच्यतेभेषजोचितं यदपक्वौषधांबुभ्यांसिद्धंमद्यंसआसवः अरिष्टःक्वाथसिद्धःस्यात्तयोर्मानंपलोन्मि
तं २ अनुक्तमानारिष्टेषुद्रव्यद्रोणेगुडोतुलां क्षौद्रंक्षिपेद्गुडादर्धंप्रक्षेपंदशमांशकं ३ शेषःशीतरसःसिधुरपक्वमधुरद्रवैः परिप
क्वान्नसंधानसमुत्पन्नांसुरांजगुः सुरामंडःप्रसन्नास्यात्ततःकादंबरीघना ५ तदधोजंगलोज्ञेयोमेदकोजंगलाद्घनः न पक्वसंहृतसारः
स्यात्करावीजंकिलांतके ६ पनालखर्जूररसैःसाधितंस्याद्धिवारुणी कंदमूलफलादीनिसस्नेहलवणानिच ७ यत्रद्रवेभिधीयंतेतत
त्क्तमभिधीयते विनष्टमम्लतांयातंमद्यंवामधुरद्रवः ८ विनष्टःसंधितोयस्तुतच्छुक्तमभिधीयते गुडांबुनासतैलेनकंदशाकफलै
स्तथा संधितंचाम्लतांयातंगुडशुक्तंप्रचक्षते एवमेवेक्षुशुक्तंस्यान्मृद्विकासंभवंतथा १० तुषांबुसंधितंज्ञेयमामैर्विदलितैर्यवैः
यवैस्तुनिस्तुषैःपक्वैःसौवीरंसंधितंभवेत् ११ तुषांबुधान्यमंडादिसंधितंकांजिकंविदुः संडाकीसंधितोज्ञेयोमूलकैःसर्षपादिभिः
१२ इत्यादि अथशिलाजतुकरणं मुख्याशिलाजतुशिलांसूक्ष्मखंडांप्रकल्पयेत् निक्षिपेदुष्णपानीयेयामैकंस्थापयेत्सुधीः
१ मर्दयित्वाततोनीरंगृह्णीयाद्वस्त्रगालितं स्थापयित्वाचमृत्पात्रेधारयेदातपेबुधः उपरिस्थंघनंयत्स्यात्तन्निक्षिपेदन्यपात्रके धारये
दातपेयस्मादुपरिस्थंघनंभवेत् ३ एवंपुनःपुनर्नीताद्विमासाभ्यांशिलाजतु भूयात्कार्यक्षमंवह्नौक्षिप्तंलिंगोपमंभवेत् ४ निर्धू
मंचततःशुद्धंसर्वकार्येषुयोजयेत् अधस्थितंचयत्क्षेपंतस्मिन्नीरंविनिक्षिपेत् ५ शिलाजतुकरणं अधुनाधात्वादीनांलक्षण
शोधनमारणगुणानाह स्वर्णताराररताम्राणिनागवंगौचतीक्ष्णकं धातवःसप्तविज्ञेयाअष्टमःकापिपारदः अथएकीयमानमाह
स्वर्णतारंचताम्रंचवंगोनागस्तुपंचमः रितिकाचतथाघोषोलोहंचेत्यष्टधातवः १ तैलेतक्रेगवांमूत्रेकांजिकेचकुलित्थके सप्तधाते

नानिर्वापासर्वेलोहविशुध्यति २ इतिसामान्यसर्वधातुशोधनं तथासर्वधातुसामान्यमारणं शिलार्कदुग्धगंधकैर्युनाथ्वसम
धातवः पुटैश्चद्वादशैः परंप्रजांतिभस्मतांसदा १अथस्वर्णं दाहेरक्तंसितंछेदे निकषेकुंकुमप्रभं तारश्लोथितांस्निग्धंमृदुहेमगुरु
तमं १श्वेतांगंकठिनंरूक्षंविवर्णंसमलंदलं दाहेछेदसितंश्वेतंकषेलघुचतत्त्यजेत् २इतिलक्षणं अथशोधनं सुवर्णमुत्तमंवह्नौ
विद्रुतंनिक्षिपेत्त्रिशः कांचनारद्रवैःशुद्धंकांचनंजायतेभृशं १अथमारणं कांचनेगालितेनागंषोडशांशेननिक्षिपेत् चूर्णयित्वात
थाम्लेनघृष्ट्वाकृत्वाचगोलकं १गोलकेनसमंगंधंदत्वाचैवाधरोत्तरं शरावसंपुटेधृत्वापुटेद्विंशद्वनोपलैः २एवंसप्तपुटैर्हेमनिरुत्थं
भस्मजायते अन्यत्र स्वर्णपत्रसमंनागभस्मनिंबुविलेपितं त्रिवारंवैगजपुटेस्कवर्णभस्मतांव्रजेत् अन्यच्च पारावतमलैर्लेपादथवाकु
कुरोद्भवैः हेमपत्राणिसंलिप्यप्रदद्यादधरोत्तरं १गंधचूर्णसमंकृत्वाशरावयुगसंपुटे प्रदद्यात्कुक्कुटपुटंपंचभिर्गोमयोपलैः एवंनव
पुटंदद्याद्दशमंचमहापुटं त्रिंशद्वनोपलैर्देयंजायतेहेमभस्मना २अथगुणाः स्वर्णंशीतंपवित्रंक्षयवमिकसनश्वासमोहास्रपित्त
क्षैण्यक्ष्वेडक्षतास्रप्रदरगदहरंस्वादुतिक्तंकषायं हृद्यंमेधाग्निकांतिप्रदरमधुरसंकार्श्यहारित्रिदोषोन्मादापस्मारशूलज्वरजापि
वपुषोबृंहयानेत्रपथ्यं १एतद्भस्मसुवर्णजंकटुघृतोपेतंद्विगुंजोन्मितंलीढंहंतिव्रणांक्षयाग्निसदनंश्वासंचकासारुचिं ओजोधातुवि
वर्धनंबलकरंपांड्वामयध्वंसनंपथ्यंसर्वविषापहंगरहरंदुष्टग्रहण्यादिहृत् २ बलंचवीर्यंहरतेनराणांरोगव्रजान्पोषयतीहकाये
असौख्यकार्येवसदैवहेमापक्वंसदोषंमरणंकरोति १अथशुद्धस्वर्णदलगुणाः शुद्धंस्वर्णदलंसमस्तविषहृत्कृत्वाल्पपित्तापहं
हृद्यंपुष्टिकरंक्षयव्रणहरंकायाग्निमांद्यंजयेत् हिध्मानाहहरंपरंकफहरंनृणांहितंसर्वदातत्तद्रोगहरानुपानसहितंसर्वामय
ध्वंसनं १इतिस्वर्णं अथरौप्यं गुरुस्निग्धंमृदुश्वेतंदाहेछेदेचयत्क्षमं १वर्णाग्न्यंचंद्रवत्स्वच्छंतारंसत्रगुणानव १कृत्रिमंकठिनं
रूक्षंरक्तपित्तंदलंलघु दाहेछेदेचयन्नष्टंरूप्यंदोषाद्यंशुधि: अथमारणं तारपत्राणिसूक्ष्माणिकृत्वातत्तुल्यवोःपृथक् सूतगं
धकयोस्तुल्यंतालयोःस्वल्पसंख्ययोः १कल्कंकृत्वाकुमार्यद्भिस्तेनतानिप्रलेपयेत् शरावसंपुटस्थंत्रिंशद्वन्योपलैःपुटेत् २
एवंरजतमाप्नोतिमृतिवारद्वयेनवै अन्यच्च विधायपिष्टिंसूतेनरजतस्याथमेलयेत् तालगंधसमंपश्चान्मर्दयेन्निंबुकद्रवैः १९

41
1936

द्विवैः पुटैर्भवेद्भस्मयोज्यमेनद्रसादिषु अन्यच्च माक्षिकंदरदंनिंबुजलुतंसूक्ष्मरौप्यदलसंचयंपुटेत् द्वित्रिवारमथभस्मतांव्रजेत्पातको
घङ्वशांकरस्मृतेः इतिरौप्यमारणंतद्गुणाः तारंशीतकषायमम्लमधुरंदोषत्रयच्छेदनंस्निग्धंदीपनमक्षिकुक्षिगदजिद्दाहंविषादि
प्रणुत् मेदोवृद्धिमदात्ययात्ययकरंकांत्यायुरारोग्यकृद्यक्ष्मापस्मृतिशूलपांडुपलितप्लीहज्वरध्वंसनं १अशुद्धंरजतंकुर्यात्तापंकंडुं
गलग्रहात् विबंधंवीर्यनाशानंचबलहानिंशिरोरुजं २इतिरजतं अथताम्रं नविषंविषमित्याहुस्ताम्रंतुविषमुच्यते एकोदो
षोविषेताम्रेत्वष्टौदोषाःप्रकीर्तिताः १भ्रमोमूर्छाविदाहश्चस्वेदक्लेदनवांतयः अरुचिश्चित्तसंतापएतेदोषाविषोपमाः २तस्मात्
संशोधयेत्ताम्रंदोषनिवृत्तये अथशोधनं सलोणवज्रिदुग्धेनताम्रपत्रंविलेपयेत् अग्नौसंतप्तनिर्गुंडीरसेसंसेचयेत्त्रिशः
स्नुह्यर्कक्षीरसेचैर्वाशुद्धवशाधिप्रजायते १अन्यच्च गोमूत्रेणपचेद्यामंताम्रपत्रंदृढाग्निना साम्लक्षारेणसंशुध्येत्ताम्रंप्राप्नोतिस
र्वथा १इतिशोधनं अथमारणं चूर्णंशुद्धस्यताम्रस्यसमसूतंविमर्दयेत् खल्वेजंबीरनीरेणतयोस्तुल्यंतुगंधकं १दिनंगजपुटे
पच्यंताम्रभस्मप्रजायते अन्यच्च तिलपर्णिरसैस्ताम्रपत्राणिपरिलेपयेत् शुभ्रवर्णभवेत्क्षिप्रंनात्रकार्याविचारणा १अन्यच्च
त्रपुताम्रं शुद्धताम्रस्यपत्राणिशुक्तिद्वयमितानिच त्रपुशुक्तिमितंतेनवेष्टयित्वाथतानितु १यामंपचेत्घटीयंत्रेयदात्रपुमयं
तदा तत्स्वांगशीतंनिष्काश्यभक्षयेद्वल्लसंमितं २शृंगवेरयवक्षारशोषणैस्तंनिहंतिच कफामयारुचिप्लीहस्त्रपुताम्रमिदंक्ष
णात् २अथसोमनाथिताम्रं शुल्वतुल्येनसूतेनबलिनातत्समेनच तदर्धांशेनतालेनशिलयाचतदर्धया विधायकज्जलींश्ल
क्ष्णांसूक्ष्मकज्जलसंनिभां कज्जल्याताम्रपत्राणिपर्यायेणाविलेपयेत् यंत्राध्यायविनिर्दिष्टवालुकायंत्रगंपचेत् प्रपक्वेद्युगया
मंतुस्वांगशीतंसमुद्धरेत् तत्तद्रोगहरानुपानसहितंताम्रंद्विवल्लोन्मितंतल्लीढंपरिणामशूलमुदरंशूलंचपांडुज्वरं गुल्मप्लीहक्ष
याग्निसादसदनंश्वासंचकासंतथादुष्टांचग्रहणींहरेद्ध्रुवमिदंतत्सोमनाथाभिधं ४ इतिसोमनाथताम्रं अन्यच्चयोगरत्नस
मुच्चयेपाठांतरं नेपालसंभरुद्रबीजभस्करस्तुल्यस्तयोस्तालकस्तस्यार्धार्धशिलांविधायविधिनाश्लक्ष्णांपराकज्जलीं लिह्या
ताम्रदलात्यधोर्ध्वमनयाभांडेपचेद्यामकं यंत्राध्यायसमुक्तशास्त्रविधिनातत्स्वांगशीतंहरेत् १तत्तद्रोगस्लोकोमलिखितः

अथसामान्यताम्रगुणाः ताम्रंशीतंनिहन्याद्व्रणकृमिज्वरानाहसंप्लीहपांडुश्वासश्लेष्मास्रवातक्षयपवनगदंशूलगुल्मंचगुल्मंकुष्ठान्य
शीतक्षापिस्मरबलरुचिकृद्रक्तमेदाम्लपित्तछर्दिप्रोक्तंच्छृष्यंकृमिरुदरगदाध्मानकुष्ठादिकारि १ इतिताम्रं अथारीतिकांस्ये रीति
कादिविधाज्ञेयातत्राद्याराजरीतिका काकतुंडीद्वितीयासातप्तारात्याद्गुणाधिका १ संतप्ताकांजिकेक्षिप्तातामस्यात्राजरीतिका का
कतुंडीतुकृष्णास्यानासौसैन्याविजानता २ कांस्यंचद्विविधंप्रोक्तंपुष्पंतैलिकभेदतः पुष्पंश्वेततमंतत्रतैलिकंकपिशाप्रभं ३ एतयो:
प्रथमश्रेष्ठंसंसेव्यंरोगशांतये राजरीतिस्तथाघोषंताम्रवच्छोधयेद्भिषक् ताम्रवन्मारणंचापितयोरुक्तंभिषग्वरः रीतिकायुग
लंरूक्षंसतिक्तलवणंरसं शोधनंपांडुरोगघ्नंकृमिघ्नंलेखनंहिमं ५ कांस्यंकषायंतिक्तोष्णंलेखनंविशदंसरं रूक्षंगुरुचचक्षुष्यं
कफपित्तहरंसरं ६ इतिरीतिकांस्यमारणगुणाः अथलोहं मुंडंतीक्ष्णंतथाकांतमितिलोहंत्रिधास्मृतं मुंडाच्छताधिकंतीक्ष्णं
तीक्ष्णात्कांतंशताधिकं १ मुंडंतुवर्तुलंस्निग्धंपर्वतेषुचजायते गजवल्यादितीक्ष्णंस्यात्कांतंचुंबकसंभवं २ यत्रांगंदृश्यतेलोहंतीं
क्ष्णंलोहंतदुत्तमं कासीसायककल्कान्केलोहगंदृश्यतेसुखं ३ अथकांतलक्षणं यत्पात्रस्थःप्रसरतिजलेतैलबिंदुर्नदत्तोहिंगुर्गं
धंविसृजतिनिजंतिक्ततांनिंबकल्कः पाच्यंदुग्धंभवतिशिखराकारकंनैतिभूमिंदग्धांगास्युःसजलचणकाःकांतलोहंतदुक्तं
१ अथशोधनं शरारकेनसंलिप्तंकिंचार्कपयसायसः दलंकृत्वाशनैध्मातंसिक्तंत्रैफलवारिणा १ एवंत्रिशःकृतेलोहंसु
श्रिमाप्नोत्यसंशयं अन्यच्च क्वाथ्यमष्टगुणेतोयेत्रिफलाषोडशंपलं तत्क्वाथेपादशेषेतुलोहस्यपलपंचकं कृत्वाप्तप्ताणितप्तानि
सप्तवारंनिषेचयेत् एवंप्रलीयतेधातुर्गिरिजोलोहसंभवः इतिशोधं अथमारणं लोहानांमारणंश्रेष्ठंसर्वेषांरसभस्मना
मध्यमंमूलिकाभिश्चकनिष्ठंगंधकादिभिः १ शुद्धस्यसूतराजस्यभागोभागद्वयंबलिं द्वयोःसमंसारचूर्णंमर्दयेत्कन्यकांबुना
यामद्वयंततस्यगोलंसंवेष्टयेरंडजैर्दलैः ततःसूत्रेणसंबध्यस्थापयेत्ताम्रसंपुटे ३ मुद्रयेद्वदनंतस्यमृदासंशोष्यतत्पुनः त्रिदि
नंधान्यराशिस्थंततउध्दृत्यमर्दयेत् ४ रजस्तद्वस्त्रगलितंनीरेतरतिहंसवत् सोमामृताभिदमिदंलोहभस्मप्रकीर्तितं ५
अन्यच्च लोहचूर्णपलंखल्वेसोरकस्यपलंतथा अश्वगंधापलंचापिसर्वमेकत्रमर्दयेत् कुमार्याद्विदिनंपश्चाद्गोलंकृत्वापत्रकैः २०

43
1936

संवेष्ट्यचमृदालिप्त्वापुटेगजपुटेपचेत् २ स्वांगशीतंसमुध्दृत्यसिंदूराभमयोरजः मृतंवारितरंग्राह्यंसर्वकार्यकरंपरं ३ अन्यच्च दाडि
मीपत्ररसेलोहचूर्णंचभावितं आतपेसप्तधातेनपुनर्गजपुटद्वयं इत्थंकृतंचतद्भस्मशुध्दंवारितरंभवेत् योजयेत्सर्वरोगेषुसत्यंगुरुव
चोयथा २ अन्यच्च गृहीत्वातीक्ष्णजंचूर्णंतथैवकणवाद्वधि एकत्रकास्येद्वांडेयावच्छोषत्वमाप्नुयात् १ उध्दृत्यगालयेत्तोत्रिफलायाः
पुटत्रयं देयंवारितरंसद्योजायतेनात्रसंशयः २ अन्यच्च एकभागंलोहचूर्णंतत्समोनवसागरः किंचित्तमोदकंग्राह्यंसर्वंवस्त्रेणिब
ध्यच १ यामांतंघर्षयेत्पाणौसद्योवारितरंभवेत् योजयेत्सर्वयोगेषुसर्वरोगापनुत्तये २ अथनिरुत्थानं सर्वमेतन्मृतंलोहंध्मातव्यंमित्रपं
चकैः इत्थंवस्यान्निरुत्थानंसेव्यंवारितरंभवेत् १ पंचमित्रंयथा मधुगुडघृतगुंजाटंकणंपंचमित्रकं रक्तिकाघृतलाक्षयायुतंक्षौद्रमि
श्रितंटंकणान्वितं ऊर्णयातथाध्मातंतागताःसप्तधातवोप्तांतिजीवति इत्येवं गंधकंशोधितंलोहतुल्यंखल्वेविमर्दयेत् दिनैकंकन्यका
द्रावैरुध्वागजपुटेपचेत् इत्येवंसर्वलोहानांकर्तव्यंतंनिरुत्थितं अथगुणाः कांतंतुशीतंमधुरंकषायमायुःकरंधातुविवर्धनंच हन्या
त्रिदोषंव्रणमेहकुष्टप्लीहोदरग्रंथिविषक्रिमींश्च १ पांडुंपीडयतिक्षयंक्षपयतिसैष्प्यंक्षिणोतिक्षणात् कासंनाशयतिभ्रमंभ्रमयति
श्लेष्मामयानवादति अस्रंगुल्ममसृक्शूलपीनसवमीश्वासप्रमेहारुचिराश्वन्मूलयतिप्रकंपनहरंलोहंहिमंचाक्षयं २ शुध्दपित्तकफानि
लमोहहंतिहितंशिवशक्त्यालोह पांडुगदामयशूलविनाशुप्रोक्तमुशुद्धंरोगविकाशि ३ येगुणाम्तरूपस्यतेगुणाकांतभस्मतः
कांताभावेप्रदातव्यंरूप्यमित्याहभैरवः ४ कूष्मांडंतिलतैलंचमाषान्नंराजिकातथा मद्यमम्लरसंचैवत्यजेल्लोहस्यसेवकः मत्स्यजी
वकवार्ताकमाषचकारवेल्लकं व्यापामतीक्ष्णकंसघस्तैलाम्लंदूरतस्त्यजेत् १ अथानुपानानि वल्लंवल्लार्धमानंचयथायोगेनयोज
येत् त्रिफलालोहचूर्णंतुवलीपलितनाशनं व्योषंभार्ङ्गीमधुनालोहंधातुरुजापहं कज्जलीमधुकृष्णाभ्यांश्लेष्मरोगनिवारणं शर्क
रात्त्रचतुर्जातंरक्तपित्तरुजापहं पुनर्नवाचगोक्षीरैर्बलवृद्धिकरंपरं पुनर्नवारसेनैवपांडुरोगनिषूदनं हरिद्रालोहचूर्णंतुपिप्पलीम
धुनासह विंशतिंचप्रमेहानांनाशयेन्नात्रसंशयः ६ शिलाजतुसमायुक्तंमूत्ररुक्कृनिवारणं वासकःपिप्पलीद्राक्षालोहंचमधु
नासह ७ गुटिकांभक्षयेत्तानःपंचकासनिवारणां तांबूलेनसमायुक्तंभक्षयेल्लोहमुत्तमं अग्निदीप्तिकरंवृष्यंदेहकांतिविवर्धनं

किमत्रबहुनोक्तेनदेहलोहकरंमतं ९ अल्पौषधैस्तोकपुटैर्हीनगंधकपारदैः अपक्वलोहमेचूर्णमायुःक्षयकरंनृणां इतिलोहं अथमंडू
रकरणं शताब्दमुत्तमंकीटंमध्यंचाशीतिवार्षिकं अधमंषष्टिवर्षीयंततोहीनंविषोपमं १ अक्षांगारैर्धमेत्किट्टंलोहजंतन्नवांजलैः सेचयेत्
दग्धपात्रांतः सप्तवारंपुनःपुनः चूर्णयित्वाततःकाथेद्विगुणेस्त्रिफलोद्भवैः आलोड्यभर्जयेद्वह्नौमंडूरंजायतेवरं २ मंडूरंशिशिरंरुच्यं
पांडुश्वयथुशोषजित् हलीमकंकामलांचप्लीहंचकुंभकामलां २ इतिमंडूरं अथवंगं खुरकंमिश्रकंचेतिद्विविधंवंगमुच्यते खुरंतत्रगु
णैःश्रेष्ठंमिश्रकंनाहितंमतं १ धवलंमृदुलंस्निग्धंद्रुतद्रावंसगौरवं निःशब्दंखुरवंगंस्यान्मिश्रकंश्यामशुभ्रकं २ अथवंगशोधनं द्राव
यित्वानिशायुक्तेक्षिप्तंनिर्गुंडिकारसे विशुध्यतिनिवारेणखुरवंगंनसंशयः १ अथमारणं शाणमात्रोभवेद्वंगोभुजंगोरक्तिकामितः
खर्परेगालितंसर्वंलोहदर्व्याविघर्षयेत् १ प्रहराज्जायतेभस्मभिन्नकज्जलसंनिभं शक्कुतांयातितद्भस्मतीव्रंखर्परवह्निना २ अन्यच्च
पलाशद्रवयुक्तेनवंगपत्राणिलेपयेत् तालेनपुटितंभस्मत्रिवारंजायतेध्रुवं अन्यच्च भल्लाततैलसंलिप्तंवंगंवस्त्रेणवेष्टितं चिंचापिप्प
लाश्वकाष्ठाग्नौयातिपंचतां अन्यच्च मत्स्याक्षीद्रवितेवंगेचिंचाश्वत्थत्वचोरजः क्षिप्त्वाक्षिप्त्वाचतुर्थांशंलोहदर्व्याप्रचालयेत् २ ततो
द्वियाममात्रेणवंगभस्मप्रजायते अथभस्मसमंतालंक्षिप्त्वाम्लेनप्रमर्दयेत् ततोगजपुटेपक्त्वापुनरम्लेनमर्दयेत् तालेनदशमांशेन
याममेकंततोपुटेत् ३ एवंदशपुटैःपक्वोवंगस्तुम्रियतेध्रुवं अथगुणाः वंगंतिक्तोष्णकंरूक्षंईषद्वातप्रकोपनं मेहश्लेष्मामयघ्नं
चमेदोघ्नंकृमिनाशनं १ अशुद्धंमृतंवंगंप्रमेहादिगदप्रदं गुल्महृद्रोगशूलार्शःकासश्वासवमिप्रदं २ इतिवंगं अथनागं द्रुतद्रा
वंमहाभारंछेदेकृष्णसमुज्वलं पूतिगंधंबहिःकृष्णंशुद्धंसीसमतोन्यथा नागशोधनं नागोद्वलोग्निसंयोगाद्रविदुग्धेनिपातितः स
छिद्रहंडिकासंस्थेत्रिवारंशुद्धिमाप्नुयात् अथमारणं अश्वत्थचिंचात्वक्भस्मनागस्यचतुरंशतः क्षिपेन्नागंपचेत्पात्रेचालयेल्लोह
दारुणा १ यामाद्भस्मनदुग्धत्यभस्मतुल्यामनःशिला जंबीरीरसनालेवापिष्ट्वारुध्वापुटेपचेत् स्वांगशीत्यंपुनःपिष्ट्वाशिलांशाशि
लायुतं आम्लेनैवतुयामैकंपूर्ववत्पाचयेत्पुटे ३ एवंषष्टिपुटैःपक्वोनागस्यात्सनिरुत्थितः अन्यच्च मनःशिलागंधयुतारुषपारि
लुतंनागदलंविमृष्टं पुटैस्त्रिभिःकुंभमितैःप्रयातिभस्मत्वमेतत्प्रवदंतितज्ञाः १ अन्यच्च तांबूलीरससंपिष्टशिलालेपात्पुनःपुनः २१

45
1936

द्वात्रिंशद्भिःपुटैर्नागोनिरुत्थोजायतेध्रुवं १ अथगुणाः अम्लुष्णंसीसकंस्निग्धंतिक्तंवातकफापहं प्रमेहनोपदोषघ्नंदीपनंचामवातनुत् १
अशुद्धःकुरुतेनागःप्रमेहक्षयकामलाः तस्मात्संशुद्धएवायंमारणीयोभिषग्वरैः २ इतिनागः अथोपधातवः अभ्रकंमाक्षिकंतालं
शिलानीलांजनंतथा तुत्थंरसकंचैवप्रोक्ताःसप्तोपधातवः अथाभ्रकं शुक्लंरक्तंतथापीतंकृष्णंचैवयथाक्रमं पिनाकंदर्दुरंनागंवज्रंचेति
चतुर्विधं १ दलानिमुंचत्यनिलेपिनाकंभेकस्वरावंकुरुतेनदर्दुरं फूत्कारशब्दंभुजगःकरोतिअविक्रियंवह्निगतंसुवज्रं २ पिनाकंकुरुतेकु
ष्टंदुर्दरंमृत्युदायकं नागंभगंदरंकुर्याद्वज्राभगंदरंदजित् ३ अथाभ्रकशोधनं प्रतप्तंसप्तवाराणिनिक्षिप्तंकांजिकेभ्रकं निर्दोषंजायतेन्न
नंप्रक्षिप्तंवापिगोजले १ त्रिफलाक्वथितेवापिगवांदुग्धेविशोधनः अन्यच्च कृष्णाभ्रकंधमेद्वह्नौततःक्षीरेविनिक्षिपेत् भिन्नपत्रंततःकृ
त्वातंडुलीयाम्लयोर्द्रवैः १ भावयेदष्टयामंतुएवंशुध्यतिचाभ्रकं अथधान्याभ्रकं पादांशंशालिसंयुक्तमभ्रंबध्वादिकंबले त्रिरा
त्रंस्थापयेन्नीरेतत्क्लिन्नंमर्दयेत्करैः १ कंबलाद्गलितंसूक्ष्मंवालुकासद्दशंचयत् तद्धान्याभ्रमितिप्रोक्तमभ्रमारणसिद्धये २ अथमा
रणं कृत्वाधान्याभ्रकंतच्चशोधयित्वाचमर्दयेत् अर्कक्षीरैर्दिनंखल्वेचक्राकारंचकारयेत् वेष्टयेदर्कपत्रैश्चसम्यग्गजपुटेपचेत् पुन
र्मर्द्यंपुनःपाच्यंसप्तवारात्पुनःपुनः २ ततोवटजटाक्वाथैस्तद्वद्देयंपुटत्रयं म्रियतेनात्रसंदेहःसर्वरोगेषुयोजयेत् ३ तुल्यंघृतंमृता
भ्रेणलोहपात्रेविपाचयेत् घृतेजीर्णेतदभ्रंतुसर्वरोगेषुयोजयेत् ४ धान्याभ्रकंरविक्षीरैःरविमूलद्रवेणवा पिष्ट्वापिष्ट्वापचेत्सा
कात्सप्तधाम्रियतेभ्रकः ५ अन्यच्च धान्याभ्रंमेघनादैःकदलिघनजलैश्चकणांकोलतोयैः खल्वेसंमर्द्यगाढंतदनुगजपुटान्द्वा
दशैवंप्रदद्यात् मीनाक्षीशृंगतोयैस्त्रिफलजलयुतैर्मर्दयेत्सप्तवारंगंधंतुल्यंचदत्वासप्तगजपुटात्स्वतांयातिमेघः ११ अन्यच्च
दुग्धत्रयंकुमार्याश्चगजस्त्रंनरमूत्रकं वटशृंगमजारक्तमेभिरभ्रंसुमर्दितं १ शतधापुटितंभस्मजायतेपद्मरागवत् अन्यच्च धान्या
भ्रकंसमादायमुस्ताक्वाथैःपुटत्रयं तद्वत्पुनर्नवानीरैःकासमर्दरसैस्तथा नागवल्लीदलैःसर्पिक्षीरैर्देयंपृथक्पृथक् दिनेदिनेमर्द
यित्वाक्वाथैर्वटजटोद्भवैः दत्वापुटत्रयंपश्चात्त्रिपुटंमुसलीद्रवैः त्रिगोक्षुरकषायेणत्रिःपुटेद्वानरीरसैः मोचकंदरसैःपाच्यंत्रिवारं
कोकिलाक्षजैः रसैःपुटेत्ततोधेनुःक्षिरादेकंपुटंदद्युः २ दध्नाघृतेनमधुनासितयासितयातथा एकैकंपुटंदद्यादभ्रस्यैवंमृति

यो॰र॰ २२

भवेत् ४ अन्यच्च धान्याभ्रकस्यभागैकं द्वौभागौटंकणस्यच पिष्ट्वातदन्धमूषायांरुध्वातित्राग्निनापचेत् ५ स्वभावशीतलंचूर्णंसर्वरो
गेषुयोजयेत् इतिमारणं अथगुणाः निश्चंद्रिकंभवेत्तत्तु शरूयदेहेरसायनं सर्वंद्रविषवज्जेयंमृत्युरुक्च्याधरोमवत् १ वरांबुगोध
तंचाभ्रंकलाषट्टदिकसमांसकं मृद्वग्निनापचेल्लेह्यमन्तरीकरणात्विदं २ वेल्लव्योषसमन्वितंघृतयुतंवल्लोन्मितंसेवितंदिव्याभ्रं
क्षयपांडुरुग्ग्रहणिकाश्शूलामकोष्टामयान् अर्तिश्वासगदंप्रमेहरुचिरंकासामयंदुर्धरंमंदाग्निजठर व्यथांविजयतेस्वंहंति
सर्वामयान् १ गौरीतेजः परममन्तर्वातापित्तक्षयघ्नंप्रज्ञाबोधिप्रशमितजरंवृष्यमायुष्यमग्र्यंबल्यंस्निग्धंरुचिदमकफंदीपनं
सतिवीर्यंतत्तद्योगैः सकलगदहृच्छ्यांमस्तुतेंद्रवंधी २ क्षाराम्लंविदलंकोलंकर्कटीकारवेल्लकं वृंताकंचकरीरंचतैलंचाभ्रेविवर्जये
त् ३ अथाभ्रकानुपानानि अभ्रकंचनिशायुक्तंपिप्पलीमधुनासह विंशतिश्चप्रमेहानांनाशयेन्नात्रसंशयः १ अभ्रकंहेमसं
युक्तंक्षयरोगविनाशनं रौप्यहेमाभ्रकंचैवधातुवृद्धिकरंपरं २ अभ्रकंचहरीतक्यागुडेनसहयोजितं एलाशर्करयायुक्तंरक्तपित्त
विनाशनं ३ त्रिकटुत्रिफलाचैवचातुर्जातंसशर्करं मधुनालेहयेत्प्रातः क्षयपांडुविनाशनं एलागोक्षुरभूधात्रीशिलागव्येनमिश्रितं
५ प्रातःसंसेवनान्नित्यंमेहकृच्छ्रनिवारणं गुडूचीखंडसत्वाभ्यांमिश्रितंमेहनाशनं पिप्पलीमधुसंयुक्तंभ्रमजीर्णज्वरापहं ६
मधुत्रिफलयायुक्तंदृष्टिपुष्टिकरंमतं मूर्वासत्वयुतंव्योमव्रणानांचविनाशनं ७ गोक्षीरक्षीरकंदाभ्यांबलवृद्धिकरंपरं भल्लातकयु
तंव्योम आशोदोषनिवारणं ८ नागरंपौष्करंभार्ङीगगनंमधुनासह अश्वगंधायुतंखादेद्वातव्याधिनिवारणं ९ चातुर्जातं
सिताचाभ्रंपित्तरोगनिवारणं कट्फलंपिप्पलीक्षौद्रंश्लेष्मरोगनिवारणं १० सर्वक्षारयुतंचाभ्रमग्निवृद्धिकरंपरं मूत्राघातंमूत्र
कृच्छ्रं अश्मरीमपिनाशयेत् ११ विजयारससंयुक्तंशुक्रस्तंभकरंपरं लवंगमधुसंयुक्तंधातुवृद्धिकरंपरं १२ गोक्षीरशर्करायुक्तं
पित्तरोगविनाशनं अभ्रकंविधिसंयुक्तंपथ्ययोगेनयोजितं १३ वलीपलितनाशःस्याज्जीवेच्चशरदांशतं वेल्लव्योषसमन्वितं
घृतयुतंवल्लोन्मितंसेवितंदिव्याभ्रंक्षयपांडुसंग्रहणिकाश्शूलंचकुष्टामयं सर्वश्वासगदंप्रमेहरुचिरंकासामयंदुर्धरंमंदाग्निंजठर
व्यथांपरिहरेच्छेषामयान्निश्चितं १४ नातः परतरंकिंचिज्जरामृत्युविनाशनं इतिसहस्रपुटाभ्रकानुपानानि अथस्वर्ण २२

५७
१९३

[illegible stamp]

क्षिकं स्वर्णवर्णंगुरुस्निग्धंमीषन्नीलच्छविच्छटं कषेकनकवत्घृष्टंतद्वरंहेममाक्षिकं इतिमाक्षिकलक्षणानि अशुद्धंमाक्षिकंकुर्यादा
ध्मंकुष्टंक्षयंकृमीन् शोधनीयंप्रयत्नेनतस्मात्कनकमाक्षिकं १ अथशोधनं त्रिभागंमाक्षिकंग्राह्यंचतुर्थांशेनसैंधवं जंबीरजरसैर्वापि
बीजपूरद्रवैः पचेत् घर्षितंलोहपात्रेचयातिपात्रंचरक्तता ततः शुध्यत्वमायातिस्वर्णमाक्षिकमीरितं २ अन्यप्रकारः एरंडतैलतुंगांबु
सिक्तंशुध्यतिमाक्षिकं सिक्तंवाकदलीकंदतोयेनघटिकाद्वयं १ तप्तक्षिप्तंवराक्वाथेशुद्धिमायातिमाक्षिकं अन्यच्च अगस्तिपत्रनिर्यासैः
शिग्रुमूलंकल्केपेषितं तन्मध्येपुटितंशुध्यंनिंबुजाम्लेनपाचितं १ इतिशोधनं अथमारणं माक्षिकस्यचतुर्थांशंदत्वागंधंविमर्दयेत् २ रुबु
कस्यचतैलेनततः कार्पासचक्रिका शरावसंपुटेकृत्वापुटेद्गजपुटेनच धान्यस्यतुषमध्यस्थोदत्वाशीतंसमुद्धरेत् ३ सिंदुराभंभवेत्
भस्म माक्षिकस्यनसंशयः अन्यच्च अजाम्मूत्रेथवातैलेकषायेवाकुलित्थजे तक्रेवाघर्षितंपक्वंम्रियतेस्वर्णमाक्षिकं इतिमारणं अ
थगुणाः माक्षिकंतिक्तमधुरंमेहार्शःक्षयकुष्टनुत् कफपित्तहरंशीतंयोगवाहिरसायनं १ माक्षिकोरजतहाटकप्रभः शोधितोतिगुण
दः कसेवितः मेहशोफकृमिकुष्टपांडुतापस्मृतिर्हरतिसोद्भमरींजयेत् १ मंदानलत्वंबलहानिमुग्रांविष्टंभतामन्यगदांश्चकुष्टान् क
रोतिमालांत्रणप्रविकांचमाक्षिकंधातुर्गुरुरप्यपक्वः २ माक्षिकधातुः सकलामयघ्नः प्राणोरसेंद्रस्यपरंहिवृष्यः दुर्मेललोहद्वय
मेलकश्चगुणोत्तरः सर्वरसायनाग्र्यः ४ इतिस्वर्णमाक्षिकं अथतारमाक्षिकं कास्यवत्तारमाक्षिक्यंकषेघृष्टंतुरूप्यवत् गुरुस्नि
ग्धंसितंयत्रश्रेष्टंस्यात्तारमाक्षिकं १ स्वर्णमाक्षिकवद्दोषाविज्ञेयास्तारमाक्षिके अतस्तद्दोषशांत्यर्थंशोधनंकथ्यतेयथा २ शो
धनं कर्कोटिमेषश्रृंगीजैः रसैर्जंबीरजैर्दिनं आतपेभावनादेयाशुध्यंस्यात्तारमाक्षिकं इतिशुद्धिः अथतन्मारणं स्वर्णमाक्षिक
वज्ज्ञेयंतारमाक्षिकमारणं विमलायागुणाः किंचिन्न्यूनाकनकमाक्षिकात् १ इत्यादि अथतालकविधिः अशुद्धंतालमायुर्घ्नं
कफमारुतमेहकृत् तापस्फोटांगसंकोचान्कुरुतेतेनशोधयेत् अथशोधनं तालकंकणशः कृत्वातच्चूर्णंकांजिकेक्षिपेत् दोला
यंत्रेणयामैकंततः कूष्मांडद्रवैः १ तिलतैलेपचेद्यामंयामंचत्रिफलाजलैः चूर्णोदकेचयामैकंपक्वंशुध्यतितालकं २ मारणं
सदलंतालकंशुद्धंपुनर्नव्यारसेनतु खल्वेविमर्दयेदेकंदिनंपश्चाद्विशोषयेत् १ संशोष्यगोलकंतस्यकुर्यात्तंचविशोषयेत् ततः

यो०७०
२२

भवेत् ४ अन्यच्च धान्याभ्रकस्यभागैकं द्वौभागौटंकणस्यच पिष्ट्वातदभ्रंस्थावारूधातिशाग्निनापचेत् ५ स्वभावशीतलंचूर्णसर्वरो
गेषुयोजयेत् इतिमारणं अथगुणाः निश्चंद्रिकंभवेत्तत्तुशरीरदेहेरसायनं सर्वद्वंद्वविषवर्ज्यंमृत्युकृच्छ्राद्रोगमवत् १ वराविगोघृ
तंचाभ्रंकलाषट्दिकसमांसकं मृद्वग्निनापचेद्वैद्यममृतीकरणंविदं २ वेल्लव्योषसमन्वितंघृतयुतंवल्लोन्मितंसेवितं दिव्याभ्रं
क्षयपांडुरुग्ग्रहणिकाश्लूलामकोष्टामयान् अर्तिश्वासगदंप्रमेहरुचिरंकासामयंदुर्धरंमंदाग्निजठर व्यथांविजयतेस्वंहंति
सर्वामयान् १ गौरीतेजः परममृतंवातापित्तक्षयघ्नंप्रज्ञाबोधिप्रशमितजरंवृष्यमायुष्यमग्र्यंबल्यंस्निग्धंरुचिदमकफंदीपनं
सतिवीर्यंतत्तद्योगैःसकलगदहृद्यामसत्तेंद्रवंधी २ क्षाराम्लंविदलंकोलंककटीकारवेल्लकं वृंताकंचकरीरंचतैलंचाभ्रेविवर्जये
त् ३ अथाभ्रकानुपानानि अभ्रकंचनिशायुक्तंपिप्पलीमधुनासह विंशतिश्चप्रमेहानांनाशयेन्नात्रसंशयः १ अभ्रकंहेमसं
युक्तंक्षयरोगविनाशनं रौप्यहेमाभ्रकंचैवधातुवृद्धिकरंपरं २ अभ्रकंचहरीतक्यागुडेनसहयोजितं एलाशर्करयायुक्तंरक्तपित्त
विनाशनं ३ त्रिकटुत्रिफलाचैवचातुर्जातंसशर्करं मधुनालेहयेत्प्रातः क्षयपांडुविनाशनं एलागोक्षुरधात्रीशिलाजत्वेनमिश्रितं
४ प्रातःसंसेवनान्नित्यंमेहकृच्छ्रनिवारणं गुडूचीखंडसत्वाभ्यांमिश्रितंमेहनाशनं पिप्पलीमधुसंयुक्तंभ्रमजीर्णज्वरापहं ६
मधुत्रिफलयायुक्तंदृष्टिपुष्टिकरंमतं मूर्वासत्वयुतंव्योमव्रणानांचविनाशनं ७ गोक्षीरक्षीरकंदाभ्यांबलवृद्धिकरंपरं भल्लातकयु
तंव्योम आर्शोदोषनिवारणं ८ नागरंपौष्करंभार्ङीगगनंमधुनासह अश्वगंधायुतंरवादेद्वातव्याधिनिवारणं ९ चातुर्जातं
सिताचाभ्रंपित्तरोगनिवारणं कट्फलंपिप्पलीक्षौद्रंश्लेष्मरोगनिवारणं १० सर्वक्षारयुतंचाभ्रमग्निवृद्धिकरंपरं मूत्राघातंमूत्र
कृच्छ्रम श्मरीमपिनाशयेत् ११ विजयारससंयुक्तंशुक्रस्तंभकरंपरं लवंगमधुसंयुक्तंधातुवृद्धिकरंपरं १२ गोक्षीरशर्करायुक्तं
पित्तरोगविनाशनं अभ्रकंविधिसंयुक्तंपथ्ययोगेनयोजितं १३ वलीपलितनाशंस्याज्जीवेच्छरदांशतं वेल्लव्योषसमन्वितं
घृतयुतंवल्लोन्मितंसेवितंदिव्याभ्रंक्षयपांडुसंग्रहणिकाश्लूलंचकुष्टामयं सर्वश्वासगदंप्रमेहरुचिरंकासामयंदुर्धरंमंदाग्निंजठर
व्यथांपरिहरेत्पापामयान्निश्चितं १४ नातः परतरंकिंचिज्जरामृत्युविनाशनं इतिसहस्रपुटाभ्रकानुपानानि अथस्वर्ण २२

47
1936

क्षिकं स्वर्णवर्णंगुरुस्निग्धंमीषन्नीलंछविश्छटं कषेकनकवत्घृष्टंतद्वरंहेममाक्षिकं इतिमाक्षिकलक्षणानि अशुद्धंमाक्षिकंकुर्यात्
ध्मंकुष्टंक्षयंकृमीन् शोधनीयंप्रयत्नेनतस्मात्कनकमाक्षिकं १ अथशोधनं त्रिभागंमाक्षिकंग्राह्यंचतुर्थांशेनसैंधवं जंबीरजरसैर्वापि
बीजपूरद्रवैःपचेत् घर्षितंलोहपात्रेचयावत्तिपात्रंचरक्तता ततःशुध्यत्यमायातिस्वर्णमाक्षिकमीरितं २ अन्यप्रकारः एरंडतैललुंगांबु
सिक्तंशुध्यतिमाक्षिकं सिक्तंवाकदलीकंदतोयेनघटिकाद्वयं १ तप्तक्षिप्तंवराक्वाथेशुध्यमायातिमाक्षिकं अन्यच्च अगस्तिपत्रनिर्यासैः
शिग्रुमूलंस्कपेषितं तन्मध्येपुटितंशुध्यंनिंबुजाम्लेनपाचितं १ इतिशोधनं अथमारणं माक्षिकस्यचतुर्थांशंदत्वागंधंविमर्दयेत् २ रुबु
कस्यचतैलेनततःकार्यास्तुचक्रिका शरावसंपुटेकृत्वापुटेद्गजपुटेनच धान्यस्यतुषमध्येधौदत्वाशीतंसमुद्धरेत् २ सिंदुराभंभवेत्
भस्म माक्षिकस्यनसंशयः अन्यच्च अजामूत्रेथवातैलेकषायेवाकुलित्थजे तक्रेवाघर्षितंपक्वंम्रियतेस्वर्णमाक्षिकं इतिमारणं अ
थगुणाः माक्षिकंतिक्तमधुरंमेहार्शःक्षयकुष्टनुत् कफपित्तहरंशीतंयोगवाहिरसायनं १ माक्षिकोरजतहाटकप्रभःशोधितोतिगुण
दःफसेवितः मेहशोफकृमिकुष्टपांडुतापस्मृतिहरतिसोचमरीजयेत् १ मंदानलत्वंबलहानिमुग्रांविष्टंभतामन्यगदांश्चकुष्टान् क
रोतिमालांव्रणपूर्विकांचमाक्षिकंधातुर्गुरुरप्यपक्वः २ माक्षिकधातुःसकलामयघ्नःप्राणोरसेंद्रस्यपरंहिवृष्यः दुर्मेललोहद्वय
मेलकश्चगुणोत्तरःसर्वरसायनाग्र्यः ४ इतिस्वर्णमाक्षिकं अथतारमाक्षिकं कास्यवत्तारमाक्षिकंयंकषेघृष्टंतुरूप्यवत् गुरुस्नि
ग्धंसितंयत्रश्रेष्ठंस्यात्तारमाक्षिकं १ स्वर्णमाक्षिकवद्दोषाविज्ञेयास्तारमाक्षिके अतस्तद्दोषशांत्यर्थंशोधनंकथ्यतेयथा २ शो
धनं कर्कोटिमेषशृंगिजैः रसैर्जंबीरजैर्दिनं आतपेभावनादेयाशुध्यंस्यात्तारमाक्षिकं इतिशुद्धिः अथतन्मारणं स्वर्णमाक्षिक
वज्ज्ञेयंतारमाक्षिकमारणं विमलायागुणाःकिंचिन्न्यूनाकनकमाक्षिकात् १ इत्यादि अथतालकविधिः अशुद्धंतालमायुर्घ्नं
कफमारुतमेहकृत् तापस्फोटांगसंकोचान्कुरुतेतेनशोधयेत् अथशोधनं तालकंकणशःकृत्वातच्चूर्णंकांजिकेक्षिपेत् दोला
यंत्रेणयामैकंततःकूष्मांडद्रवैःपचेत् १ तिलतैलेपचेद्यामंयामंचत्रिफलाजले चूर्णोदकेचयामैकंपक्वंशुध्यतितालकं २ मारणं
सदलंतालकंशुध्यंपुनर्नव्यारसेनतु खल्वेविमर्दयेदेकंदिनंपश्चाद्विशोषयेत् १ संशोष्यगोलकंतस्यकुर्यात्तच्चविशोषयेत् ततः

पुनर्नवासोरैः शाल्यार्धंतुप्रपूरयेत् २ तत्रतद्गोलकंधृत्वापुनस्तैनैवपूरयेत् आकंठंपीठरंतस्यपिधानंधारयेन्मुखे ३ शालीचूल्यांसमा
रोप्यक्रमाद्वह्निंविवर्धयेत् दिनान्यंतरमष्टान्यानिपंचवह्निंप्रदीपयेत् एवंतुश्रियतेतालंमात्रातस्यैकरक्तिका अनुपानान्यनेकानियथायोग्यंप्रयोज
येत् अथगुणाः हरितालंकटुस्निग्धंकषायोष्णंहरेद्विषं कंडूकुष्ठास्यरोगास्त्रवातपित्तकफव्रणात् १ तालकंहरतेरोगान्कुष्ठमृत्युजरापहं
शोधितंकुरुतेवीर्यंकांतिवृद्धिंतथायुषः इत्यादि अथमनःशिला मनःशिलामंदबलंकरोतिजंतूनध्रुवंशोधनमंतरेण मलस्यबंधंकि
लमूत्ररोगंसशर्करंकृच्छ्रगदंचकुर्यात् १ अथतच्छोधनविधिः पचेत्त्र्यहमजामूत्रेदोलायंत्रेमनःशिला भावयेत्सप्तधामूत्रैरजायाःशु
ध्यिमृच्छति अन्यच्च अगस्तिपत्रतोयेनभाविता सप्तवारकं शृंगवेररसोवापिविशुध्यतिमनःशिला १ अथगुणाः मनःशिलागुरुर्वर्ण्या
सरोष्णलेखनीकटुः तिक्तास्निग्धाविषश्वासकासभूतविषास्त्रनुत् इतिमनःशिला अथस्रोतांजनं स्रोतांजनंद्विधाप्रोक्तंस्वनल
कमभेदतः त्रिफलावारिणास्वेद्यंतद्द्वयंशुद्धिमृच्छति अथतद्गुणाः सौवीरंयाहिमधुरंचक्षुष्यंकफपित्तजित् हिध्माक्षयास्त्रनुद्धीतंस्रो
तांजनमपीदृशं १ अथतुत्थं विष्ठयामर्दयेत्तुत्थंमार्जारककपोतयोः दशांशंटंकणंदत्वापचेल्लघुपुटेनतः १ पुटंदध्नापुटंक्षौद्रैर्देयं
तुत्थंविशुध्यति अन्यच्च ओतोर्विशांशसमंतुत्थंसक्षौद्रंटंकणान्वितम् त्रिधैवंपुटितंशुद्धंवांतिभ्रांतिविवर्जितं १ अथगुणाः तुत्थ
कंकटुकंक्षारंकषायंविशदंलघु लेखनंभेदिचक्षुष्यंकंडूकृमिविषापहं १ कफास्रकुष्ठपित्तघ्नंमेहमेदोविनाशनं इतितुत्थं अ
थखर्परं नृमूत्रेवाथगोमूत्रेसप्ताहंरसकंपचेत् दोलायंत्रेणशुद्धःस्यात्ततःकार्येषुयोजयेत् १ खर्परंकटुकंक्षारंकषायंवामकंलघु
लेखनंभेदनंशीतंचक्षुष्यंकफपित्तनुत् २ विषास्रकुष्ठकंडूनांनाशनंपरमंमतं इतिधातूपधातुशोधनमारणगुणाः अथ
पारदः रसोविप्रःसितोरक्तःक्षत्रियःपीतउरुजः शूद्रःकृष्णइतिप्रोक्तोवर्णभेदाच्चतुर्विधः १ ब्राह्मणःकल्पनेकल्प्योगुटिका
यांचबाहुजः धातुवादेतथावैश्यःशूद्रश्चेलरकर्मणि १ अतःसुनीलोबहिरुज्वलांगोमध्याह्नचंद्रप्रतिमप्रकाशः शस्तोथधूम्रः
परिपांडुरश्चचित्रोनयोज्योरसकर्मसिद्ध्यै ३ पूर्वदोषारसेंद्रस्यपंचप्रोक्तामनीषिभिः तेषांदोषप्रशांत्यर्थंप्रोच्यतेकर्मसांप्रतं ४
तद्यथा मलशिखिविषनामानोरसस्यनैसर्गिकास्त्रयोदोषाः मूर्छांमलेनकुरुतेशिखिनादाहंविषेणमृत्युंच ५ अन्यच्च मलेन २२

49
1736

मूर्छांदहनेनदाहंविषेणमृत्युंवितनोतिसूतः मलादिदोषत्रयमेतदस्तिनैसर्गिकंशुद्धिमतोविदार्ये ६ नागोवंगोमलोवह्निश्चांचल्यंचगिरि
विषं पारदेकंचुकाःसप्तसंतिनैसर्गिकाइमे ७ रक्तेष्टिकाशौनिधूमराशोर्णाभस्मचूर्णकः जंबीरद्रवसंयुक्तेनागदोषापनुत्तये ८ वि
शालांकोलमूलेनरजसाकांजिकेनच शनैःशनैश्चहस्तेनवंगदोषविमुक्तये ९ राजवृक्षस्यमूलंचचूर्णेनसहकन्यया मलदोषापनुत्यर्थं
चित्रकोवह्निदूषणं १० चांचल्यंकृष्णधत्तूरोगिरिंहंतिकटुत्रयं त्रिफलाविषनाशाय कन्यकासप्तकंचुकः ११ अथान्यप्रकारः आ
रग्वधोहंतिमलंप्रयत्नात्कुमारिकासप्तहिकंचुकाश्च आंकोलमूलंचविषंनिहन्याद्रसस्यवह्निःकिलपावकंच १ प्रत्येकंसप्तवारं
मर्दितःपारदोभवेत् तदाविशुद्धतांयातिसर्वयोगार्हितोभवेत् २ अन्यच्च कुमारीत्रिफलाव्योषचित्रकंनिंबुकंरसं दिनैकंमर्द्य
धृत्वाशुद्धोभवतिपारदः १ अन्यच्च आरनालेनचोष्णेनक्षालयेत्ततिमर्दयेत् रसंतत्रप्रयातंतुशोषयित्वोर्ध्वपातयेत् १॥ गृहीत्वा
प्रक्षिपेत्कतेस्यादेवंपारदःशुचिः पारदात्षोडशांशंतुमिलित्वासकलैर्भिषक् चूर्णंप्रदेयंचपलंमर्दनेतप्तखल्वके आजाशकृत्तुषाग्नि
चखनित्वाभूमिमावपेत् तस्योपरिस्थितंखल्वंतप्तखल्वंजगुर्बुधाः एतन्मर्दनमाख्यातंरससंशुद्धयेबुधैः ४ इतिमर्दनं त्र्यूषणं
त्रिफलावंध्याकंदक्षुद्राद्वयान्वितः चित्रकोणमिश्राक्षारकन्यार्ककनकद्रवैः ५ सूतंकलेनकाथेनवारान्सप्तविमूर्छयेत् इत्सं
मूर्छितःसूतोजहेत्सप्तापिकंचुकान् इतिमूर्छनं अथउत्थापनं ततउत्थापयेत्सूतमातपेनिंबुकार्दितं उत्थापनंविशिष्टंतुच
र्णपातनयंत्रके १ धृत्वाग्नौउर्ध्वभांडांतेसंग्रहेत्पारदःशुचिः इत्युत्थापनं अथस्वेदनं रसंचतुर्गुणेवस्त्रेसरसोनशरावके निय
म्यदोलायंत्रेतुप्रकल्प्यदिवसंपचेत् १ सव्योषत्रिफलावह्निकन्याकल्केतुषांबुनि शेषदोषापनुत्यर्थमिदंस्वेदनमीरितं २ इतिस्वे
दनं पलादूनस्यसूतस्यशातपल्याधिकस्यच नसंस्कारःप्रकर्तव्यःसंस्कारःस्यात्ततोपरः १ शुभेहनिप्रकर्तव्यमारंभंरसशोधने
एकांतेसद्मनिशुभेपुराभ्यर्च्योद्विभैरवः इतिरसशोधनं अथगुणाः सूतोशुद्धतयागुणंनकुरुतेकुष्ठाग्निमांद्यकृमीछर्द्यारोचक
जाड्यदाहमरणंधत्तेनृणांसेवनात् शुद्धस्यात्सकलामयौघशमनोयोयोगवाहोमृतोसुक्त्यापङ्गुणगंधयुग्गदहरोयोगेनधात्वा
दियुक् १ मूर्छितोगदहतथैवखगतिंदत्तेनिबद्धोर्थदस्तद्भस्मामयबाधकादिहरणंदकृपुष्टिकांतिप्रदं दृष्यंमृत्युविनाशनंबल

करंकांताजनानंददंशाइलातुलसत्वकतक्रमभुजांयोगानुसारीस्फुटं १ मूर्छित्वाहरतिरुजंबंधनमनुभूयमुक्तिदोभवति अमरीकरोति
म्हत: कोन्य: करुणाकर: सूतात् २ अन्यच्च मूर्छांगतोयोहरतेचरोगान्बद्धोयदाखेचरतामुपैति लीनोभवेत्सर्वसमृधिदायीवि
राजतेसौनितरांरसेंद्र: अर्था: सहायानिखिलंचशास्त्रंहस्तक्रियाकर्मणिकौशलंच नित्योद्यमस्तत्परताचवह्विरेभिर्गुणैस्सि
ध्यतिसूतकेंद्र: ४ अथवादरदाकृष्टंस्विन्नंलवणांबुभाजिदोलयां रसमादायथेच्छंकर्त्तव्यस्तेनभैषयोजोग: ५ निंबूरसेनसं
पिष्टंप्रहरंदरदंदृढं ऊर्ध्वपातनयंत्रेणसंग्राह्योनिर्मलोरस: इतिदरदाद्रसकृष्टि: अथरसस्यमुखकरणं अथषड्बिंदुकीटैश्चस
सोमर्दयस्त्रिवासरं लवणाम्लैर्मुखंतस्यजायतेधातुभक्षकं १ अन्यच्च सास्थोरसस्यात्सदुशिग्रुतुच्छै: सराजिकै: शोषणकैस्त्रिवारं
पिष्टस्तत: स्विन्नतनु: सुवर्णमुखानयंखादतिसर्वधातून् १ इतिमुखकरणं अथषड्गुणगंधकजारणं तमरवल्वेरसंक्षिप्त्वाअध
शुल्वास्तुषाग्निभि: स्तोकंस्तोकंक्षिपेद्गंधमेवंवैषड्गुणंचरेत् अथवाकच्छपयंत्रेणगंधकजारणं मृत्कुंडेनिक्षिपेन्नीरंतन्मध्ये
चशरावकं मृत्कुंडेचपिधानाभंमध्येमेखलयायुतं १ क्षिप्त्वाचमेखलामध्येसंशुद्धंरसमुत्तमं रसस्योपरिगंधस्यरजोद
द्यात्समांशकं २ दत्वोपरिशरावंचभस्ममुद्रांप्रदापयेत् तस्योपरिपुटंदद्याच्चतुर्भिर्गोमयोपलै: एवंपुन: पुनर्गंधषड्
गुणंजीर्यतेबुधै: गंधजीर्णेभवेत्सूतस्तीक्ष्णाग्नि: सर्वकर्मसु ४ इतिगंधकजारणं तद्गुणा: समेगंधेतुरोगघ्नोद्विगुणंराज
यक्ष्मनुत् जीर्णंतुत्रिगुणेगंधेकामिनीदर्पनाशन: चतुर्गुणेतुतेजस्वीसर्वशास्त्रविशारद: भवेत्पंचगुणेसिद्ध: षड्गुणेमृत्यु
नाशन: इतिषड्गुणगंधकजारणं दिनमेकंरसेंद्रस्ययोददातिकृताशने द्रवंतितस्यपापानिकुर्वन्नपिनलिप्यते १ इतिशिरा
गमोक्तं अथरसबंधनं रंभावीरस्नुहीचैवक्षीरकंचुकिरेवच दिनारिचैवगोरभामीनाक्षीकाचमाचिका १ एभिस्तुमर्दितो
सूतोपुनर्जन्मोनविद्यते टीका कदलीकंद १॥ श्वेतकणेर १ निवडुंगचीक १ दुधाणी १ रक्तपुनर्नवा १॥ शिवलिंगी १ हो
नगुदा १ कांगाणी १ इत्यादि अन्यच्च भूलताशाल्मलीमूलंवारिणामर्दयेद्दृढं तन्मूषांलेपयेन्मध्येतन्मध्येनिक्षिपेद्रसं १
पंचटंकप्रमाणंतुमूषामंगारकेक्षिपेत् एवंबद्धोभवेत्सूतोमूषांलग्नोदृढोभवेत् २ मुखमध्यगतश्चैवमुखरोगविनाशन: २४

51
1936

शरीरेकामितेसूतेजरापलितजिन्नर: ४ स्तंभयेच्छुक्रसंघातेकामोत्सादनकारक: पुनर्नववय: कुर्यात्साधकानांनसंशय: ५ इतिरस
बंधनं अथरसमारणं अपामार्गस्यबीजानिमूषायुग्मंप्रकल्पयेत् तत्संपुटेन्यसेत्सूतंमलयूदुग्धमिश्रितं द्रोणपुष्पीप्रसूनानिविडंगम
रिमेदक: एतच्चूर्णमधश्चोर्ध्वंदत्वामुद्रांप्रदीयते २ वंगोलंमुद्रयेत्सम्यक्मृण्मूषासंपुसुधी: मुद्रादत्वाशोषइत्वाततोगजपुटेपचेत् ए
वमेकपुटेनैवजायतेसूतभस्मकं २ अथरससिंदूर: पलद्वयंशुद्धरसंपलार्धंशुद्धगंधकं कर्षार्धंनवसारंचजंबीरेणविमर्दयेत् काच
कूप्यांक्षिपेच्चैनंसप्तधामृदपर्पटै: विलेप्यकाचकूपीतामातपेशोषयेद्दृढं छिद्रभांडेतत: कूपींन्यसेत्सिकतयंत्रके कूपिकाकंठमानेनरजयेदिष्ट
देवता: २ पंचप्रस्था: कुमार्यश्चतत: स्थल्यांविनिक्षिपेत् पचेद्यामाष्टकंचैवंकूपिकाचक्षणे ४ संशोध्यपाचयेद्यंत्रेस्वांगशीतंसमुद्धरेत् या
श्चंचदरदाकारंदेवदानवदुर्लभं ५ सेवयेद्रोगनाशायतत्तद्रोगानुपानत: वल्लंवावल्लयुग्मंवाकणयामधुनासह ६ सेवितंकामिनीकामद
र्पयेद्रतिकौतुकं वीर्यबंधकरंशीघ्रंयोषांमदविनाशनं ७ सिंदूरंहरवीर्यसंभवमिदंरूक्षाग्निमांद्यापहंयक्ष्मादिक्षयपांडुशोफकुदरंगुल्मप्र
मेहापहं शूलप्लीहखिनाशनंज्वरहरंदुष्टव्रणान्नाशयेत् अर्शांसिग्रहणीभगंदरहरंह्वदर्दिंत्रिदोषापहं ८ इतिरससिंदूर: अन्यच्च सूत:
पंचपल: स्वदोषरहितस्तत्तुल्यभागोबलिर्द्वौकर्षौनवसारपादकलितौसंमर्द्यकूप्यान्यसेत् तांयंत्रेसिकतारव्यकेनलविलेपकार्कयामंशितंभि
त्वाकुंकुमपिंजरंरसवरंभस्मादददेहेश्वराद् वातेसक्षौद्रपिप्पल्यपिचकफरुजिन्म्यूषणंसाग्निचूर्णं पित्तेसैलासितावाद्रुणवतिसहितानागराद्री
मृतांबु इत्थंसाज्यचिवाला हरन्मनपलाशाल्मलीपुष्पदंतंकिंवाकांतालताटाभरणरसपते: स्यादनुपानमेतत् २ अन्यच्च भागोरसस्यपंच
एकभागोगंधस्यमाष: पवनाशनस्य संमर्दयेगाढंसकलंसुभांडेतांकज्जलीकांचकृतेनिदध्यात् क्रमाग्निनात्रीणिपदिनानिपक्कातांवालुकायं
त्रगतांततस्यात् २ बंधूकपुष्पारुणमीशजस्यभस्मप्रयोज्यंचकिलामयेषु निजानुपानैर्मरणंजरांचहंत्यस्यवल्ल: क्रमसेवनेन ३ अपहर
निरोगवृंदंदृढयतिकायंमहद्बलंकुरुते शक्रशालानिचसतेसिंदूराख्योरस: पुंसां निखिलक्षयनक्षयदक्षतरंव्रणकुष्टभगंदरमेहहरम्
बलदीधितिशुक्रसमग्रकरंरसभस्मसमस्तगदापहरं अन्यच्च पलमात्रंरसंशुद्धंतावन्मात्रंतुगंधकं विधिवत्कज्जलींकृत्वान्यग्रोधांकुर
वारिणा १ भावनांत्रितयंदत्वास्थालीमध्येनिधापयेत् विधायकच्छपीयंत्रंवालुकाभि: प्रपूरयेत् २ दद्यात्तदनुमंदाग्निंभिषग्यामचतुष्टयं

आयतेरससिंदूरं तरुणारुणसंनिभं अनुपानविशेषेण करोति विविधान्गुणान् क्षयकुष्ठमरुत्पित्तमेहघ्नं पांडुनाशनं ४ अथ विशिष्टानुपानानि
यथाजलगतं तैलं तत्क्षणादेव सर्पति एवमौषधमंगेषु प्रसर्पत्यनुपानतः १ पिप्पलीमधुना सार्धं वातमेहं हिनस्ति च त्रिफलाशर्करासार्धं पित्तमेहहरः
स्मृतः २ पिप्पलीमरिचं शुंठी भार्गीं च मधुना सह कासश्वासप्रशमनो श्लेष्मस्य च विनाशनः ३ हरिद्राशर्करासार्धं रुधिरस्य विकारजित् सुपर्णं
त्रिफलावापिका मल्लापांडुमांद्यहृत् ४ पिप्पलीचित्रकं पथ्या तथा सौवर्चलं क्षिपेत् अग्निमांद्यं वस्थकोष्ठं दद्यथानाशनं परं ५ शिलाजतु तथैला
च सितोपलसमन्वितं मूत्रकृच्छ्रप्रशांत्यर्थं सत्यं नागार्जुनोदितं ६ लवंगं कुंकुमं पत्री हिंगुलं करहाटकं पिप्पली विजया चैव समानी मानिकास्ये
त ७ कर्पूरादहिफेनाच नागाद्भागार्धकं क्षिपेत् सर्वमेकत्र धातुवृद्ध्यै प्रदापयेत् ८ सौवर्चलं लवंगं च भूनिंबं च हरीतकी अस्यानुपानयोगेन सर्वज्व
रविनाशनः ९ तथा रेचकरः प्रोक्तः सौवर्चलफलत्रिकैः लवंगं कुंकुमं चैव दरदेन च संयुतं १० तांबूलेन समं भक्ष्यं धातुवृद्धिकरं परं ११ विदारी
चूर्णयुक्तेन धातुवृद्धिकरो मतः १२ विजयादीप्यसंयुक्तो वमनस्य विकारजित् सौवर्चलं हरिद्रा च विजयादीप्यकं तथा अनेनोदरपीडां च सद्यो
नाविनाशयेत् १४ चतुर्वल्लपलाशस्य बीजाद्द्विगुणं गुडात् अस्यानुपानयोगेन क्रिमिदोषविनाशनः १५ अहिफेनं लवंगं च दरदं विजया
तथा अस्यानुपानतः सद्यः सर्वातीसारनाशनः १६ सौवर्चलेन दीप्येन अग्निमांद्यहरः परं क्रोधजनकश्चैव सिद्धनागेश्वरोदितः १७
गुडूचीसत्वयोगेन सर्वपुष्टिकरः स्मृतः युक्तानुपानसहितः सर्वान्रोगान्विनाशयेत् १८ अथ रसेंद्रपथ्यानि सैंधवाम्लधान्याकजीर
कार्द्रकसंयुतं तंडुलीयकवार्ताकपटोलाशाकसाधितं गोधूमजीर्णशाल्यन्नगव्यं क्षीरं घृतं दधि हंसोदकं मुद्गरसं रसेंद्रे च हितं विदुः ग्रंथां
तरे अभ्यंगमालिनशौभे तैलनारायणादिभिः अबलाशीतनीरेण मस्तके परिसेचयेत् १ तद्वापानारिकेलांबु मुद्गयूषं सशर्करं द्राक्षा
दाडिमखर्जूरकदलीनां फलं भजेत् २ बृहतीबिल्वकूष्मांडवंशाग्रं कारवेल्लकं माषान्मसूरनिष्पावकुलित्थान्लवणं तिलान् ३ अ
नूपमांसं धान्याम्लं भोजनं कदलीदले कांस्यके गुडविष्टंभीनीक्ष्णांचोष्णं भृशं तथा अपथ्यं सूतराजस्य पुरा प्रोक्तं महर्षिभिः कूष्मांडं कर्क
टीकोलं कलिंगं करमर्दकं करीरं चैतिपक्वादीन्सभुग्वं वर्जयेज्जनः इत्यादि अथ गंधकः चतुर्धा गंधकः प्रोक्तो रक्तः पित्तः सितोसि
तः रक्तो हेमक्रियायुक्तः पीतश्चैव रसायने १ व्रणादिलेपनः स्वेतः श्रेष्ठः कृष्णः सुदुर्लभः सदुग्धभांडस्य [illegible] त्रितोयं सिक्तो भवेत् २५

53
1936

कूर्मपुटेन गंधः आम्रांकुराकन्जलिकानुपाने सर्वामयघ्नौ रसगंधकाभ्यां २ इति गंधकशोधनं गंधकः कटुकस्तिक्तो वीर्योष्णस्तुवरः स
रः पित्तलः कटुकः पाके कंडूवीसर्पजंतुजित् १ हंति कुष्ठक्षयप्लीहकफवातान्रसायनं अशोधितो गंधकः एव कुष्ठसंतापकारकः शुक्रौ
जः क्षयमाबल्यं करोति च रुचिप्रणुत् २ इति गंधकः अथ हिंगुलं दरदस्त्रिविधः प्रोक्तश्चर्मारः शुकतुंडकः हंसपादीतृतीयस्तु गुणवा
नुत्तरोत्तरं चर्मारस्त्वतिरक्तः स्यात्किंचित्सीतः शुकास्यकः श्वेतरेखा प्रवालाभो हंसपादीतिउच्यते २ अशुद्धो दरदः कुर्यादांध्यं क्षैण्यं क्ल
मं भ्रमं मोहं मेहं च संशोध्यस्तस्माद्दिद्यस्तु हिंगुलः ३ मेषीक्षीरेण दरदमम्लवर्गैश्च भावितं सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितं ४ इ
ति शोधनं अथ मारणं वल्लमात्रं तालपिष्टं शरावे स्थापयेत्ततः तस्मिन्कर्षसमं दद्यं शाकलं दरदस्य च १ पूरयेदार्द्रकरसं द्विगुणं तत्र बुद्धिमा
न् पुष्पाणि माषपत्राणि परितः स्थापयेत्ततः २ शरावसंपुटं दत्वा चूल्यां मध्याग्निना पचेत् घटिकात्रयपर्यंतं ततो उत्तार्य पेषयेत् ३
तांबूले रंजनार्थं तु देयं पुष्टिकरं मतं पांडौ क्षयेन्द्रशूले च सर्वरोगेषु योजयेत् ४ इति दरदमारणं अथ रत्नशोधनमारणं अथ वज्रं व्याघ्री
कंदगतं वज्रं दोलायंत्रेण पाचयेत् सप्ताहं कोद्रवक्वाथैः कुलित्थैर्विमलं भवेत् १ इति शोधनं अथ मारणं त्रिवर्षारूढकार्पासीमूलमा
दाय पेषयेत् त्रिवर्षनागवल्या वा निजद्रावैः प्रपेषयेत् तद्गोलके क्षिपेद्वज्रं रुध्वा गजपुटे पचेत् एवं सप्तपुटैर्नूनं कुलिशं म्रियते ध्रुवं २
अन्यच्च त्रिसप्तकृत्वा संतप्तं खरमूत्रेण सेचितं मत्कुणैस्तालकं पिष्ट्वा तद्गोले कुलिशं क्षिपेत् १ ध्मातं वाजिमूत्रेण सिक्तं पूर्वक्रमेण वै
भस्मीभवति तद्वज्रं शशांकशीतांशुसुंदरं २ अन्यच्च हिंगुसैंधवसंयुक्तं क्वाथे कौलत्थजे क्षिपेत् तप्तं तप्तं पुनर्वज्रं भूयाच्चूर्णं त्रिसप्तधा
१ अन्यच्च मंडूकं कांस्यजे पात्रे निगृह्य स्थापयेत्सुधीः सभीतो मूत्रयेत्तत्र तन्मूत्रे वज्रमावपेत् तप्तं तप्तं च बहुधा वज्रस्यैवं मृतिर्भवेत् १
इति मारणं वज्रं समीरकफपित्तगदान्निहंति वज्रोपमं च कुरुते वपुरुग्रमाशु शोषक्षयभ्रमभगंदरमेहमेदोपांडूदरश्वयथुहारि च षंढ
भाव्यं इति गुणाः अथ वैक्रांतं वैक्रांतं वज्रवच्छोध्यं नीलं वा लोहितं तथा हयमूत्रेण सिंचेत तप्तं तप्तं द्विसप्तधा १ ततस्तु मेषदुग्धेस्तु पं
चांगे गोलकं क्षिपेत् पुटेन्मूषापुटे रुध्वा कुर्यादेवं च सप्तधा २ वैक्रांतं भस्मतां याति वज्रस्थाने नियोजयेत् इति मारणं वातपित्तानिलध्वंसी
षट्सं देहदार्ढ्यकृत् पांडूदरज्वरश्वासकासयक्ष्मप्रमेहनुत् १ इति वैक्रांतं अथ शेषरत्नानि शोधनमारणानि शुध्यत्यम्लेन माणिक्यं

जवंत्यामौक्तिकंचकवि विद्रुमंक्षारवर्णेमतार्श्वंगोदुग्धतः शुचिः १ पुष्परागंचकोलित्थकाथयोगेनशुध्यति रोचनाभिश्चगोमेदंवैडूर्यंत्रिफला
जलैः २ नीलंनीलिरसैर्वज्रंविनाशुध्यतिनानिच इतिरसरत्नाकरात् अन्यच्च स्वेदयेद्दोलिकायंत्रेजयंत्यास्वरसेनच मणिमुक्ताप्रवाला
नियामेकंशोधनंभवेत् इतिशारंगधरात् अथमारणं लकुचद्रावसंपिष्टैः शिलातालकगंधकैः वज्रंविनान्यरत्नानिश्रीपतेष्टपुटैः खलु १
अन्यच्च कुमार्यातंदुलीयेनस्तन्येनचनिषेचयेत् प्रत्येकंसप्तवेलंचतप्ततप्तानिकृत्स्नशः १ मौक्तिकानिप्रवालानितथारत्नान्यशेषतः क्षणा
द्विविधवर्णानिभ्रीयंतेनात्रसंशयः २ अक्रमाक्षिकवन्मुक्ताप्रवालानिचमारयेत् वज्रवत्सर्वरत्नानिशोधयेन्मारयेत्तथा ३ शारंगधरात्
इतिमारणं रत्नानिचोपरत्नानिचक्षुष्याणिसराणिच शीतलानिकषायाणिमधुराणिशुभानिच वृष्याणिमंगलान्यायुस्तुष्टिपुष्टिकराणि
च ग्रहालक्ष्मीविषध्वंस्यपापसंतापनानिच यक्ष्मपांडुप्रमेहार्शः कासश्वासभगंदरान् ज्वरवीसर्पकुष्ठानिशूलकृच्छ्रव्रणामयान् ३
भ्रांतिपुष्टियंत्राः कांतिपुष्यानिचरत्नाभिदं ४ इतिगुणः अथशिलाजतु निदाघेघर्मसंतप्ताधातुसारंधराधराः निर्यासवत्प्रमुंचंतितच्छिला
जितुकीर्त्यते अथाशोधनं अथोष्णकालेरविनापयुक्तेचश्मनिवातेसमभूमिभागे चत्वारिपात्राण्यसितायसानिन्यस्यातपेदत्तमनोविधानः
१ शिलाजितुश्रेष्ठमवाप्यपात्रेप्रक्षिप्यतोयंद्विगुणंततः स्यात् उष्णंतदर्धंश्रुतमत्रदत्वाविशोधयेत्तन्मृदितंयथावत् २ ततस्तुयत्कृत्स्नमु
पैतिचोर्ध्वंसंतानिकावद्रविरश्मियोगात् पात्रात्तदन्यत्रनिदध्यात्तस्यांतरेचोष्णजलंनिधाय ३ ततश्चतस्मादपरत्रपात्रेतस्मादथा
त्वादपरत्रतत्र पुनस्ततोन्यत्रनिधायकृत्स्नंयत्संहृतंतत्पुनराहरेच्च ४ यदाविशुद्धंजलमच्छमूर्ध्वंप्रसन्नभावान्मलमेत्यधस्तात् तदात्मये
त्तत्सलिलंमलंचशिलाजितुस्याज्जलशुद्धमेवं ५ इतिशोधनं अथशुद्धशिलाजितुपरीक्षा वह्नौक्षिप्तंतुनिर्धूमंयत्तुलिंगोपमंभवेत्
तृणाग्रेणाभसिक्षिप्तंअधोगलतितंतुवत् १ गोमूत्रगंधिमलिनंशुद्धंज्ञेयंशिलाजितु शिलाजतुरसायणंकटुकतिक्तमुष्णंकृमीह
योदरभिदश्मरीश्वयथुपांडुकंडूहरं प्रमेहवमिकुष्ठशिल्कफसमीरदुर्नामहृद्गुल्मपलितमानसामपित्तकासकृच्छ्रप्रणुत् अशुद्धंदाहमूर्छा
भ्रमपित्तास्रशोषतः शिलाजितुप्रकुरुतेमांद्यमग्नेश्चविड्ग्रहं २ इतिशिलाजतु अथसिंदूरं सिंदूरंनिंबुकद्रावैः पिष्टावस्त्रा
वशोषयेत् ततस्तंदुलतोयेनतथाक्तंविशुध्यति १ सिंदूरमुष्णंवीसर्पकुष्ठकंडूविषापहं भग्नसंधानजननंव्रणशोधनरोपणं २ २६

55
1936

अथसमुद्रफेनः समुद्रफेनश्चक्षुष्योलेखनः शीतलः सरः किणस्वरुजाकफहरः पाचनदीपनः १ अशुद्धः सकरोत्यंगभंगंतस्माद्विशोधयेत्
समुद्रफेनः संपिष्टोनिंबुतोयेनशुध्यति २ अथगैरिकं गैरिकंकिंचिदाम्लेनभ्रष्टंशुद्धंप्रजायते कांतिकांतिवयस्थैर्यबलोजोवृद्धिकारकं १ प्र
मेहकुष्ठपिटकासर्वव्रणविषापहं स्वर्णगैरिकमन्यत्तुश्रेष्ठंसामान्यगैरिकात् अथशंखः शंखःक्षारोहिमोग्राहीग्रहणीरोगनाशनः नेत्रपु
ष्पहरोवर्ण्यस्तारुण्यपिडकाप्रणुत् १ अशुद्धोगुणदोनैषः शुद्धोम्लेःसगुणप्रदः इतिशंखः दक्षिणावर्त्तशंखस्तुत्रिदोषघ्नःशुचिर्निधिः
ग्रहालक्ष्मीक्षयक्ष्वेडक्षामताक्षयापहः १ अथभूनागसत्वमयूरपक्षसत्वगुणाः ताम्रभूभवभूनागास्त्रिंशांशपिष्टसमेनतांबूलपत्रशी
र्णनाभिःस्यान्मत्स्यपिण्याकटंकणैः १ द्रवमेतैश्वसंयोज्यमर्दयित्वाधमेत्खरं मुंचंतीताम्रवत्सत्वंतद्वल्लक्षाप्तिबर्हिणां २ भूनागसत्वंशि
शिरंसर्वकुष्ठव्रणप्रणुत् तत्स्पृष्टजलपानेनस्थावरंचापिजंगमं ३ विषंनश्यतितत्पात्रगतःसत्वोग्निवोद्दं एवंमयूरपक्षोत्थसत्वस्यापिगुणो
मतः ४ अथटंकणशोधनं अशुद्धटंकणोवांतिभ्रांतिकारीप्रयोजितः अतस्तंशोधयेद्देवगोमयेनातपःशुचिः १ टंकणोवह्निकृत्स्वर्ण
रूप्ययोः शोधनःसरः विषदोषहरोहृद्योवातश्लेष्मविकारनुत् २ अथविषं कालकूटोवत्सनाभशृंगकश्चप्रदीपनः हलाहलोब्रह्मपुत्रो
हरिद्रासक्तुकस्तथा १ सौराष्ट्रिकइतिप्रोक्ताविषभेदाअमीनव १ ब्राह्मणःपांडुरस्तेषुक्षत्रियोरक्तवर्णकः वैश्यःपीतप्रभःशूद्रःकृष्णा
भःसतुनिंदितः सोरंयनेविषंविप्रोदेहपुष्टेतुबाहुजः कुष्ठनाशेप्रयुंजीतवैश्यंशूद्रंतुघातुषु २ विषंग्राहेणरंयुक्तयाप्राणकृच्चरसायनं
योगवाहित्रिदोषघ्नंश्लेष्मवातहरंसंनिपातजित् ४ अथविषशोधनं विषंतुखंडशःकृत्वावस्त्रखंडेनबंधयेत् गोमूत्रमध्येनिक्षिप्यरक्षप
येदातपेत्र्यहं गोमूत्रंतुप्रदातव्यंनूतनंप्रत्यहंबुधैः त्र्यहेपीतत्समुद्धृत्यशोषयेन्मृदुपेषयेत् २ शुद्धत्येवंविषंसेव्यंयोग्यंभवतिवाभि
जित् अन्यच्च खंडीकृत्यविषंवस्त्रपरिबद्धंतुदोलया अजापयसिसंस्विन्नंयामतःशुद्धिमाप्नुयात् १ अजादुग्धाभावेतस्तुगव्यक्षी
रेणपाचयेत् १ अन्यच्च विषग्रंथिंमलेन्यस्यमाहिषेदृढमुद्रितं करीषाग्नौपचेद्यामंवस्त्रभूतंविषंशुचि १ अन्यच्च कणशोवत्सनागं
चकृत्वाबध्वाचकर्पटे दोलायंत्रेजलक्षीरेप्रहराच्छुद्धिमृच्छति १ अथविषमारणं तुल्येनटंकणेनैवद्विगुणेनोषणेनच विषंसंयोजि
तंशश्विंमृतंभवतिसर्वथा १ अथगुणाः विषंरसायनंबल्यंवातश्लेष्मविकारनुत् कटुतिक्तकषायंचमदकारीसुखप्रदं व्यवायिशीतलं

यो०२० २० द्वहिकुष्टवातास्त्रनाशनं अग्निमांद्यश्वासकासप्लीहोदरभगंदरान् २ गुल्मपांडुव्रणार्शांसि नाशयेत्क्रमशोन्नृणां इति विषं अथोपविषाणि
अर्कक्षीरस्नुहिक्षीरलांगलीकरवीरकाः गुंजाहिफेनधत्तूरसप्तोपविषजातयः मतांतरं स्नुह्यर्कलांगलीगुंजाहयारिविषमुष्टिका धत्तूरोहिफेनश्चै
पालोनवोपविषजातयः १ अथैषां शोधनगुणाश्च सेहुंडोरेचनस्तीक्ष्णो दीपनः कटुकोगुरुः शूलमाष्टीलकाध्मानगुल्मशोफोदरानिलान् १
हंतिदोषान्यकृत्प्लीहकुष्ठोन्मादाश्मपांडुताः निवडंग अर्कद्वयं सरं वातकुष्टकंडुविषापहं निहंति प्लीहगुल्मार्शोयकृच्छ्लेष्मोदराकृमीन् १ इत्यर्क
गुणाः लांगलीशुद्धिमायाति दिनंगोमूत्रसंस्थिता कलिकालिसमाकुष्टशोफार्शोव्रणशूलजित् तीक्ष्णोष्णकृमिनुत्लघ्वी पित्तलागर्भ
पातिनि लांगलीशोधनगुणः गुंजाकांजिकसंस्विन्ना प्रहराच्छुध्यति ध्रुवं गुंजालघुर्हिमारुक्षाभेदिनी श्वासकासजित् १ कौष्णारुच्याकृ
इकंडूश्लेष्मपित्तव्रणापहा इति गुंजाशोधनगुणाः हयारिविषवच्छोध्यं गोदुग्धे दोलकेनतु करवीरद्वयं नेत्ररोगकुष्टव्रणापहं लघूष्णं
मिकंडूघ्नं भक्षितं विषवन्मतं १ इति करवीरद्वयं किंचिदाज्येन संभृष्टो विषमुष्टिर्विशुध्यति विषमुष्टिस्तिक्तकटुतीक्ष्णोष्णः श्लेष्मवातहा १
सारमेयविषोन्मादहरो मदकरः स्मृतः इति विषमुष्टिः कुचला धत्तूरबीजं गोमूत्रे चतुर्यामोषितं पुनः कंडितं निस्तुषं कृत्वा योगेषु विनियोज
येत् धत्तूरो मदवर्णाग्निवातकृज्ज्वरकुष्टनुत् उष्णो गुरुर्व्रणश्लेष्मकंडुकृमिविषापहः २ इति धत्तूरः अहिफेनं शृंगवेररसैर्भाव्यं त्रिस
प्तधा श्लेष्मशुष्येषु योगेषु योजयेत् निद्धानतः १ आफुकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलं मदकृद्दाहकृच्छुक्रस्तंभनायासमोहकृत्
२ अतिसारे ग्रहण्यां च हितं दीपनपाचनं सेवितं दिवसैः कैश्चित् भ्रमकृत्यन्यथानिकृत् ३ इत्यहिफेनः अथ जेपालं जेपालं रहितं त्व
गंकुरुरसज्ञा निर्मलं माहिषे निक्षिप्तं त्र्यहं भुक्तोयविमलं खल्वेसवासोर्दितं लिप्तं न्तूतनखर्परेषु विगतस्नेहं रजः सन्निभं निंबुकांबुभा
वितं च बहुशः शुद्धं गुणाढ्यं भवेत् १ अन्यच्च वस्त्रे बध्वा तु जेपालं गोमयस्योदकन्यसेत् पाचयेद्याममात्रं तु जेपालः शुध्यतां व्रजेत् १ अन्य
च्च जेपालं निस्तुषं कृत्वा दुग्धे दोलायुतं पचेत् अंतर्जिह्वां परित्यज्य काष्ठं ज्याद्रसकर्मणि १ जेपालो स्निग्धगुरुस्तिक्तो वांतिकृज्ज्वरकुष्टनुत्
उष्णो गुरुर्व्रणश्लेष्माकंडुकृमिविषापहः इति जेपालः इत्युपविषाणि अथाभ्रकसत्वपातनविधिः भावयेच्चूर्णितं त्वभ्रं दिनैकं कां
जिकेन च रंभास्वरणजैर्नीरैर्मूलकैश्च समेलयेत् १ तुर्यांशटंकणेनैव क्षुद्रमत्स्यैः समंपुनः महिषीमलसंमिश्रान्विधायास्याथ गोलकान् २०

57/193

२ खराग्निना धमेद्गाढं सत्वं मुंचति कांस्यवत् मारितं ताम्रवद्भर्म पारदाभ्यां निषेवयेत् ३ सत्वमभ्रस्य शिशिरं त्रिदोषघ्नं रसायनं विशेषात्शु
क्रजननं वयसस्तंभनं परं ४ इत्यभ्रकसत्वं अगस्त्यपत्रनिर्यासमर्दितं सुरणस्थितं अभ्रं गोष्टगलं मासं जायते पारदोपमं १ इत्यभ्रकद्रुतिः ला
क्षाराजितिलान्शिग्रुटंकणं लवणं गुडं तालकार्धेन संमिश्रं मूषायांस्थिरभाजने १ रुध्वा पुटेद्दशोर्ध्वं त्रेसत्वं मुंचति सर्वथा २ इति तालकसत्वं
अथ क्षारकल्पना क्षारवृक्षस्य काष्ठानि शुष्काण्यग्नौ प्रज्वालयेत् नीत्वा तद्भस्म मृत्पात्रे क्षिप्त्वा नीरं चतुर्गुणं विमर्द्य धारयेद्रात्रौ प्रातरच्छं
जलं नयेत् तन्नीरं क्वाथयेद्वह्नौ यावत्सर्वं विशुध्यति २ ततः पात्रसमुद्धृत्य क्षारोयाह्यः सितप्रभः चूर्णाभः प्रतिसार्यस्यात्तेजसः क्वाथवस्थितः
इति क्षारद्वयं धीमान्युक्तकार्येषु योजयेत् इति क्षारकल्पना इति रसविषोपविषाभ्रतालकसत्वक्षारकल्पनाकथनं वमनं रेचनं नस्यं क
र्णपूरणमेव च रक्तस्रुतिः समासेन कथितेनातिविस्तरं अथ वमनं शरत्काले वसंते च प्रावृट्काले च देहिनां वमनं रेचनं चैव कारयेत्कुश
लो भिषक् १ बलवंतं कफव्याप्तं हृल्लासादिनिपीडितं तथा वमनसात्म्यं च धीरचित्तं च वामयेत् २ विषदोषस्तन्यरोगे मंदाग्नौ श्लीपदेर्बुदे
हृद्रोगकुष्ठवीसर्पमेहाजीर्णभ्रमेषु च ३ विदारिकापचीकासश्वासपीनसवृद्धिषु अपस्मारज्वरोन्मादतथा रक्तातिसारिषु ४ नासाताल्वो
ष्टपाके च कर्णस्रावे धिजिह्वके गलशुंड्यामतीसारे पित्तश्लेष्मगदे तथा मेदोदोषेरुचौ चैव वमनं कारयेद्भिषक् नवाम नीयस्तिमिरान
गुल्मीनोदरी कृशः नातिवृद्धो गर्भिणी च नस्थूलो नक्षतातुराः सुकुमारं कृशं बालं वृद्धं भीरुं न वामयेत् ७ वमने चापि वेगास्तु रष्टौ पित्तान्त
उत्तमः षड्वेगा मध्यवेगाश्च चत्वारस्त्ववरा मताः ८ कृष्णाराटफलं सिंधुकफे कोष्णजलैः पिबेत् पटोलवासानिंबैश्च पित्ते शीतजलं
पिबेत् ९ सश्लेष्मवातपीडायां सक्षीरमदनं पिबेत् अजीर्णे कोष्णपानीयं सिंधु पीत्वा वमेत्सुधीः १० अथ ग्रंथांतरे पटोलीनिंबसलिलं
चाल्पपित्ते च वांतिकृत् लवणं घृतयुक्तं च वमनार्थे सुखावहं १ अन्यच्च काकोदुंबरबालपत्रक्वाथमेकपलं १ अजासद्यदुग्धमेकपलं १
मधु अर्धकर्षं शर्करा अर्धकर्षं एकत्र मेलयित्वा प्रभाते पित्तविकारे देयं वमनं भवति अन्यच्च कुसरीवल्लिपल्लवमर्धपलं गोदुग्धक
र्षत्रयमध्ये पेषयित्वा वस्त्रपूतं ग्राह्यं यं पित्ते वमनं भवति उत्तरे घृतं देयं घृतान्नं पथ्यं अन्यच्च मसुराणां दलं प्रहरद्वयं जले निक्षि
प्तं निर्मलजलमर्धपलं ग्राह्यं पित्तविकारे वमनं भवति पथ्यं घृतान्नं अन्यच्च गोदुग्धमेककर्षं मधुमेककर्षं खदिरसारभर्जित

मेकशुंगंकदंबपल्लवसैरेकार्धंमुनिदमपल्लवरसमेकनिष्कंतेषांमध्ये एरंडमूलंमर्दयित्वाएकत्रत्र्यकर्षंनिधायप्रभातेग्राह्यंकर्षंभिकारेवमनंभवति
हृत्कंठशिरसांशुद्धिर्दीप्तमग्निंचलाघवं कफपित्तविनाशश्चसम्यग्वांतस्यचेष्टितं १ ततोपराह्णेदीप्ताग्निर्मुद्गशाष्टिकशालिभिः हृद्यैश्चजां
गलरसैः कृत्वायूषंचभावयेत् अजीर्णंशीतपानीयंव्यायामंमैथुनंतथा स्नेहाभ्यंगंप्रकोपंचादिनैकंवर्जयेत्सुधीः २ इतिवमनविधिः अथवि
रेचनं स्निग्धस्विन्नायवांतायदद्यात्सम्यग्विरेचनं आवांतस्यत्वधस्स्तोग्रहणींछादयेत्कफः मंदाग्निंगौरवंकुर्याज्जनयेद्वाप्रवाहिकां अथवा
पाचनेनैवजलसंचापिपाचयेत् २ स्निग्धस्यस्नेहनैः कार्यंस्वेदैःस्विन्नस्यरेचनं शरद्वसंतेवसंतेचदेहशुद्धौविरेचयेत् ३ अन्यदात्ययिकेका
र्येस्वेदनंशीलयेद्बुधः पित्तेविरेचनंयुंज्यादामोद्भवेगदेतथा ४ उदरेचतथाध्मानेकोष्ठशुद्धौविरेचयेत् दोषाःकदाचित्कुप्यंतिजितालंघनपा
चनैः ५ येतुसंशोधनैःशुद्धाः नतेषांपुनरुद्भवः बालवृद्धावतीस्निग्धः क्षतक्षीणोभयान्वितः ६ श्रांतस्तृषार्तस्थूलश्चगर्भिणीचनव
ज्वरी नवप्रसूतानारीचमंदाग्निश्चमदात्ययी ७ शल्यार्दितश्चरूक्षश्चनविरेच्योविजानता जीर्णज्वरीगरव्याप्तोवातरक्तोभगंदरी अर्शपांडू
दर्यंथिहृद्रोगारुचिपीडितः ८ योनिरोगःप्रमेहार्त्तौगुल्मप्लीहव्रणार्दितः विद्रधिछर्दिविस्फोटविश्चीकुष्ठसंयुताः ९ कर्णनासाशिरो
वक्त्रगुदमेहामयान्विताः प्लीहशोफाक्षिरोगार्त्ताः कृमिक्षारान्तरार्दिताः शूलिनीमूत्रघातार्त्ताविरेकार्हानरामताः १० रेचनंयथा एरं
तैलंत्रिफलाक्वाथेनद्विगुणेनच युक्तंपीत्वापयोभिर्वानचिरेणविरिच्यते १ त्रिवृताकौटजंबीजंपिप्पलीविश्वभेषजं समृद्वीकारसक्षौद्रंवर्षा
कालेविरेचनं २ त्रिवृदुरालभामुस्ताशर्करादिव्यचंदनं द्राक्षांबुनासयष्ट्याह्वाशीतलंचघनात्यये पिप्पलीनागरंसिंधुश्यामात्रिवृतासह
लिहेत्क्षौद्रेणशिशिरेवसंतेचविरेचनं ४ त्रिवृताशर्करातुल्याग्रीष्मकालेविरेचनं ५ अथग्रंथांतरे एरंडतैलंपवनेविरेचनंद्राक्षाप
यश्चांबुघृतंचपित्ते क्वाथःकफेत्रैफलकोगुडेनदुग्धाभयासर्वमलंनयेच १ अन्यच्च पिप्पलीपिप्पलीमूलंमभयाद्विगुणोत्तरं चूर्णमुष्णांबुना
८ पेयंस्वस्थेसुखविरेचनं १ अन्यच्च हस्तकर्णमयेपादैः पथ्यात्रिवृतंचनागरंलवणं निक्वथितंपीतसारंनरपतियोग्यंविरेचनंभवति अन्यच्च
प्रपथ्यासैंधवकणाचूर्णमुष्णांबुनासह एतंनाराचकंख्यातरेचनंचहितावहं १ अन्यच्च वरांबुनादेवासमाख्यबीजंसुवर्णमित्रंकुसुमा
भिधानं विचित्रविद्याधरनामकोयंमलंविनामुंचतिआननेव १ अथमेघनादरेचनरसः दरदंटंकणंचैवसैंधवंचकटुत्रयं त्रिफलाहार २८

हराचक्रिमिघ्नोरामठंतथा १ दस्युदीप्यंसमानंचदंतीसर्वार्धभागिकां जंबीरद्रवसंमर्द्यचणकस्यप्रमाणतः २ उष्णोदकानुपानेनक्रिमि
मांद्यरेचनं तस्योपरिहितंदेयंपथ्यंदध्योदनंपरं ३ उदरेपांडुशोफेचशोफोदरजलोदरे सर्वज्वरेचविषमेमेघनादःप्रशस्यते ४
इतिमेघनादरेचनं ४ पीत्वाविरेचनंशीतजलैःसंसिच्यचक्षुषां सुगंधिकिंचिदाघायतांबूलंशीलयेदरं १ नावातस्थेनवेगांश्चधार
येन्नस्वपेत्तथा शीतांबुनस्पृशेत्क्वापिकोष्णंनीरंपिबेन्नरः २ इंद्रियाणांबलंबुद्धेःप्रसादंवह्निदीप्ततां धातुस्थैर्यंवयस्थैर्यंभवेद्रेचनसेवनात्
प्रवाससेवासीतांबुस्नेहाभ्यंगमजीर्णता व्यायामंमैथुनंचैवनसेवेतविरेचनः ४ शालिषष्टिकमुद्गाद्यैर्यवागूंभोजयेत्ततः जांगलैरिष्किर
णांवारसैःशाल्योदनंहितं ५ विरेकस्यातिवेगेनमूर्छाभ्रंशोगुदस्यच शूलंकफातियोगस्यान्मांसधावनसंनिभं मेदोनिभंजलाभासंरक्तं
चापिविरिच्यते तस्यशीतांबुभिःसिक्त्वाशरीरंतंडुलांबुभिः ७ सहकारत्वचाकल्कोदधासौवीरकेणवा पिष्ट्वानाभिप्रलेपेनहंत्यतीसार
मुल्बणं ८ इतिविरेचनविधिः अथनस्यं नस्यंविधेयंगुडनागरेणजलेनवासैंधवपिप्पलीभ्यां घ्राणस्यमन्याहनुबाहुपृष्ठशिरोक्षिकंठ
श्रवणामयेषु १ भुक्तवत्यथवास्नातेनस्यंयोज्यंनकर्हिचित् कृतेनस्येशिरःस्नानंरोगादींश्चवियोजयेत् २ इतिनस्यं अथकर्णपूरणं
रसाद्यैःपूरणंकर्णेभोजनात्प्राक्प्रशस्यते तैलाद्यैःपूरणंकर्णेभास्करेस्तमुपागते १ स्वेदयेत्कर्णदेशंतुपरिवर्त्तनशायिनः मूत्रैःस्नेहैः
रसैःकोष्णैःपूरयेच्छ्रुतलोभिषक् २ स्वस्थस्यपूरणंस्नेहैर्मात्राशातमवेदने शतत्रयंश्रोत्रगदेशिरोरोगेतथैवच ३ कर्णंप्रपूरयेत्सम्यक्स्ने
हाद्यैर्मात्रयोक्तया नोच्चैःश्रुतिर्नबाधिर्यंस्यान्नित्यंकर्णपूरणात् ४ अथमात्रा दक्षजानुकरावर्त्तैःछोटिकावांगुलिद्वयात् निमेषोन्मे
षकालोवावस्तोमात्राकृताबुधैः इतिप्रयोगपारिजातात्कर्णपूरणमात्राविधिः अथरक्तश्रुतिः शरत्कालेस्वभावेनकुर्याद्रक्तश्रुतिंन
रः त्वग्दोषग्रंथिशोथाद्यानस्युरक्तस्रजेद्यतः १ इंद्रगोपप्रभिभंज्ञेयंप्रकृतिस्थमसंहतं शोथेदाहेंगपाकेचरक्तवर्णेस्रजःस्रुतौः वातर
क्तेतथाकुष्ठेसपीडेदुर्जयानिले पाणिरोगेश्लीपदेचविषदुष्टेचशोणिते २ ग्रंथ्यर्बुदापचीक्षुद्ररोगरक्ताधिमंथिषु विदारीस्तनरोगेषु
गात्राणांसादगौरवे ४ रक्ताभिष्यंदतंद्रायांपूतिघ्राणास्यदाहके यकृत्प्लीहविसर्पेषुविद्रधौपिटिकोद्गमे ५ कर्णौष्ठघ्राणवक्त्राणां
पाकेदाहेशिरोरुजि उपदंशेरक्तपित्तेरक्तस्रावःप्रशस्यते ६ गोशृंगेणजलौकाभिरसांबुभिरपित्रिधा वातपित्तकफैर्दुष्टंशोणितं

59
173

स्रावयेद्बुधः ७ द्विदोषाभ्यां च संकुष्टं त्रिदोषैरपि दूषितं शोणितं स्रावयेद्युक्त्या शिरामोक्षैः पदैस्तथा ८ शृङ्गाणि शोणितं शृङ्गं दशाङ्गुलमि
तं बलात् ९ जलूका हस्तमात्रं तु तुम्बी चाष्टादशाङ्गुलं पदमङ्गुलमात्रं स्याच्छिरा सर्वाङ्गशोधिनी १० शीतोपचारैः कुपिते सति रक्तस्य मारुते
कोष्णेन सर्पिषा शोथं शनकैः परिषेचयेत् ११ क्षीणस्यैणशशोरभ्रहरिणच्छागमांसजः रसः समुचितः पाने क्षीरं वा षष्टिका हिताः १२
व्यायाममैथुनक्रोधशीतस्नानप्रवर्तकान् एकासनं दिवानिद्रां क्षाराम्लकटुभोजनं १३ शोकं वातमजीर्णं च त्यजेद्यावद्बलं भवेत् १४
इति रक्तस्रुतिः इति वमनरेचनादिकथनं अन्यच्च पचेन्नामं वह्निकृच्च दीपनं तद्यथा मिशि पचेत्यामं न वह्निं च कुर्याद्यत्तद्धि पाचनं ना
गकेसरवद्विद्यात् चित्रो दीपनपाचनः न शोधयति न द्वेष्टि समान् दोषांस्तथोद्धतान् समीकरोति तज्ज्ञेयं यथा प्रोक्ता हरीतकी शमनं तद्यथा
मृता कृत्वा पाकं मलानां यद्भित्वा बन्धमधो नयेत् तच्चानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी पक्तव्यं यदपक्त्वैव श्लिष्टं कोष्ठे मलादिकं नयत्यधः स्रं
सनं तद्यथा स्यात्कृतमालकः मलादिकमबद्धं वा बद्धं वा पिण्डितं मलैः भित्त्वाधः पातयति तद्भेदनं कटुकी यथा विपक्वं यदपक्वं वा मलादि द्रवतां
नयेत् रेचयत्यपि तज्ज्ञेयं रेचनं त्रिवृता यथा ६ अपक्वपित्तश्लेष्माणौ बलादूर्ध्वं नयेत्तु यत् वमनं तद्धि विज्ञेयं मदनस्य फलं यथा स्थानाद्बहि
र्नयेदूर्ध्वमधो वा मलसंचयं देहसंशोधनं तत्स्याद्देवदालीफलं यथा ८ श्लिष्टान्कफादिकान्दोषानुन्मूलयति यद्बलात् छेदनं तद्यथा क्षार
मरीचानि शिलाजतु धातून्मलान्वा देहस्य शोषयेल्लेखयेच्च यत् लेखनं तद्यथा क्षौद्रं नीरमुष्णं वचा यवाः १० दीपनं पाचनं यत्स्यादुष्ण
त्वाद्द्रवशोषकं ग्राहि तच्च यथा शुण्ठी जीरकं गजपिप्पली रौक्ष्याच्छैत्यात्कषायत्वाल्लघुपाकाच्च यद्भवेत् वातकृत्स्तम्भनं तत्स्याद्यथा वत्सक
टिण्डुकौ रसायनं च तज्ज्ञेयं यज्जराव्याधिनाशनं यथामृता रुदन्ती च गुग्गुलुश्च हरीतकी यस्माद्व्यवायी भवेत्स्त्रीषु हर्षो वाजीकरं च यत् य
था नागबलाद्याः स्युर्बीजं च कपिकच्छुजं यस्माच्छुक्रस्य वृद्धिः स्याच्छुक्रलं हि तदुच्यते अथाश्वगन्धा मुसली शर्करा च शतावरी दुग्धं माषा
श्च भल्लातफलमज्जामलानि च प्रवर्तकानि कथ्यन्ते जनकानि च रेतसः प्रवर्तनं स्त्रीशुक्रस्य रेचनं बृहतीफलं जातीफलं स्तम्भकं स्यात्कालिङ्गं
क्षयकारि च देहस्य सूक्ष्मच्छिद्रेषु विशेत्सूक्ष्ममुच्यते १७ तद्यथा सैन्धवं क्षौद्रं निम्बतैलं रुबूद्भवं पूर्वं व्याप्याखिलं कायं ततः पाकं च
गच्छति व्यवायि तद्यथा भङ्गा फेनं चाहिसमुद्भवं संधिबन्धांस्तु शिथिलान्यत्करोति विकाशि तत् विश्लेष्योजश्च धातुभ्यो यथा क्रमुकको २९

द्रवाः बुद्धिं लुम्पति यद्द्रव्यं मदकारि तदुच्यते तमोगुणप्रधानं च यथा मद्यं सुरादिकं व्यवायी च विकाशि स्यात्सूक्ष्मं छेदि मदावहं आग्नेयं जीवित
हरं योगवाहि विषं स्मृतं निजवीर्येण यद्द्रव्यं स्रोतोभ्यो दोषसंचयं निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा पैच्छिल्याद्गौरवाद्द्रव्यं रुद्ध्वा रसव
हः शिरः धत्ते यद्गौरवं तत्स्यादभिष्यन्दि यथा दधि अथ युक्तायुक्तविचारः नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु विना विडङ्गकृष्णाभ्यां गु
डधान्याज्यमाक्षिकैः गुडूची कुटजो वासा कूष्माण्डश्च शतावरी अश्वगन्धा सहचरो शतपुष्पा प्रसारणि प्रयोक्तव्याः सदैवार्द्रा द्विगुणा नैव कार
येत् शुष्कं नवीनं द्रव्यं च योज्यं सकलकर्मसु आर्द्रं च द्विगुणं युञ्ज्यादेष सर्वत्र निश्चयः कालेऽनुक्ते प्रभातं स्यादङ्गेऽनुक्ते जटा भवेत् भागेऽनु
क्ते च साम्यं स्यात्पात्रेऽनुक्ते च मृन्मयं एकमप्यौषधं योगे यस्मिन्यत्पुनरुच्यते मानतो द्विगुणं प्रोक्तं तद्द्रव्यं तत्त्वदर्शिभिः गुणहीनं भवेद्वर्षादूर्ध्वं
तद्रूपमौषधं मासद्वयात्तथा चूर्णं हीनवीर्यत्वमाप्नुयात् हीनत्वं गुटिकालेहौ लभेते वत्सरात्परं हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकात्त
था ओषध्यो लघुपाकाः स्युर्निर्वीर्या वत्सरात्परं पुराणाः स्युर्गुणैर्युक्ता आसवा धातवो रसाः व्याधेरयुक्तं यद्द्रव्यं गणोक्तमपि तत्त्यजेत् अनुक्त
मपि युक्तं यद्योजयेत्तत्र तद्बुधः इति शार्ङ्गधरात् अथ शब्दपरिभाषाकथनं अथ सहेतुकान्सलक्षणान्कतिचिद्विकारानाह श्रुश्रुलेतंद्रा
लक्षणं इन्द्रियार्थेष्वसंप्राप्तिर्गौरवं जृम्भणं क्लमः निद्रार्तस्येव यस्यैते तस्य तन्द्रां विनिर्दिशेत् १ अथ जृम्भालक्षणं पीत्वेकमनिलोच्छ्वासमुद्
वृत्तविवृताननः यं मुञ्चति सनेत्राश्रुः स जृम्भ इति संज्ञकः १ अथ क्लमः योनायासश्रमो देहे प्रवृद्धः श्वासवर्जितः क्लमः स इति विज्ञेय इ
न्द्रियार्थप्रबोधकः १ अथ क्षवथोः प्राणोदानसमौ स्यातां मूर्ध्नि श्रोतःपथे स्थितौ नस्तः प्रवर्तते शब्दः क्षवथुं तं विनिर्दिशेत् अथ आलस्यं
सुखस्पर्शप्रसंगित्वं दुःखद्वेषणलोलता शक्तस्य चाप्यनुत्साहः कर्मस्वालस्यमुच्यते अथ उत्क्लेशः उत्क्लिश्यान्नं न निर्गच्छेत्प्रसेकष्ठीवने
रतं हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्दिशेत् अथ ग्लानेर्लक्षणं वक्त्रे मधुरता तन्द्रा हृदयोद्वेष्टनं भ्रमः न चान्नमभिकाङ्क्षेत ग्लानिं तस्य विनि
र्दिशेत् १ अथ गौरवं आर्द्रचर्मावनद्धं च यो गात्रं मन्यते नरः तथा गुरुशिरोऽत्यर्थं गौरवं तद्विनिर्दिशेत् १ अथ हृल्लासलक्षणं हृल्लासो हृ
दयादीषद्व्यथः पद्बुनिर्गमः १ अथ ज्वरादिरोगोद्देशः ज्वरातिसारो ग्रहणी ह्यर्शोऽजीर्णविषूचिका सालसा च विलम्बी च कृमिरुक्पा
ण्डुकामलाः हलीमकं रक्तपित्तं राजयक्ष्म उरःक्षतं कासो हिक्का तथा श्वासः स्वरभेदस्त्वरोचकः छर्दिस्तृष्णा च मूर्छा च तथा पानात्ययादयः

दाहारवश्वतनोन्मादोह्यपस्मारोनिलामयः २ वातरक्तमुरुस्तंभ आमवातोथशूलरुक् पक्तिजंशूलमानाहमुदावर्त्तोथगुल्मरुक् हृद्रोगोमूत्रकृच्छ्रं
चमूत्राघातंतथाश्मरी प्रमेहोमधुमेहश्चपिटिकाश्चप्रमेहजाः मेदोदोषोदरंशोथवृद्धिश्चगलगंडकः गंडमालापचीग्रंथिरर्बुदंश्लीपदंतथा ६
विद्रधिर्व्रणशोथौचद्वौव्रणौभग्ननाडिकौ भगंदरोपदंशौचशूकदोषस्त्वगामयाः शीतपित्तमुदर्दश्चस्फोटकश्चाम्लपित्तकं विसर्पश्चसविस्फो
टस्तथैवचमसूरिका ८ क्षुद्ररुक्कर्णनासाक्षिशिरस्त्रीबालकामयाः विषचेत्यमुद्देशः संग्रहेस्मिन्प्रकीर्तितः १० इति अथज्वरनिदानं
दक्षापमानसंक्रुद्धरुद्रनिश्वाससंभवः ज्वरोष्टधापृथग्द्वंद्वसंघातागंतुजस्मृतः १ ज्वरस्यसंप्राप्तिमाह मिथ्याहारविहाराभ्यांदोषोह्यामा
शयाश्रयाः बहिर्निरस्यकोष्ठाग्निंज्वरदास्युरसानुगाः २ ज्वरस्वरूपमाह स्वेदावरोधसंतापः सर्वांगग्रहणंतथा युगपद्यत्ररोगेषुसज्व
रोव्यपदिश्यते २ रुणद्धिवाप्यपांधातून्यस्मात्तस्माज्ज्वरातुरः भवत्युष्णगात्रश्चस्विद्यतेनचसर्वशः ३ श्रमोरतिर्विवर्णत्वंवैरस्यंनयनप्ल
वः इच्छाद्वेषोमुहुश्चापिशीतवातातपादिषु जृंभांगमर्दोगुरुतारोमहर्षोरुचिस्तमः अप्रहर्षश्चशीतंचभवत्युत्पत्स्यतिज्वरे ६ सामान्य
तोविशेषस्तुजृंभात्यर्थंसमीरणात् पित्तान्नयनयोर्दाहः कफदन्नारुचिस्तथा ७ प्रथमंवातज्वरलक्षणमाह वेपथुर्विषमोवेगः कंठोष्ठप
रिशोषणं निद्रानाशःक्षवस्तंभोगात्राणांरौक्ष्यमेवच ८ शिरोहृद्गात्ररुग्वक्त्रवैरस्यंगाढविट्कता शूलाध्मानौजृंभणंचभवंत्यनिलजेज्व
रे ९ पैत्तिकमाह वेगस्तीक्ष्णोतिसारश्चनिद्राल्पत्वंतथावमी कंठोष्ठमुखनासानांपाकःस्वेदश्चजायते १० प्रलापोवक्त्रकटुतामूर्छा
दाहोमदस्तृषा पीतविण्मूत्रनेत्रत्वंपैत्तिकेभ्रमएवच ११ श्लैष्मिकज्वरमाह स्तैमित्यंस्तिमितोवेगआलस्यंमधुरास्यता शुक्लमूत्रपुरी
षत्वंस्तंभस्तृप्तिरथापिच १२ गौरवंशीतमुत्क्लेदोरोमहर्षोतिनिद्रता स्रोतोरोधोविडल्पत्वंप्रसेकोबहुमूत्रता १३ नात्युष्णगात्रता
छर्दिरंगसादोविपाकता प्रतिश्यायोरुचिःकासः कफजेक्ष्णोतिशुक्लता १४ अथवातपित्तज्वरलक्षणमाह तृष्णामूर्छाभ्रमोदाहः
स्वप्ननाशःशिरोरुजः कंठास्यशोषोवमथुरोमहर्षोरुचिस्तमः १५ पर्वभेदश्चजृंभाचवातपित्तज्वराकृतिः अथवातश्लेष्मज्वरलक्ष
णं स्तैमित्यंपर्वणांभेदोनिद्रागौरवमेवच शिरोग्रहःप्रतिश्यायःकासस्वेदाप्रवर्त्तनं संतापोमध्यवेगश्चवातश्लेष्मज्वराकृतिः १७
अथश्लेष्मपित्तज्वरलक्षणं लिप्ततिक्तास्यतातंद्रामोहःकासोरुचिस्तृषा मुहुर्दाहोमुहुःशीतंश्लेष्मपित्तज्वराकृतिः १८ अथसन्नि २०

63
1936

पातज्वरलक्षणं विरोधिकैरन्नपानैरजीर्णाध्यशनेनच ग्राम्यश्चसेवनाच्चापिसंनिपातःप्रकुप्यति १९ क्षणेदाहःक्षणेशीतमस्थिसंधिशिरो
रुजा साश्रुणीकलुषेरक्तेनिर्भुग्नेचापिलोचने २० सस्वनौसरुजौकर्णौकंठःशूकैरिवावृतः तंद्रामोहःप्रलापश्चकासःश्वासोरुचिर्भ्रमः २१
तद्धीनंमहानिद्रादिवाजागरणंनिशि सदावानैववानिद्रामहान्स्वेदोथनैववा २२ गीतनर्त्तनहास्यादिविकृतेहाप्रवर्त्तनं परिदग्धाखरस्प
र्शाजिह्वास्रस्तांगतापरं ष्ठीवनंरक्तपित्तस्यकफेनोन्मिश्रितस्यच शिरसोलोठनंतृष्णानिद्रानाशोहृदिव्यथा स्वेदमूत्रपुरीषाणांचिराद्दर्शन
मल्पशः कृशत्वंचातिगात्राणांसततंकंठकूजनं २४ कोठानांश्यावरक्तानांमंडलानांचदर्शनं मूकत्वंस्रोतसांपाकोगुरुत्वमुदरस्यच २५
चिरात्पाकश्चदोषाणांसन्निपातज्वराकृतिः अथभेदाःत्रयोदशसंनिपाताः तेषांसंप्राप्तिमाह अम्लस्निग्धोष्णतीक्ष्णैःकटुमधुरकषा
तापसेवाकषायैः कामक्रोधातिरूक्षैर्गुरुतरपिशिताहारसौहित्यशीतैः शोकव्यायामचिंताग्रहगणवनितात्यंतसंगप्रसंगैः प्रायः
कुप्यंतिपुंसांमधुसमयशरद्वर्षणेसन्निपाताः १ तेषांतंत्रांतरेनामानि संधिगश्चांतिकश्चैवरुग्दाहश्चित्तविभ्रमः शीतांगस्तंद्रिकः
प्रोक्तःकंठकुब्जश्चकर्णकः विख्यातोभग्ननेत्रश्चरक्तष्ठीवीप्रलापकः जिह्वकश्चेत्यभिन्यासःसंनिपातास्त्रयोदश २ तेषांदिनम
र्यादामाह संधिकेवासरास्सप्ताचांतिकेदशवासराः रुग्दाहेविंशतिर्ज्ञेयावह्न्यष्टौचित्तविभ्रमे पक्षमेकंतुशीतांगेतंद्रिकेपंचविंशतिः
विज्ञेयावासराश्चैवकंठकुब्जेत्रयोदश कर्णकेचत्रयोमासाभग्ननेत्रेदिनाष्टकं रक्तष्ठीवेदशाहानिचतुर्दशप्रलापके जिह्वकेषोडशाहा
निकुलाभिन्यासलक्षणं परमायुरिदंप्रोक्तंम्रियतेतत्क्षणादपि १ त्रयोदशानांपृथक्लक्षणान्याह पूर्वरूपकृतशूलसंभवंशोषवात
बहुवेदनान्वितं श्लेष्मतापबलहानिजागरंसंनिपातमितिसंधिकंवदेत् १ दाहंकरोतिपरितापनमाननोतिमोहंददातिवि
दधातिशिरःप्रकंपं हिक्कांकरोतिकसनंचसमाजुहोतिजानीहितंविबुधवर्जितमंतकाख्यं २ प्रलापपरितापनप्रबलमोहमांद्यश्रमः
परिभ्रमणवेदनाव्यथितकंठमन्याहनुः निरंतरतृषाकरःश्वसनकाससहिक्काकुलः सकष्टतरसाधनोभवतिहंतिरुग्दाहकः ३ यदिक
थमपिपुंसांसंजातंकायपीडाभ्रमदपरितापोमोहवैकल्यभावः विकलनयनहासोगीतनृत्यप्रलापीह्यभिदधतमसाध्यंकोपिचित्त
भ्रमाख्यं ४ हिमसदृशशरीरोवेपथुश्वासहिक्काशिथिलितसकलांगोखिन्ननादोल्पतापः क्लमथुदवथुकासःछर्द्यतीसारयुक्तःस्वरि

यो०र०
२१

नमरणहेतुः शीनगात्रभमावात् ५ प्रभूतालंद्रार्तिज्वरकफपिपासाकुलतरोभवेच्छामाशिद्धाष्टथुलकठिणाकंटकवना अनीसारश्वासक्लमथु
परितापश्रुतिरुजोभ्रशांकंठजाड्यंशमनमनिशांतंद्विकमिदं ६ शिरोर्तिकंठग्रहदाहमोहकंपज्वरोरक्तसमीरणार्तिः हनुग्रहस्तापविला
पमूर्छास्याल्कंठकुब्जः किलकष्टसाध्यः ७ प्रलापशूटनिर्हासकंठग्रहांगव्यथाश्वासकासप्रसेकप्रभावं ज्वरस्तापकर्णांतयोर्गलपीडाबुधाः
कर्णकंकष्टसाध्यंवदंति ८ अत्रमाधवः संनिपातज्वरस्यांतेकर्णमूलेसुदारुणं शोफः संजायतेतेन कश्चिदेवप्रमुच्यते १ ज्वरस्यपूर्वंज्वर
मध्यतोवाज्वरांततोवाश्रुतिमूलशोथः क्रमादसाध्यः खलुकृच्छ्रसाध्यः सुखेनसाध्योमुनिभिः प्रदिष्टः २ इतिमाधवः ज्वरबलो
पचितिः स्मृतिशून्यताश्वसः नभग्नविलोचनमोहितः प्रलपनभ्रमकंपनशोफवान्त्यजतिजीवितमाशुसभग्ननेत्रक ९ रक्तष्टीवीज्व
रवमित्यामोहमूर्छातिसारोहिक्काध्मानभ्रमणदवथुश्वाससंज्ञाप्रणाशः श्यामारक्ताअधिकरसनामंडलोत्थनरूपारक्तष्टीवी
निगदितइहप्राणहंताप्रसिद्धः १० कंपप्रलापपरितापनशीर्षपीडाप्रौढप्रभावपवमानपरोन्यचिंता प्रज्ञाप्रणाशविकलप्रचुर
प्रवादः क्षिप्रंप्रयातिपितृपालपदंप्रलापी ११ श्वसनकासपरितापविह्वलः कठिणकंटकरतातिजिह्वकः बधिरमूकबलहानिल
क्षणोभवतिकष्टतरसाध्यजिह्वकः १२ दोषत्रयस्निग्धमुखत्वनिद्रावैकल्यनिश्चेतनकष्टवाग्मी बलप्रणाशस्वसनादिनिग्रहो
भिन्नासउग्रोननुभूतुकस्कः १२ इतित्रयोदशाः योगरत्नाकरेकथिताः अथवंगसेनग्रंथेत्रयोदशभेदाकथितानाह
एकाल्बणास्त्रयस्तेस्युः धुल्वणाश्वतथोतिषट् त्र्युल्बणश्वभवेदेकोविज्ञेयः सतुसप्तमः १ प्रवृद्धमध्यहीनैस्तुवातपित्तकफैः
श्वषट् सन्निपातज्वरस्यैवंस्युर्विंशेषास्त्रयोदश २ तेषांनामानि विस्फारकश्चाशुकारिकंपनोबभ्रुसंज्ञकः शीघ्रकारीतथा
भल्लुः सप्तमः कूटपालकः १ संमोहः पालकश्चापियाताः ककचइत्यपि ततः कर्कटकः प्रोक्तस्ततोवैदारिकास्मृता २ त्रयोदशा
नांपृथक्लक्षणान्याह कासश्वासभ्रमोमूर्छाप्रलापोमोहवेपथुः पार्श्वस्यवेदजंभाकषायत्वंमुखस्यच वातोत्तरस्यरूपाणि
सन्निपातस्यलक्षयेत् भिषग्भिः संनिपातोयं आशुकारिप्रकीर्तितः २ जडतागद्गदावाणीरात्रौनिद्राभवस्यापि प्रसन्नध्येनय
नेवैवमुखमाधुर्यमेवच कफोत्तरस्यरूपाणिसंनिपातस्यलक्षयेत् मुनिभिः संनिपातोयंउक्तः कंपनसंज्ञकः २ वातापित्ता २१

65
1936

धिकोयस्यसंनिपातः प्रकुप्यति तस्यज्वरोमदस्तृष्णामुखशोषप्रमीलकः आध्मानारुचितंद्राश्वकासश्वासभ्रमश्रमाः मुनिभिर्बभ्रुना
मायंसन्निपातउदाहृतः ४ वातश्लेष्माधिकोयस्यसन्निपातः प्रकुप्यति तस्यशीतज्वरोमूर्छाक्षुत्तृष्णापार्श्वनिग्रहः शूलमुच्चिद्यमानस्यन
र्छाश्वासश्वजायते असाध्यः संनिपातोयंशीघ्रकारीतिकथ्यते नहिजीवत्यहोरात्रमनेनाविष्टविग्रहः ५ पित्तश्लेष्माधिकोयस्यसंनिपातः
प्रकुप्यति अंतर्दाहोबहिः शीतंतस्यतृष्णाचवर्धते तुद्यतेदक्षिणंपार्श्वमुरः शीर्षगलग्रहः ष्टीवनेकफपित्तेच कृच्छ्रात्कंठस्यदूयते विड्भेदश्वास
हिक्काचवर्धंतेसप्रमीलकः ऋषिभिर्भल्लुनामायंसंनिपातउदाहृतः ६ केचित्कल्पुरिनिपाठः सर्वैर्दोषैः प्रकुप्यंतिसंनिपातनिबोधये
त्रयाणामपिदोषाणासमरूपाणिलक्षयेत् त्रिदंडरूपमचलंस्तथैवाकुस्त्रिपादवत् यानिज्वरचिकित्सायांरूपाण्युक्तानिकृत्स्नशः तैः
सर्वैरेषसंपूर्णोविज्ञेयः कूटपालकः व्याधिर्योदारुणोयश्चवज्रशस्त्राग्निसन्निभिः केवलोश्वासपरमस्तब्धांगस्तब्धलोचनः त्रिरा
त्रौपरमेतस्यजंतोर्हरतिजीवितं तदवस्थांतुलंदृष्ट्वामूढोव्याहरतेजनः धर्षितोरक्षसैनूनं अवलोयांचरान्निशि अंबयाव्रततेकेचिद्यक्षिण्या
अत्सराक्षसैः पिशाचौगुह्यकैश्वैवतथान्येमस्तकेहितं कुलदेवार्चनादीनंधर्षितंकुलदैवतैः नक्षत्रपीडांअपरेगरकर्मेतिचापरे वदंतिसं
निपातंतुभिषजः कूटपालकं कूटस्थोजायतेदोषैर्बालिभिः कूटपालकः ७ अथप्रवृद्धमध्यहीनवातादिजनितसंनिपातज्वराणांलक्ष
णान्याह प्रवृद्धमध्यहीनैश्वसंनिपातोयदाभवेत् तस्यरोगास्तएवोक्तायथादोषबलाश्रयात् प्रलापायाससंमोहकंपमूर्छारतिर्भ्रमः ए
कपक्षविघातस्तुएलदत्रास्त्रिदोषणं एषसंमोहनोनाम्नासंनिपातः सुदारुणः ८ मध्यप्रवृद्धहीनैश्वसंनिपातोयदाभवेत् तस्यरोगा
स्तएवोक्तायथारोगबलाश्रयात् मोहप्रलापमूर्छाश्चमन्युकंपशिरोग्रहः कासश्वासोभ्रमस्तंद्रासंज्ञानाशोहृदिग्रहः स्त्रवेच्चोरक्तं
स्तजतिस्तंद्रास्यात्स्तब्धनेत्रता तत्राप्येतद्विषंशोस्यान्मृत्युरखांकनिवासरात् भिषग्भिः संनिपातोयंकथितः पालकाभिधः ९ हीनप्र
वृद्धमध्यैस्तुसंनिपातोयदाभवेत् तस्यदोषास्तएवोक्तयथादोषबलाश्रयात् हृदयंदह्यतेचास्यंयकृत्प्लीहसफुफुसः पच्यंतेत्यर्थ
मूर्धानः श्रवशोणितनिर्गमाः शीर्णदंतश्वमृत्युश्चतत्राप्येतद्विशोषणं भिषग्भिः संनिपातोयंयाम्यनामाप्रकीर्तिताः १० प्रवृद्धहीना
तिमध्यैश्वसंनिपातोयदाभवेत् तस्यरोगास्तएवोक्तायथादोषबलाश्रयात् प्रलापायाससंमोहकंपमूर्छारतिर्भ्रमाः मन्यास्तंभेनम

सुश्रुतनाप्येतद्विशेषणं ११ केचित्कर्कटकइतिपठंति मध्यहीनाधिकैर्यस्य सन्निपातोयदाभवेत् तस्यदोषास्तएवोक्तायथादोषबलाश्रयात्
अंतर्दाहविशेषोत्रब्रवीतुर्नचशाम्यते रक्तमालकैकैश्चलक्षतेमुखमंडलं यत्नेनाकर्षितश्लेष्माहृदयान्नप्रसिच्यते दूषणेवाहतंपार्श्वेस्तु
धतेस्वन्यतेहृदि प्रमील:श्वासहिक्काचवर्धतेतुदिनेदिने जिह्वादग्धाखरस्पर्शागलश्चैकेरिवावृत: विसर्गेनाभिजानातिकूजनसेचकपोतवत्
अतीवश्लेष्मणापूर्वं:शुष्ककंठोष्टतालुक: तंद्रीनिद्राभियोगार्तोहतपाणिर्हतद्युति: नचातिभजतेग्लानिंविपरीतानिचेष्टते अयंमते
चबकुष्या:सरक्तंष्ठीवतेल्यश: एषककोटकोनाम्नासंनिपात:सुदारुण: १२ हीनमध्याधिकैर्यस्यवातपित्तकफै:क्रमात् सन्निपात
प्रभवतिपीडयंदोषदर्शयन् अल्पशूलकटीतोदोमध्येदाहरुजाभ्रम: भृशांक्लम:शिरोवक्त्रमन्याहृदयवाकरुज: प्रमीलक:श्वा
सहिक्कासञ्जाभ्रविसंज्ञिता: प्रमीथेत्यल्पमेतत्तुसाधयेन्नकदाचन एतस्मिन्संनिपातेतुकर्णमूलेसुदारुण: पिटिकाजायतेजंतो
र्यथारुक्षेणजीवति सर्वदारिककर्णोयंसंनिपात:सुदारुण: त्रिरात्रात्परमेतस्यव्यर्थमौषधकल्पनं १२ इतित्रयोदशभेद: अथसं
निपातज्वरस्यअसाध्यलक्षणमाह दोषेविवृद्धेनष्टेग्नौसर्वसंपूर्णलक्षण: सन्निपातज्वरोसाध्य:कृच्छ्र:साध्यस्ततोन्यथा २६ हेतुभि
र्बहुभिर्जातोबहुभिर्बहुलक्षण: ज्वर:प्राणांतकृद्यश्चशीघ्रमिंद्रियनाशन: २७ ज्वरक्षीणस्यशूनस्यगंभीरोदैर्घ्यरात्रिक:असा
ध्योबलवान्यश्चकेशसीमंतकृज्ज्वर: २८ गंभीरस्तुज्वरोज्ञेयोह्यंतर्दाहेनतृष्णया अनद्धत्वेनदोषाणांश्वासकासोद्गमेनच २९ आरं
भाद्विषमोयस्ययश्चवादैर्घ्यरात्रिक: क्षीणस्यचातिरूक्षस्यगंभीरोहंतिमानवं ३० विसंज्ञ:सन्यतेयस्तुशीतेनिपतितोपिवा शी
तार्दितोंतरुष्णश्चज्वरेणम्रियतेनर: ३१ योहृष्टरोमारक्ताक्षोहृदिसंघातशूलवान् वक्त्रेणचैवोच्छ्वसितितंज्वरोहंतिमानवं ३२ हि
क्काश्वासतृषायुक्तंमूढंविभ्रांतिलोचनं संततोच्छ्वासिनंक्षीणंनरंक्षपयतिज्वरं ३३ हतप्रभेंद्रियंक्षाममरोचकनिपीडितं गंभीरती
क्ष्णवेगार्तंज्वरितंपरिवर्जयेत् ३४ स्वेदोललाटेहिमवान्नरस्यशीतार्दितस्यातिसुपिच्छस्वेदे कंठस्थितोयस्यनयातिवक्षोन्नूनं
यमस्यैतिगृहंसमर्त्य: ३५ अथअसाध्यसंनिपातानांदिनमर्यादामाह सप्तमीद्विगुणायावन्नवम्येकादशीतथा एषात्रिदोषम
र्यादामोक्षायचवधायच ३६ पित्तकफानिलवृद्ध्यादशादिवसद्वादशाहसप्ताहात् हंतिविमुंचतिपुरुषंत्रिदोषजोधातुमलपाकात् ३७ ३२

67
1136

अथधातुपाकलक्षणमाह निद्रानाशोहृदिस्तंभोविष्टंभोगौरवारुचि अरतिर्बलहानिश्चधातूनांपाकलक्षणं ३९ संबाध्यमानोहृदिना
भिदेशेगात्रेषुचापाकरुजायतेपुष्पीडांज्वरार्तोंगुलिभिश्चगच्छेत्सधातुपाकेकथितोभिषग्भि: ४० वैषम्य नाभेरूर्ध्वंहृदोधस्तात्पीड्यते
चेद्व्यथीभवेत् धातोपाकंविजानीयादन्यथातुमलस्यच इतिभावप्र० अथदोषपाकलक्षणं दोषप्रकृतिवैकृत्यंलघुताज्वरदेहयो:
इंद्रियाणांचवैकल्यंदोषाणांपाकलक्षणं ४० शब्दादिंद्रियपंचकस्यपटुतावह्नेश्चयत्क्रमात्तृष्णादिप्रशमोज्वरस्यमृदुतातंदोषप
क्वंवदेत् ४१ हृल्लास्योरतिवेदनातिसरणस्तीव्रोज्वरस्तृष्णद: श्वासाधिक्यमरोचकोरतिरतिस्यात्स्मातुपाकाकृति: ४३ अथआगंतु
कज्वरलक्षणमाह अभिचाराभिघाताभ्यांअभिषंगाभिशापत: आगंतुर्जायतेदोषैर्यथास्वंतंविभावयेत् ४२ भूतादोषधिगंधाच्चभया
च्छोकाद्विषेणच कामाक्रोधाच्चजातोय:सोभिषंगज्वर:स्मृत: ४४ श्यावास्यताविषकृतेतथातीसारएवच भक्तारुचि:पिपासाचतोदश्च
सहमूर्छया ४५ औषधीगंधजोमूर्छाशिरोरुग्वमथुस्तथा: कामजोचित्तविभ्रंशस्तंद्रालस्यमरोचकं ४६ हृदयेवेदनाचास्यगात्रंचपरि
शुष्यति भयात्प्रलाप:शोकाच्चभवेत्कोपाच्चवेपथु: ४७ अभिचाराभिशापाभ्यांमोहस्तृष्णाचजायते भूताभिषंगादुद्वेगोहास्यरोदनकंप
नं ४८ कामशोकभयाद्वायु:क्रोधात्पित्तंत्रयोमला: भूताभिषंगात्कुप्यंतिभूतसामान्यलक्षणा: ४९ अथविषमज्वराणांलक्षणमाह
प्रशाकयाभिघातोत्थश्चैलनाप्रभवस्तुय: राशाद्धा:पहूस्तकालेषुप्रोरितेषुयथापुरा ५० प्रसह्यविषमोप्येतिमानवंबहुधाज्वर: सन्ना
पिविषमोदेहंनकदाचिद्विमुंचति ५१ यस्माद्गौरववैवर्ण्यकार्श्येभ्योनविमुंचति वेगेतिसमतिक्रांतेगतोयमितिचस्यते ५२ शिरसे
गौरवंग्लानिर्नातिश्रद्धातिभोजने माधुर्यमतिवैरस्यंतिक्तत्वमथवापुन: ५३ वक्त्रस्यजायतेयस्मात्सवेशोविगतेसति तस्मात्तुनिय
तोज्ञेयश्चारीरेविषमज्वरे ५४ धात्वंतरस्थोतिलीनत्वान्नसूक्ष्मादुपलभ्यते अल्पदोषेंधनक्षीण:क्षीणेंधनवदनल: ५५ दोषोल्पोहि
तसंभूतोज्वरोत्सृष्टस्यवापुन: धातुमन्यतमंप्राप्यकरोतिविषमज्वरं ५६ कश्चिदुष्णेनशीतेनकश्चिद्रात्रौकश्चिद्दिवा प्रशमंयातिकोप
तज्वर:सविषम:स्मृत: ५८ संतत:सततोन्येद्यु:स्तृतीयकचतुर्थकौ पंचैतेविषमाख्याता:सन्निपातोल्बणोद्भवा: ५९ तंत्रांतरे
ज्वरा:पंचमथोकावेश्चसंततकादय: चत्वार:सततंहित्वाज्ञेयास्तेविषमज्वरा: १ एकद्वित्रिचतुर्थस्याद्विषमोन्यस्तिजीर्णक: एतेपंच

यो०१०
२२

ज्वराश्चैवपीडंतिवडुवासरं २ आंतकमुक्तेरुद्मानाश्रयाणांविमुक्तपथ्याकृचितक्रियाणां अल्पोपिदोषोविषमंविदध्यात्ज्वरंविवृक्षंस्
लिपक्षरुक्षं २ अथधातुगताः विषमज्वराः कथ्यंते संततोरसधातुस्थोरक्तस्थःसततोमलः ज्वरःसंभवतीन्दृणांसोन्येद्युः पिशिताश्रितः ६०
मेदोगतस्तृतीयेन्हि अस्थिमज्जागतःपुनः कुर्याच्चातुर्थिकंघोरं अंतकंरोगसंकरं ६१ एषांकालानुवर्तित्वेनलक्षणमाह सप्ताहंवाद्दशाहंवा
द्वादशाहमथापिवा संतत्यागोविसर्गीस्यात्संततःसंनिगद्यते ६२ अहोरात्रेसततकौद्वौकालावनुवर्त्तते अन्येद्युकस्त्वहोरात्रेमेककाले
प्रवर्त्तते ६३ तृतीयकस्तृतीयेह्निचतुर्थेह्निचतुर्थकः इत्याद्यस्तुविज्ञेयाज्वरानानाविधाबुधैः केचिद्भूताभिषंगोत्थंवदंतिविषमज्वरं
६४ यथादोषंप्रकोपंतुतथामन्येतुतंज्वरं यथावेगागमेवेलांछापड्यात्मामहोदधेः वेगहानौतदेवांभःतत्रैवांतर्विलीयते दोषवेगोदये
तद्वदुदीर्यतेज्वरस्तुतु वेगहानौप्रशाम्येतयथाभःसागरेतथा ६७ श्लेष्मप्रायस्तुपूर्वाह्नेप्रदोषेचप्रवर्त्तते पित्तप्रायस्तुमध्याह्नेत्वर्धरा
त्रेप्रवर्त्तते अपराह्णेनिलप्रायःप्रत्यूषस्यापिवर्त्तते तत्रैवावातुविषमोज्वरःसमुपजायते कफपित्तेनिश्लिष्टेचेष्टयत्यनिलादयः तस्मा
त्तत्रैनिलाद्रोगाःसंभवंतिज्वरादयः ६९ श्लेष्मप्रायस्तुविषमःशीतपूर्वंप्रजायते पित्तप्रायस्तुविषमोदाहपूर्वंप्रजायते वातप्रायस्त
नियतेकालेसमुपजायते कृत्वाविविधदेहस्याक्षिप्रवेपथुमुत्तमं श्लेष्मपित्तेविदह्येतेरसस्थानेयदानिलः तस्मिन्कालेमनुष्याणांविषमोजा
यतेज्वरः ७२ कफपित्तात्त्रिकग्राहीपृष्ठाद्वातकफात्मकः वातपित्ताच्छिरोग्राहीत्रिविधास्यात्तृतीयकः ७३ चातुर्थिकोदर्शयतिप्रभावं
द्विविधंज्वरः जंघाभ्यांश्लैष्मिकःपूर्वंशिरसोनिलसंभवः ७४ विषमज्वरएवान्यश्चातुर्थिकविपर्ययः समध्येज्वरयत्यह्निआद्यंतेचवि
मुंचति ७५ विदग्धेन्नरसेदेहेश्लेष्मपित्तेव्यवस्थिते तेनार्धंशीतलंदेहंचार्धमुष्णंचजायते कायेदुष्टंयदापित्तंश्लेष्माचांतेव्यवस्थितः
तेनोष्णत्वंशरीरस्यशीतत्वंहस्तपादयोः कायेश्लेष्मायदादुष्टःपित्तंचांतेव्यवस्थितं शीतत्वंतेनगात्राणामुष्णत्वंहस्तपादयोः ७८
त्वक्स्थौश्लेष्मानिलौशीतमादौजनयतोज्वरं तयोःप्रशांतयोःपित्तंअंतेदाहंकरोतिच ७९ करोत्यादौतथापित्तंत्वक्स्थंदाहमतीवच
तस्मिन्प्रशांतेवितरौकुरुतःशीतमंततः ८० द्वावेतौदाहशीतादिज्वरौसंसर्गजौस्मृतौ दाहपूर्वस्तयोःकष्टःकृच्छ्रसाध्यमतश्चसः
८१ अथरसादिसप्तधातुगतज्वराणांलक्षणमाह गुरुताहृदयोत्क्लेशःसदनंछर्द्यरोचकौ रसस्थेन्ज्वरेलिंगंदैन्यंचास्योपजायते २२

69
1936

रक्तनिष्ठीवनंदाहोमोहश्छर्दनविभ्रमौ प्रलापःपिडिकातृष्णारक्तप्राप्तेज्वरेनृणां ८२ पिडिकोद्वेष्टनंतृष्णासृष्टमूत्रपुरीषता ऊष्मांतर्दाहविक्षे
पौग्लानिःस्यान्मांसगेज्वरे ८३ भृशंस्वेदःस्तृषामूर्छाप्रलापश्छर्दिरेवच दौर्गंध्यारोचकौग्लानिर्मेदस्थेचासहिष्णुता ८४ भेदोस्थ्नांकू
जनंश्वासोविरेकश्छर्दिरेवच विक्षेपणंचगात्राणामेतदस्थिगतेज्वरे ८५ तमःप्रवेशनंहिक्काकासःशैत्यंवमिस्तथा अंतर्दाहोमहाश्वा
सोमर्मछेदश्चमज्जगे ८६ मरणंप्राप्नुयात्तत्रशुक्रस्थानगतेज्वरे शेफसस्तब्धतामोक्षःशुक्रस्यतुविशेषतः ८७ उक्तज्वराणांअंतर्वे
गबहिर्वेगलक्षणमाह अंतर्दाहोधिकस्तृष्णाप्रलापःश्वसनभ्रमः संध्यस्थिशूलमस्वेदोदोषवर्चोविनिग्रहः अंतर्वेगस्यलिंगानिज्वरस्यै
तानिलक्षयेत् संतापोभ्यधिकोबाह्यस्तृष्णादीनांचमार्दवं बहिर्वेगस्यलिंगानिसुखसाध्यत्वमेवच ८९ अथकालभेदेनज्वराणांलक्षणमाह
वर्षाशरद्वसंतेषुवाताद्यैःप्राकृतःक्रमात् वैकृतोन्यःसदुःसाध्यःप्राकृतश्चानिलोद्भवः ९० वर्षासुमारुतोदुष्टःपित्तश्लेष्मान्वितोज्वरं कु
र्यात्पित्तंचशरदितस्यचानुबलःकफः तत्प्रकृत्याविसर्गाच्चतत्रनानशनाद्भयं कफोवसंतेतमपिवातपित्तंभवेदनु कालेयथास्वंसर्वेषां
प्रवृत्तिर्वृद्धिरेवच निदानोक्तोनुपशयोविपरीतोपशायिता ९४ चिकित्साविशेषार्थं आमज्वरलक्षणमाह लालाप्रसेकोहृल्लासोहृद
याशुध्यरोचकं तंद्रालस्याविपाकश्चवैरस्यंगुरुगात्रता क्षुन्नाशोबहुमूत्रत्वंस्तब्धताबलवान्ज्वरः आमज्वरस्यलिंगानिनदद्यात्त
भेषजं भेषजंह्यामदोषस्यभूयोजनयतिज्वरं शोधनंशमनीयंचकरोतिविषमज्वरं ९७ अथपच्यमानज्वरलक्षणमाह ज्वरवेगो
धिकस्तृष्णाप्रलापःश्वसनभ्रमः मलप्रवृत्तिरुत्क्लेशःपच्यमानस्यलक्षणं ९८ अथनिरामज्वरलक्षणमाह क्षुत्क्षामतालघुत्वंचगा
त्राणांज्वरमार्दवं दोषप्रवृत्तिरुत्साहोनिरामज्वरलक्षणं ९९ अथज्वरमुक्तलक्षणमाह स्वेदोलघुत्वंशिरसःकंडूःपाकोमुखस्यच
क्षवथुश्चान्नकांक्षाचज्वरमुक्तस्यलक्षणं १०० दाहस्वेदोभ्रमातृष्णाकंपोविड्भेदसंज्ञिता कूजनंचाप्तिवैगंध्यमाकृतिर्ज्वरमोक्षणे विगत
क्लममोहंचस्वस्थ्यंविमलेंद्रियं युक्तंप्रकृतिसत्वैश्चतंविद्याद्विगतज्वरं १०२ अथपुनर्ज्वरप्राप्तिमाह ज्वरमुक्तस्यविद्यापिशिरो
क्लैब्यमुंचति अविमुक्तस्यविज्ञेयोज्वरःपुनरुपैतितं २ अथज्वरदशानियममाह आसप्तरात्रंतरुणंज्वरमाहुर्मनीषिणः मध्यंचतु
र्दशाह्निचपुराणमतउत्तरं त्रिसप्ताहेव्यतीतेतुदोषेचतनुतांगते जीर्णसंज्ञांसलभतेज्वरेदेयंतदौषधं ५ इतिज्वरनिदानंसमाप्तं

यो०२० २४

अथातोज्वरचिकित्सितंव्याख्यास्यामः ज्वरादौलंघनंपथ्यंज्वरमध्येचपाचनं ज्वरांतेरेचनंप्रोक्तंमनेन्ज्वरचिकित्सितं १ आदौभागमशि
ञापादद्वितीयेपित्तनाशनं तृतीयेकफनाशायचतुर्थेवातनाशनं पंचमेचक्षुधोत्पत्तिः षष्ठेचलघुगात्रता सप्तमेज्वरपाकस्यादष्टमे
ज्वरनाशनं नवमेसर्वदोषघ्नंलंघनंकथ्यतेबुधैः भक्ताकांक्षालाघवंग्लानिः स्वच्छतासुप्रसन्नता उपद्रवनिवृत्तिश्चसम्यग्लंघितलक्षणं
निद्रातंद्राश्रमोक्लांतिः तृष्णाशोषौबलक्षयः उपद्रवाश्चश्वासाद्याः संभवंत्यतिलंघिते नवज्वरेदिवास्वप्नस्नानाभ्यंगान्नमैथुनं क्रोधप्र
वातव्यायामकषायांश्चविवर्जयेत् अथकंदनात् ज्वरेलंघनमेवादौउपदिष्टमृतेज्वरात् क्षयानिलभयक्रोधकामशोकश्रमोद्भवात् १
आमाशयस्थोहत्वाग्निंसामोमार्गान्पिधायच विदधातिज्वरंदोषः तस्मात्कुर्वीतलंघनं २ अनवस्थितदोषाग्नेर्लंघनंदोषपाचनं ज्वरघ्नं
दीपनंकांक्षारुचिलाघवकारणं ३ प्राणाविरोधिनाचैनंलंघनेनोपपादयेत् बलाधिष्ठानमारोग्यंयदर्थोयंक्रियाक्रमः ४ अथरत्ना
करोक्तं नलंघयेन्मारुतजेज्वरेचक्षयोद्भवेचक्षुधितेचजंतौ नगुर्विणी दुर्बलबालवृद्धान्भीतांस्तृषार्तांनपिसोर्ध्ववातान् दोषाणा
मेवसाशक्तिर्लंघनेयासहिष्णुता नहिदोषक्षयेकश्चित्सहतेलंघनंमहत् २ वातजः सप्तरात्रेणदशरात्रेणपित्तजः श्लेष्मजोद्वा
दशाहेनज्वरःपाकंप्रपद्यते ३ सप्ताहेनतुपच्यंतेसप्तधातुगतामलाः निरामश्चाप्यतःप्रोक्तोज्वरःप्रायोष्टमेहनि ४ अथवृद्ध
वाग्भटे सर्वज्वरेषुदातव्यःकषायःसप्तमेहनि अथवालंघयेत्तावद्यावदारोग्यदर्शनं १ क्वाथवाचकस्यकषायस्यलक्षणमाह
पादशिष्टःकषायस्यात्वयःषोडशगुणांभसा क्वथितोतःषडंगादिर्ननिषेधोनवज्वरे १ अयमर्थः यःक्वाथद्रव्यात्षोडशगु
णेनांभसाक्वथितःपक्वः अथचपादशिष्टः चतुर्थभागावशेषःकषायःस्यात् केचित्अष्टभागावशेषकरणेनवायःकषायः
स्यात्सर्वजस्तरुणज्वरेइतिकषायरसश्चस्यात्सक्वाथः तरुणज्वरेनिषिद्धः षडंगानिस्तरुणज्वरेननिषिद्धः अपाकादर्धपाका
द्वोक्तलक्षणभावेनकषायत्वाभावात्इति नकषायंप्रशंसंतिकदाचित्तरुणेज्वरे कषायेनाकुलीभूतादोषाजेतुंसुदुस्तराः २ अ
थविदेहः सर्वज्वरेषुसप्ताहेमात्रावल्लघुभोजयेत् वेगापयोन्यथातासिज्वरवेगंविवर्धयेत् १ क्षुत्संभवतिपक्वेषुदोषधातु
मलेषुच कालेवायदिवाकालेसोन्नकालउदाहृतः २ अथवाग्भटः ज्वरितंज्वरमुक्तंवादिनांतेभोजयेल्लघु श्लेष्मक्षयेप्रवृत्तो २४

71/1936

भाबलवाननलस्तदा १ यथोचितेथवाकालेदेशसात्म्यनुरोधतः प्रागल्पवह्निर्भुंजानोनह्यजीर्णेनपीड्यते २ कषायपानपथ्यान्नैर्दश
हइतिलंघिते ऊष्मापित्तादृतेनास्तिज्वरोनास्त्यूष्मणोविना तस्मात्पित्तविरुद्धानित्यजेत्पित्ताधिकेधिकं स्नानाभ्यंगप्रमेहांश्चपरिशेषं
चलंघने ४ अजीर्णद्रवशूलघ्नंसामेतीव्ररुजिज्वरे नापिबेद्दोषधंतास्मिन्पथ्यपेयामभावहेत् ५ नवज्वरेमलस्तंभात्कषायोविषमज्वरं कु
रुतेरुचिहृल्लासहिध्माध्मानादिकानपि ६ सप्ताहाद्दोषधंकेचिदाहुरन्येदशाहतः केचिल्लंघनभुक्तस्यदेयामासोल्बणेनतु तीव्रज्वर
परीतस्यदोषवेगोदयेयतः दोषेथवातिनिचितेतंद्रास्तैमित्यकारिणी ८ अपच्यमानंभैषज्यंभूयोजनयतिज्वरं मृदुर्ज्वरोलघुर्देहश्चलि
ताश्चमलायदा अचिरज्वरितस्यापिभेषजंयोजयेत्तदा अथवृद्धवाग्भटः षड्दशाद्वादशाहेषुव्यतीतेष्वक्रमेणवैः वातपित्तकफार्तके
कल्कालइमेत्रयः द्वंद्वजेसंनिपातेचबाधावारोग्यदर्शने सन्निपातज्वरहृष्टादिकल्पयेदतिनैपुणात् २ मुद्गान्मसूरांश्चणकान्कुलत्था
न्समकुष्टकान्त्याचकयूषहेतून् हिताहितानांविहितांश्चपेयांदेयांयवाग्रमपिपाचनैः स्वैः अथचक्रदत्तात्ज्वरेविचारः निर्वातभवना
वाससुखवारिनिषेवणं अमृरिजल्पंनिःक्रोधंकामंशोकंचरोगिणां कुर्यादारोग्यसंपत्त्यैशाघ्रंवैद्योविचक्षणः उष्णोदकविचारः कफमे
दानिलामघ्नंदीपनंबस्तिशोधनं कासश्वासज्वरहरंपथ्यमुष्णोदकंसदा यत्क्वाथमानंनिर्वेगंनिःफेनंनिर्मलंभवेत् अर्धावशिष्टंभवति
उष्णोदकमुच्यते तत्पादहीनंवातघ्नमर्धहीनंतुपित्तनुत् त्रिपादहीनंश्लेष्मघ्नंपाचनंदीपनंलघु द्वंद्वजेसंनिपातेचज्वरेपथ्यंतदातिजित्
शरदीचार्धपादोनंपादहीनंतुहेमंते शिशिरेचवसंतेचग्रीष्मेचार्धावशेषितं विपरीतेकृतौतद्वत्प्रावृष्यष्टावशेषितं भिन्नतिश्लेष्मसं
घातंमारुतंचापकर्षति अजीर्णंजरयत्याशुपीतमुष्णोदकंसदा धारापातेनविष्टंभीदुर्जरंपवनाहतं शृतशीतंत्रिदोषघ्नंबाह्यांतर्भान
शीतलं दिवाशृतंतुयत्तोयंरात्रौतत्कुरुतांवजेत् रात्रौशृतंतुदिवसेगुरुत्वमधिगच्छति तथायःपिंडसंसिक्तंलोष्टनिर्वापितंजलं स
र्वदोषहरंपथ्यंसदानैरुज्यकारकं उष्णीकृतंजलंपथ्यंदोषवृद्धकासजिल्लघु शृतशीतंजलंशीतंत्रिदोषशमनंलघु नवज्वरेप्रति
श्यायेपार्श्वशूलेगलग्रहे सद्यःशुद्धौतथाध्मानेव्याधौवातकफोद्भवे अरुचिग्रहणीगुल्मश्वासकासेषुविद्रधौ हिक्कायांस्नेहपा
नेचपिबेदुष्णजलंनरः अरोचकेप्रतिश्यायेप्रसेकेश्वयथौक्षये मंदाग्नावुदरेकुष्ठेज्वरेनेत्रामयेतथा व्रणेचमधुमेहेचपानीयंमंद

माचरेत् मूर्छापित्तोभ्रमदाहेषुविषमेचमदात्यये भ्रमक्लमपरीतेषुमार्गोत्स्वक्रमथोतथा ऊर्ध्वगेरक्तपित्तेचशीतमंभः प्रशस्यते पानीयंश
नीयंशारदिवसंतेचपानीयं नादेयंनादेयंशारदिवसंतेचनादेयं पानीयस्फटिका पानीयंजलंशारदिपानीयंपानाहेभवतिनिर्मलत्वात्
त्रिदोषघ्नत्वात्त्रिदोषघ्नः पित्तोपशांतिहेतुत्वाच्च वसंतेचपुनस्तदेवपानीयंजलंपानीयंरक्षणीयंअल्पंपेयमितिभावः पारक्षणेइत्यस्यधातोः
नदीभवंनादेयंजलंशारदिनअदेयमितिन अपितुदेयंदातव्यमित्यर्थः वसंतेचनादेयंजलंनग्राह्यमितिवाक्यार्थः १ तंत्रांतरे अनमौषिहि
तेरोगेशिरासंध्यस्थिवातजे वर्षावसंतसमयेकौपवारिप्रशस्यते अंभः शारदितडागंचनादेयंमृतुषु उत्तमस्यपलंमात्रात्रिभिरेवैश्चमध्यमा
जघन्यस्यपलार्धेनस्नेहक्वाथौषधेषुच कर्षश्चूर्णस्यकल्कस्यगुटिकानांचसर्वशः द्रवशुक्त्यावलेढव्यः पातव्यश्चचतुर्द्रवः मात्रामधुघृता
दीनांक्वाथस्नेहेषुचूर्णवत् द्विचत्वारिंशतामाषैरष्टादशाक्वथर्धकैः पलंद्वादशावर्धस्याद्गुंजाषट्कसमन्वितः क्वाथ्यद्रव्यपलंवारिहिरष्ट
गुणमिष्यते चतुर्भागावशेषंतुपेयंपलचतुष्टयं दीप्तानलंमहाकायंपाययेदंजलिंजलं अन्येत्वर्धपरित्यज्यप्रस्तंतंतुचिकित्सकः क्वाभत्या
गमनिर्दंतस्त्वष्टभागावशेषितं पारंपर्योपदेशेनस्वर्धवैद्याः पलद्वयं पाययेदातुरंसामेपाचनंसप्तमेहनि अथऔषधाद्यजीर्णे अन्नंनशस्तं
तत्रविचारः वीर्याधिकंभवतिभेषजमन्नहीनंहन्यात्तथामयमसंशयमाशुचैव तद्बालवृद्धयुवतीमृदवोपनपीयग्लानिंपरांसमुपयांतिव
लक्षयंच अनुलोमानिलस्यास्थ्यंक्षुत्तृष्णाकुमनस्कता लघुत्वमथचोद्गारः शुद्धजीर्णौषधाकृतिः अथाजीर्णऔषधलक्षणं क्लमोदा
हांगसदनंभ्रमोमूर्छाशिरोरुजः अरतिर्वमनंमोहः अजीर्णौषधवैकृतिः औषधशेषेभुक्तंपीतंवथौषधशेषेन्नं नकरोतिगदोपशमंप्रको
पयतन्यरोगांश्च शीघ्रंविपाकमुपयात्यबलंनिहन्यदन्नावृतंनचपुनर्वदनान्निरेति प्राग्भक्तसेवितमथौषधमेतदेवदद्याच्चभीरुशिशुवृद्ध
वरांगनाभ्यः इतिसर्वज्वरोपक्रमः अथऔषधग्रहणविचारः तत्रोपविश्यविश्रांतः प्रसन्नवदनेक्षणः औषधंहेमरजतमृद्भाजनप
रिस्थितं पिबेत्प्रसन्नवदनः पीत्वापात्रमधोमुखं निक्षिपपात्रेसलिलंनांश्लाद्युपकल्पयेत् यमदूतपिशाचाद्यायक्षगंधर्वराक्षसाः
तेघ्नंत्यौषधवीर्याणिअतोगंडूषवर्जनं ३ अथपाचनलक्षणं यत्पचत्याममाहारंपचेदामरसंचयत् यदपक्वान्पचेद्दोषानतस्तद्दिपाचन
मुच्यते संशोधयतियद्दोषान्सामान्नोदीरयत्यपि समीकरोतिसंवृद्धांस्तत्संशमनमुच्यते २ इतिपाचनशमनंतयोः संप्रदानकालमाह ३५

73/1936

पाययेदातुरंसामेपाचनंसप्तमेदिनं शमनेनाथवादृष्ट्वाविरामंसमुपाचरेत् १ तत्रादौवातज्वरचिकित्सा गुडूचीपिप्पलीमूलनागरैःपाचनंस्म
धा तं दा[illegible]दातज्वरेचूर्णलिंगेसप्तमवासरे १ विश्वभेषजकैरातकुरुविंदगुडूचिकाः पाचनंस्मृतमेतेषांदेयंपवनजेज्वरे २ इतिपाचनं किराताब्द
मृतोदीच्यबृहतीद्वयगोक्षुरैः सस्थिराकलशीविश्वैःक्वाथोवातज्वरापहः १ इतिकिरातादि शालिपर्णीबलारास्नागुडूचीसारिवातथा आसां
क्वाथंपिबेत्कोष्णंतीव्रवातज्वरापहं २ काश्मरीसारिवाद्राक्षात्रायमाणामृतोद्भवः कषायःसगुडःपीतोवातज्वरविनाशनः ३ पिप्पलीसारि
वाद्राक्षाशतपुष्पाहरेणुभिः कृतःकषायःसगुडोहन्यात्पवनजंज्वरं ४ गुडूचीसारिवाद्राक्षाशतपुष्पापुनर्नवा सगुडोपंकषायःस्याद्वातज्व
रविनाशनः ५ गुडूच्यतिविषामुर्वामंजिष्ठाधन्वयासकैः वासाखदिरनिंबैश्चापिबेत्क्वाथंतुवातिके ६ मरिचंरुचकंशुंठीकिरातंचहरीतकी
पिप्पलीकटुकाचैववातज्वरविनाशनं ७ त्रिफलाव्योषसगुडःशर्कराप्रितार्धकं मोदकंभक्षयित्वातुपिबेच्चोष्णंजलंपुनः पार्श्वशूलेरुचौ
कासेज्वरेचानिलसंभवे ८ इतित्रिफलामोदकः उशीरकलशीमहौषधिकिरातकांभोधरस्थिराबृहतिकाद्वयामृतलतात्रिकंटकैः कृतं
कषायंकिममुंपिबेत्पवनज्वरव्याकुलः पुमान्दशाशतच्छदच्छदलसल्लोचने १ इतिवैद्यजीवनात् विश्वागुडूचीघनदेवदारुशृंगीसरास्नाक
टुकीकषायः सिंहीद्वयंरुजेयंनीसभार्गीवातज्वरारण्यकृशानुरेव १ इतिवैद्यविलासात् अथपित्तज्वरचिकित्सा कटुकलेंद्रयवावशातिक्ता
मुस्तैःशृतंजलं पाचनंचदमोक्षिःस्यात्तीव्रेपित्तज्वरेन्तृणां १ छिन्नलतापिचुमंदकधान्यविश्वनिशाजनितश्चकषायः पाचनकंगुडमिश्रितमे
वपित्तभवेज्वरएवहितेयं इतिपाचनं दुरालभापर्पटकाप्रियंगुभूनिंबवासाकटुरोहिणीनां क्वाथंपिबेच्छर्करयावगाढंतृष्णास्रपित्तज्वरदा
हयुक्तः १ द्राक्षाभयापर्पटकाब्दतिक्ताक्वाथंसशम्याकफलंविदध्यात् प्रलापमूर्छाभ्रमदाहशोषतृष्णान्वितेपित्तभवेज्वरेच २ एकःपर्पट
कःश्रेष्ठपित्तज्वरविनाशनः किंपुनर्यदियुंज्येतचंदनोशीरधान्यकैः ३ औदुंबरस्यनिर्यासःसितयादाहनाशनः छिन्नासारःसितायु
क्तःपित्तज्वरनिषूदनः ४ द्राक्षाचैवगुडूचीचमुस्तापर्पटकंतथा कटुकाचसमंक्वाथःपित्तज्वरविनाशनः ५ चंदनंचसुगंधिंचवालको
शीरपर्पटः मुस्ताशुंठीसमायुक्तोपित्तज्वरनिषूदनः ६ अहोकिमर्थंबहवःकषायाः पराशराद्यैर्मुनिभिःप्रदिष्टाः छिन्नाशिवापर्प
टनीयपानात्पित्तज्वरःकिंनसरीसरीति ७ जलजलजलवाहरेणुविश्वौषधशिशिरैःसहितंषडंगमेतत् सपदिसुखकरंसदासदा

यो०र०
२५

यज्वरतपिपीन्यभिदंनवज्वरेपि ८ अशीतवारिणाशीतामितायुक्तातुरोहिणी विदाहलदृष्णमान्वितंनिहंतिपित्तज्वरं ९ निंबपल्लवसंभृतर
सफेनप्रलेपनात् तद्दाहमोहाघशमंयांतिपित्तसमुद्भवा: १० केसरंमातुलिंगस्यमधुसैंधवसंयुतं जिह्वातालुगलक्लोमशोषेमूर्ध्निदापयेत्
११ औडुंबराशिफाछिन्नातज्जलंसितयान्वितं पीतंपित्तज्वरंहंतिपलोटोवाशिलाजतुं १२ अथकफज्वरचिकित्सा वीजपूरशिफापथ्यानागरं
ग्रंथिकैःसृतं सक्षारपाचनंश्लेष्मज्वरेद्वादशवासरे १ मुलानिमातुलिंग्याश्चपिप्पलीशृंगवेरयो: अजमोदस्यचक्काथ: सक्षौद्र: पाचन: कफे २
भूनिंबनिंबपिप्पल्य: शटीशुंठीशतावरी गुडूचीवृहतीचेतिकाथोहन्यात्कफज्वरं ३ पटोलत्रिफलातिक्ताशटीवासामृतोद्भव: काथोमधु
युत: पीतोहन्यात्कफकृतंज्वरं ४ वैद्यजीवनात् निदग्धिकाछिन्नरुहोपतुल्याश्चौषधै: साधितमंबुपीतं हंतिज्वरश्वासबलासकासश्र
लाग्निमांद्यजठरानिलंच ५ शृंगाकणाकट्फलपौष्कराणांक्षौद्रान्वितानांविहितोवलेह: श्वासेनकासेनयुतंबलासज्वरंजयेदत्रनकापिशं
का ६ इतिचातुर्भद्रादिअवलेह: भार्गीगुडूचीघनदारुसिंहीशुंठीकणापुष्करज:कषाय: ज्वरंनिहंतिश्वसनंक्षिणोतिस्कंधांकरोतिप्रसु
प्तिंतनोति ७ निंबनागरापिप्पल्यादेवदारुकिरातक: गुडूचीपुष्करंमूलंहितंकाथ:कफज्वरे ८ शटीपुष्करभार्गीचपाठाकट्फलदारुभि:
कटुत्रयेणशृंग्याचपिवेत्काथंकफज्वरे ९ कट्फलांबुदभार्गीभि: धान्यरोहिषपर्पटै: वचाहरीतकीशृंगीदेवदारुमहौषधै: काथ:कासज्व
रंहंतिश्वासश्लेष्मगलग्रहान् १० वैद्यविलासात् वासाविशालादशमूलगोरीमहौषधंपुष्करभार्ङ्गियुक्तं एषांकषायोविनिहंतिकास
कफज्वरंशूलविवर्धनंच १ अथवातपित्तज्वरचिकित्सा संसृष्टदोषेषुहितंसंसृष्टमथपाचनं वातपित्तज्वरेदेयंऔषधंपंचमेहनि १
किराततिक्तममृताद्राक्षामामलकंशटी निःकाथ्यसगुडंकाथंवातपित्तज्वरेपिवेत् २ छिन्नोद्भवापर्पटवारिवाहाभूनिंबशुंठीजनित:
कषा: समीरपित्तज्वरजर्जराणांकरोतिभद्रंकिलपंचभद्र: ३ पंचमूल्यमृतामुस्ताविश्वाभूनिंबसाधित: कषाय:शमयत्याशुवायु
मापुभवंज्वरं ४ त्रिफलाशाल्मलीरास्नाराजवृक्षाटरूषकै: सतमंबुहरेत्तूर्णंवातपित्तोद्भवंज्वरं ५ उशीरयष्टीमधुनिंबमिश्रंमुस्तंहरि
द्राद्वितयंपटोली आरग्वधश्चेविहित:कषायोसवातपित्तज्वरयुक्तजंतो: ६ पद्मकंमधुपुष्पाणियष्टीमध्वाटरूषकौ उशीरद्वितयं
द्राक्षानीलोत्पलदलानिच अवलाचविपेयोयंकाथ:कथितशीतल: वातपित्तज्वरंशोषंभ्लापंचयतोहरेत् ७ रास्नाफलामोच २५

75
1936

रसोविषाख्यागजांकुशोयंखलुवातपित्ते द्राक्षामृतादिंडुकमामलाचकिरातकोवागुडसंयुतज्ञ: १० निदग्धिकाबलारास्नात्रायमाणा
मृतायुतै: मसूरविदलै:काथोवातपित्तज्वरंजयेत् ११ व्याघ्रीभार्ङ्गीसिंहकाचरास्नादुस्पर्शेषाल्मलीराजवृक्ष: तद्बद्योवंत्रैफलंका
थएषांशास्त:कामंवातपित्तज्वरेच १२ अथवातश्लेष्मज्वरचिकित्सा वातश्लेष्मज्वरेदेयमौषधंसप्तमेहनि आरग्वधग्रंथिकमुस्ततिक्त
काहरीतकीभि: कथित:कषाय: सामेश्लेकफवातयुक्तेज्वरेहितोदीपनपाचनस्य १ किराततिक्तंमुस्तागुडूचीविश्वभेषजं चातु
र्जातकमित्याद्युर्वातश्लेष्मज्वरापहं २ इतिवृंदात् पिप्पलीपिप्पलीमूलंचव्यचित्रकनागरै: दीपनीय:स्मृतोवर्गोवातश्लेष्मज्वरापह:
१ पिप्पलीपिप्पलीमूलंचव्यचित्रकनागरं वचासातिविषाजाजीपाठावत्सकरेणुकं किराततिक्तकोमूर्वासर्षपामरिचानिच कट्फलंपुष्क
रंभार्ङ्गीविडंगंकर्कटाह्वयं अर्कमूलंवृहत्सिंहीश्रेयसीसदुरालभा दीप्यकश्चाजमोदाचसुकनासाकहिंगुका एतानिसमभागानिगणएषो
ष्टविंशति: एषांकाथोनिपीतस्याद्वातश्लेष्मज्वरापह: २ क्षुद्रामृतानागरपुष्कराह्वयै: कृत:कषाय:कफमारुतोत्तिरे सश्वासकासा
रुचिपार्श्वशूलेज्वरेत्रिदोषप्रभवेपिशस्यते ३ मुस्तापर्पटकंशुंठीगुडूचीसदुरालभा कफवातारुचिछर्दिदाहशोषज्वरापह: ४ भूनिं
बमुस्ताकुटकीगुडूचीदुरालभापर्पटनागराख्या: काथोनिलश्लेष्महरोवदंतिसूर्योयथानाशयतेंधकारं ५ कट्फलविश्ववचाघनपांस
धान्यशिवाजलशृंगीसुराह्वै: भार्ङ्गियुतै:कथनंकिलपेयंवातकफप्रगणोनतुचेष: १ इतिवैद्यवि० अथपित्तश्लेष्मचिकित्सा पित्त
श्लेष्मज्वरेदेयंऔषधंदशमेहनि गुडूचीनिंबधान्याकंचंदनंकटुरोहिणी गुडूच्यादिरयंकाथ: पाचनोदीपन:स्मृत: तृष्णदाहारु
चिछर्दिपित्तश्लेष्मज्वरापह: १ कंटकार्यमृताभार्ङ्गीविश्वेंद्रयवासकं भूनिंबचंदनंमुस्तंपटोलंकटुरोहिणी विपाच्यपाययेत्काथंपि
त्तश्लेष्मज्वरापहं दाहतृष्णारुचिछर्दिकासशूलनिवारणं २ अमृतारिष्टकटुकामुस्तेंद्रयवनागरै: पटोलचंदनाभ्यांचपिप्पली
चूर्णयुक्तस्मृतं अमृताष्टकमेतच्चपित्तश्लेष्मज्वरापहं छर्द्यरोचकहृल्लासदाहतृष्णानिवारणं ३ पटोलचंदनंमूर्वापाठातिक्तामृ
ताकणा: पित्तश्लेष्मज्वरंछर्दिदाहकंडुविषापह: ४ पटोलंपिचुमंदंचत्रिफलामधुकंबला साधितोयंकषाय:स्यात्पित्तश्लेष्म
भवेज्वरे ५ लोहितचंदनपद्मकधान्याछिन्नारुहापिचुमंदकषाय: पित्तकफज्वरदाहपिपासावांतिविनाशकुनाशकरस्यात् ६

यो०र०
३७

लाजैर्वातंडुलैर्भृष्टैर्लाजमंडप्रकीर्तितः श्लेष्मपित्तहरो ग्राही पिपासाज्वरजिन्मतः ७ इतिलाजमंडः सप्तच्छदपुष्पाणि सारसः क्षौद्रसितायु
तः कफपित्तज्वरं हंति सास्रपित्तं सकामलं १ इतिवृंदात् शर्करामक्षमात्रं च कटुकां तु च्छवारिणा पीत्वा ज्वरं जयेज्जंतोः कफपित्तसमुद्भवं
२ इतिवृं० त्रायंती मेघकटुकी रामसेन पटोलिका ज्वरे पित्तकफोपेते देयं दीपनपाचनं १ इतिवैद्यवि० जीरकं कारवेल्यं च शीतं प्रवं
ज्वरे हितं १ अथ संनिपातचिकित्सा संनिपातज्वरे पूर्वं कुर्यादामकफापहं पश्चात् श्लेष्माणि क्षीणे च शमयेत्पित्तमारुतौ १ अंशांशं
दोषाणां विवेकं नैव शक्नुयात् क्रियां साधारणीं तत्र विदधीत चिकित्सकः २ अथ वृंदात् लंघनं वालुकास्वेदो नस्यं निष्ठीवनं तथा
अवलेहांजनं चैव प्राक् प्रयोज्यं त्रिदोषजे १ त्रिरात्रं पंचरात्रं वा दशरात्रमथापि वा लंघनं संनिपाते च कुर्यादारोग्यदर्शनात् २ दोषा
णामेव सा शक्तिर्लंघने या सहिष्णुता न दोषमुक्तः कश्चिद्धि लंघनं सहते नरः २ कफपित्ते द्रवत्वाच्च सहते लंघनं महत् आमक्षयाद्ध्र्
मापि वायुर्न सहते क्षणात् ४ इतिवृं० रसस्थे रससंशुद्धिः रक्तस्थे रक्तमोक्षणं मांसस्थे रेचनं शस्त्रं भेदस्थे च रसाहिष्णुता रेचनं वमनं स्वेद
शास्थिस्थे स्वेदमर्दनं मज्जाशुक्रगताशायं दृष्ट्वा तमसाध्यं ज्वरं वदेत् २ क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् पूर्वस्यां शांतवेगा
यां न क्रियासंकरो हितः २ इतियोगर० तमायोलांछनं पंचनाल्वादिषु त्रिदोषजे रुद्राभिषेकभूदेवभोजनं ग्रहजाप्यतः मंत्ररक्षादिभिः
कार्या संनिपाते प्रतिक्रिया १ इतिभाव० अथ वालुकास्वेदः खर्परं भृष्टपटस्थितकांजिकसंसिक्तवालुकास्वेदः शमयति वातकफा
मयं मस्तकशूलांगभंगादीन् १ अथ नस्यं मातुलिंगार्द्रकरसं कोष्णं सलवणान्वितं अन्यद्वा सिद्धविहितं नस्यं तीक्ष्णं प्रयोजयेत् २
मधूकसारसिंधूत्थवचोषणकणाः समाः श्लक्ष्णं पिष्ट्वांभसा नस्यं कुर्यात्संज्ञाप्रबोधनं सैंधवं श्वेतमरिचं सर्षपाः कुष्ठमेव च बस्तमू
त्रेण पिष्टानि नस्यं तंद्रानिवारणं २ अथ निष्ठीवनं आर्द्रकस्वरसोपेतं सैंधवं सकटुत्रयं आकंठं धारयेदास्ये निष्ठीवेच्च पुनः पुनः
तेनास्य हृदयात् श्लेष्मा मन्यापार्श्वशिरोगलात् लीनोऽप्याकृष्यते शुष्को लाघवं चास्य जायते १ मातुलिंगफलकेसरोद्धृतः सिंधुजन्म
मरिचान्वितो मुखे हंति वातकफरोगमास्यकं शोषमाशु जडतामरोचकं १ वृंदात् अथ अवलेहः कट्फलं पुष्करं शृंगी कृष्णा च मधुना ३०
सह श्वासकासज्वरहरः श्रेष्ठो लेहः कफांतकः १ कट्फलं पौष्करं शृंगी व्योषं यासश्च कारवी श्लक्ष्णचूर्णीकृतं चैतन्मधुना सह लेहयेत्

77
1936

एषावलेहिका हंति संनिपातं सुदारुणं हिक्काश्वासं च कासं च कंठरोधं च घुर्घुरं रत्नधोज्यं कफोद्रेके चूर्णमार्द्रकजैरसैः १ अथ अंजनं शिरीष
बीजगोमूत्रकृष्णामरिचसैंधवैः अंजनं स्यात्प्रबोधाय सरसोनशिलावचैः १ कस्तूरीमरिचं वाजीलालाच मधुनांजनं तंद्रानिवारयत्याशु
पिचिरप्रवृत्तान्कृमीन्निहन्यात्कृमिजांश्चरोगान् १ अखुपर्णीदलैःपिष्टैःपिष्टकेनतुपूपिका भक्ष्याःसौवीरकंवापिपिबेत्कृमिहरं
परं १ पलाशबीजस्वरसोपिबेद्वाक्षौद्रसंयुतं पिबेत्तद्बीजकल्कंवातक्रेणकृमिनाशनं १ लिह्यात्सक्षौद्रविडंगंवाचूर्णंकृमिनिवारणं १
सुरसादिगणंवापिसर्वथैवोपयोजयेत् १ भक्ष्यंकटुकंतिक्तंभोजनंचहितंभवेत् मात्रेस्तुघृतप्रस्थंवापिपाचयेत् त्रिगुणेनगवांमूत्रे
रस्यंकृम्यामयापहं १ फलत्रयंवचादंतीत्रिवृत्कांपिल्लकैःसमैः सिद्धंसर्पिर्गवांमूत्रेपीतंकृमिविनाशनं १ इतित्रिफलाद्यंघृतं
त्रिफलायास्त्रयःप्रस्थाविडंगप्रस्थएवच दीपनंदशमूलंचलाभतःसमुपाहरेत् १ पादशेषेजलेद्रोणेशृतेसार्पिर्विपाचयेत् प्रस्थान्वि
तंसिंधुयुतंतत्परंकृमिनाशनं २ विडंगघृतमित्येतल्लेह्यंशर्करयासह सर्वकृमीन्प्रणुदतिवज्रमुक्तमिवासुरान् ३ इतिविडंग

यो०र०
७४

गयुतं पिप्पलीपिप्पलीमूलंसैंधवंकरुजीरकं भार्गीचित्रकतालीसपत्रकंनागकेसरं १ एषांद्विपलिकान्भागान्पंचसौवर्चलस्यच मारिचा
जाजिशुंठीनामेकैकस्यपलंपलं दाडिमांकुडवंचैवद्वेपलेचाम्लवेतसात् सर्वमेकत्रसंयोज्ययोजयेत्कुशलोभिषक् पिप्पल्यादिरियंख्यातं
नष्टवह्नेश्चदीपनं अर्शांसिग्रहणीगुल्ममुदरंसभगंदरं ४ कृमिकंडूरुचिहरंसुखयोष्णोदकेनच नातःपरतरंकिंचिदामशोथनिषूदनं ५
इतिपिप्पल्याद्यंचूर्णं फलंकसापलेद्वेचकृष्णायसपलद्वयं पथ्यामृताक्षधात्रीणांपृथगेकैकशःफलं १ भृंगीकन्यंव्योषाग्निकारवीकृमि
नाशनो चूर्णितैरर्धपालिकैःसिक्ततैलपलद्वयं २ त्रिफलास्वरसप्रस्थंषट्प्रस्थंपुनर्नपिबेत् दार्वीप्रलेपात्पाकेनचानुर्यासकसंयुतं ३
सविश्नवटकाश्लेतेयथाग्निबलभक्षितं कृमिकोष्ठाग्निदौर्बल्यं शोथगुल्मोदरव्रणान् ४ कामलांपांडुरोगार्शोभगंदरगदज्वरान् निहन्या
च्छुक्रहृद्भिश्चवायस्त्रेष्मबलप्रदः ५ पाप्मामेहप्रशमनास्चस्कृष्याःपुष्टिवर्धनाः निरत्ययास्निग्धशुजोवातातपनिषेविणी ६ इति
सावित्रीवटः रसेंद्रेणसमायुक्तोरसोधत्तूरपत्रजाः तांबूलपत्रजोवापिलेपनंयूकनाशनं १ कुकुभकुसुमविडंगलांगलीभल्लातु
कसथोशीरं श्रीवेष्टसर्जरसंमदनंचैवावचासमंदद्यात् १ एषसुगंधोधूपोमशकानांनाशनःश्रेष्ठः शय्यासुमत्कुणानां
शिरसिवस्त्रेयूकानां २ भंडीपिष्टारनालेनगोमूत्रेणातिमुत्कुणः कुनटीकटुतैलेनयूकायूकापहस्त्वयः १ लाक्षाभल्लातश्री
वासश्वेतापाराजीमांशिफा अर्जुनस्यफलंपुष्पंविडंगंसर्जगुग्गुलुः १ एभिःकृतेनधूपेनशाम्यंतिनियतंगृहे भुजंगमूषका
दंशाघुणामशकमत्कुणाः २ इतिगंधधूपं विडंगगंधशिलयासार्धसुरभीजलंनकटुतैलंनिखिलंनयतिविनाशंकिरवा
साहितार्श्चैवयूकाः इतिविडंगतैलं कृमिणांविट्कफोत्थानांमेतदुक्तंचिकित्सितं रक्तजानांतुसर्वेषांकुर्यात्कुष्टचिकित्सितं इति
वंगसेनात् अथयोगरत्नात् दाडिमत्वक्कृतःक्वाथस्तिलतैलेनसंयुतः त्रिदिनात्पातयेत्यंवंकोष्ठतःकृमिजालकं १ खदिरः
कुटजःपिचुमंदवचात्रिकटुत्रिफलात्रिवृतासहितं पशुमूत्रयुतंपिबसप्तदिनंकृमिकोटिशतान्यपिहंत्यचिरात् १ निंबत्वक्कृवि
डंगसैंधवंरामठेनसहजंतुनाशनं निंबपद्मजमोदयान्वितंचूर्णमेवमधुनाप्रशस्यते १ सुवर्चिकारामठपत्रिकाढ्याविडंग ७४

151/1986

बाल्हीककृष्णाग्निविश्वा यवानिकायंथिकभद्रमुस्तातक्रेणचूर्णंकृमिकोटिहारि १ भल्लातकान्वादथवाचिंचाम्लेनहरेत्कृमीन् विडंगपा
रिभद्राग्रंत्वक्बीजंपृथक्पिबेत् १ मधुनाकृमिनाशायनिंबंवाहिंगुनायुतं निंबजमोदाम्रतुषघ्नंत्वक्बीजंसचोरकं सहिंगुकंसमगुड
सद्योजंतुविनाशनं २ हरितकीचैवतथाहरिद्रांसौवर्चलंचैवसमंविचूर्णितं इंद्रवारुणिजलेनभावितंकीटसंघादिनिवारणंपरं विशा
लायाःफलंपक्वंतत्कोष्ठोपरिक्षिपेत् तद्धूमोदलमस्थेत्कीटानांपातनंपरं १ पारदंमर्दयेन्निष्कंकृष्णधत्तूरकद्रवैः नागवल्लीद्रवैर्वा
थवस्त्रंखंडंप्रलेपयेत् तद्वस्त्रंमस्तकेपेष्यधार्ययामत्रयंततः यूकाःपतंतिनिश्शेषाःपरीक्षानात्रसंशयः १ चित्रकंदंतिनीम्लकं
शातकीसमन्वितं कल्कांपिष्टापचेत्तैलंकेशशत्रुविनाशनं १ अथरसः क्रमेणवृद्धंरसगंधकाजमोदाविडंगंविषमुष्टिकाच पला
शबीजंचविचूर्णमस्यनिष्कप्रमाणंमधुनावलीढं पिबेत्कषायंत्रघनंतदूर्ध्वंरसोयमुक्तःकृमिमुद्गराख्यः कृमीन्निहंतिकृमिजांश्च
रोगान्संदीपयत्याग्निमयंनिरात् २ इतिकृमिमुद्गरस्व्योरसः क्षीराणिमांसानिघृतानिचैवदधीनिशाकानिचपत्रवंति समा
सतोम्लंमधुरान्नसांश्चकृमींजिघांसुःपरिवर्जनीयं १ शीतांबुमधुरंक्षीरंदधिक्षारघृतादिकं सौवीरंपत्रशाकांश्चवर्जयेत्
कृमीवान्नरः २ इतियोगरत्नात् अथपथ्यापथ्यं अस्थानंकापयाशिरोविरेचनंधमःकफघ्नानिशरीरशोधनं चिरंतावैणरक्त
शालयःपटोलवेत्राग्ररसोनवास्तुकं १ कुनाशमंदारदलानिसर्षपानवीनमोचंबृहतीफलान्यपि तिक्तानिनालीचदलानिगोधि
कंमांसंविडंगोपिचुमंदपल्लवाः २ पथ्याचतैलंतिलसर्षपोद्भवंसौवीरसुक्तंचतथोदकंमधु पचोलिमंतालमथुरंगवाम्रत्रंचतांबूल
मिरामगांडजं ३ औष्ट्राणिमूत्राण्यपयांसिरामठंक्षारोजमोदाखदिरश्चवत्सकः जंबीरनीरंसुपथीयवानिकासाराःसुखाय
कृमिशालिनोध्रुवा ४ तिक्तःकषायोकटुकोरसोथ्यैवंवर्गोनराणांकृमिरोगिणांसुखः छार्दिश्चतद्वेगविधारणंचनिरूषणा
नात्रानमाह्निनिद्रा द्रवंचापिष्टान्नमजीर्णभोजनंघृतान्नमाषांदधिपत्रशाकं मांसंपयोम्लंमधुरंरसंचकृमींजिघांसुःप
रिवर्जयेत् ६ इतिपथ्यापथ्यं इतिकृमिनिदानं अथपांडुरोगनिदानं पांडुरोगाःस्मृताःपंचवातपित्तकफैस्त्रयः

यो०र०
७५

चतुर्थः सन्निपातेन पंचमो भक्षणान्मृदः १ व्यायाममम्लंलवणानि मद्यं मृदं दिवास्वापमतीवतीक्ष्णं निषेव्यमाणस्य विदूष्य रक्तं कुर्वंति दो
षास्त्वचि पांडुभावं २ पूर्वरूपमाह त्वक्स्फोटनिष्ठीवनगात्रसादमृद्भक्षणप्रेक्षणकूटशोथाः विण्मूत्रपीतत्वमथाविपाको भविष्यतस्तस्य पु
रःसराणि ३ वातिकमाह त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणप्रभा वातपांडुामये कंपः स्तोदानाहभ्रमादयः ४ पैत्तिकमाह पीतमूत्रशकृ
न्नेत्रदाहतृष्णाज्वरान्वितः भिन्नविट्कोऽतिपीताभः पीतपांड्वामयी नरः ५ श्लैष्मिकमाह कफप्रसेकः श्वयथुस्तंद्रालस्यातिगौरवैः पां
डुरोगी कफाल्लक्षेत्त्वङ्मूत्रनयनाननैः ६ त्रिदोषजमाह सर्वान्नसेविनः सर्वे दुष्टदोषास्त्रिदोषजं त्रिदोषलिंगं कुर्वंति पांडुरोगं सुदुःसहं
७ ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः पांडुरोगी त्रिभिर्दोषैः स्याज्यः क्षीणो हतेंद्रियः ८ मृत्तिकाजनितमाह मृत्तिकादनशील
स्य कुप्यत्यन्यतमो मलः कषाया मारुतं पित्तमूषरा मधुरा कफं ९ कोपयेन्मृदुसादींश्च रौक्ष्याद्भुक्तं च रूक्षयेत् पूरयेत्याविपक्वैव स्रोतांसि नि
रुणध्यपि १० इंद्रियाणां बलं हत्वा तेजो वीर्यौजसी तथा पांडुरोगं करोत्याशु बलवर्णाग्निनाशनं ११ शून्याक्षिकूटगंडभ्रूः शूनपा
नाभिमेहनः क्रिमिकोष्ठोऽतिसार्येत मलं चासृक्कफान्वितं १२ असाध्यलक्षणमाह पांडुरोगाश्चिरोत्पन्नः खरीभूतो न सिध्यति काल
प्रकर्षाच्छूनांगो यो वा पीतानि पश्यति १३ बद्धाल्पविट्सहरितं सकफं योऽतिसार्यते दीनः श्वेतातिदिग्धांगः छर्दिमूर्छातृषान्वितः स
नास्त्यसृक्क्षयाद्यश्च पांडुः श्वेतत्वमाप्नुयात् १४ अपरं असाध्यलक्षणं पांडुदंतनखो यस्तु पांडुनेत्रश्च यो भवेत् पांडुसंघातदर्शी च पांडु
रोगी विनश्यति १५ अंते प्रशूनं परिहीनमध्यं म्लानं तथांते पु च मध्यशूनं गुदे च शेफः सुचमुष्कयोश्च स्वं प्रताम्यंतमसंज्ञकल्पं १६
विवर्जयेत्पांडुकिनं यशोर्थी तथातिसारज्वरपीडितं च १७ पांडुरोगी पितं असृक्मांसं दग्ध्वा रोगाय कामलां कुरुते अतः कामलामाह
पांडुरोगी तु योऽत्यर्थं पित्तलानि निषेवते तस्य पित्तमसृग्मांसं दग्ध्वा रोगाय कल्पते १ कामलायाः स्वरूपमाह हारिद्रनेत्रः सभृशं हारिद्रत्व
ङ्नखाननः रक्तपित्तशकृन्मूत्रो भेकवर्णो हतेंद्रियः २ दाहाविपाकदौर्बल्यसदनारुचिकर्षितः कामला बहुपित्तैषा कोष्ठशाखाश्र
यिणी ३ तस्याप्यवस्थांतरं कुंभकामलामाह कालांतरात्खरीभूता कृच्छ्रा स्यात्कुंभकामला १ कामलायाः असाध्यलक्षणमाह कृ ७५

153
1953

ष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः सरक्ताक्षिमुखच्छर्दिविण्मूत्रो यश्च ताम्यति २ अन्यदपि असाध्यलक्षणं दाहारुचितृष्णानाहतंद्रा
मोहसमन्वितः नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान्विपद्यते ३ कुंभकामलिनी असाध्यलक्षणमाह छर्द्यरोचकहृल्लासज्वरक्लममनिपीडि कृ
तं नश्यंति श्वासकासार्तो विड्भेदी कुंभकामली ४ पांडुरोगावस्थायां हलीमकमाह यदा तु पांडुवर्णः स्यात् हरितः श्यावपीतकः बलोत्साह
क्षयस्तंद्रा मंदाग्नित्वं मृदुज्वरः ५ स्त्रीष्वहर्षोंऽगमर्दश्च श्वासस्तृष्णारुचिर्भ्रमः हलीमकं तदा तस्य विद्यादनिलपित्ततः इति पांडुरोगादि
निदानं समासतः टीकार्थः पृथग्दोषैः ३ संनिपातेन १ मृद्भक्षणात् १॥ कामलापित्तात् १ कुंभकामलातिपित्तात् १ हलीमकं अनिल
पित्ततः १ अथ पांडुरोगचि० साध्यं च पांड्वामयिनं समीक्ष्य स्निग्धं घृतेनोर्ध्वमधश्च शुद्धं संपादयेत्क्षौद्रघृतप्रभाते हरीतकीचूर्णमयप्र
योगैः पिबेद्घृतं वा रजनीविपक्वं यत्त्रैफलं तैल्वकमेकमेव विरेचनं द्रव्यकृतं पिबेद्वा पयो गवां श्चैव विरेचनकान्वितेन १ विधिः स्निग्धोऽत्र वातोत्थे
तिक्तशीतश्च पैत्तिके श्लैष्मिके कटुरूक्षोष्णः कार्यो मिश्रं तु मिश्रजे १ द्विपंचमूलीकथितं सविश्वं कफात्मके पांडुगदे पिबेद् ज्वरातिसारेष्व
पर्यौत्रहृष्वां कासारुचौ कंठहृदामयेषु १ फलत्रिकामृतावासातिक्तभूनिंबनिंबजः क्वाथः क्षौद्रयुतो हन्यात्पांडुरोगं सकामलं १ पुनर्न
वा निंबपटोलशुंठीतिक्तामृता दार्व्यभयाकषायः सर्वांगशोफोदरपांडुरोगस्थौल्यप्रसेकोर्ध्वकफामयेषु १ अथ लवणादि नवायसिचूर्णभ
उक्तं रसप्रदीपे क्षणप्रमाणमाह नवायसं लोहं नवरात्तिकामितं भक्षणीयं गुंजामेकां समारभ्य यावत्पुनर्नवरात्तिकं तावल्लोहं सम्भीवाद्यथादोषब
लं नरः एवं सति प्रथमदिवसे त्र्यूषणादिसहितं रात्तिकाद्यं मितं खादेत् ततः प्रतिदिनं रात्तिकाद्यं वर्धयेत् यावत्त्र्यूषणादिसहिता
अष्टादशरात्तिकास्युः ततः ताः प्रतिदिनं खादेदिति त्र्यूषणं त्रिफलामुस्तां विडंगं दहनासमाः नवायो रजसो भागास्तच्चूर्णं मधुसर्पिषा १
भक्षयेत्पांडुहृद्रोगकुष्ठार्शः कामलापहं २ इति नवायसचूर्णं लोहपात्रस्थितं क्षीरं सप्ताहं पथ्यभोजनः पिबेत्पांड्वामयी शोषी ग्रहणी
दोषपीडितः १ दग्ध्वाक्षकाष्ठैर्मलमायसं तु गोमूत्रनिर्वापितमष्टवारं विचूर्ण लीढं मधुना चिरेण तक्रेण वा पांडुगदान्निहन्यात् इति वी
रसिंहावलोकतः अतिशुक्षमयो भस्म मधुक्षौद्रयुतं लिहेत् पांडुरोगस्य नाशाय कामलानां च सर्वशः १ नागरं लोहचूर्णं वा कृष्णापथ्या

यो०र०
७९

मयाप्सुतां गुग्गुलुंवाथमूत्रेण कफपांड्वामयीपिबेत् १ शिलाजतुक्षौद्रविडंगसर्पिर्लोहाभयाशर्करयासमांशं आप्लुयंतेदुर्बलदेहधारीत्रि
पंचरात्रेचयथाग्न्यशंकः १ अयस्तिलात्र्यूषणकोलभागैः सर्वैःसमंमाक्षिकधातुचूर्णं तैर्मोदकःक्षौद्रयुतोनुतक्रः पांड्वामयेदूरगतोपिशस्तः
१ अथमंडूरवटकः सुराह्वदार्वीकटुपद्मकतायवेल्लंवराचेतिसमांशचूर्णं मंडूरभागद्वयमष्टमूत्रेपक्वांगवातकसमंचयोज्यं १ कामलापांडुमे
हार्शशोथकुष्टकफामयान् ऊरुस्तंभमजीर्णंचप्लीहानंनाशयंतिच २ इतिरत्नप्रदीपात् अथमंडूरवज्रवटकः पंचकोलंसमरिचंदेवदारु
फलात्रिकं विडंगमुस्तायुक्तांश्चभागास्त्रिपलसंमिताः १ यावंत्येतानिचूर्णानिमंडूरंद्विगुणंततः पक्त्वाष्टगुणितेमूत्रेतत्रघनीभूतमुद्धरेत् २
ततोक्षमात्रान्वटकान्पिबेत्तक्रेणतक्रभुक् पांडुरोगंजयेतद्वन्मंदाग्नित्वमरोचकं ३ मंडूरवज्रवटकोरोगानीकप्रभेदनः अर्शांसिग्र
हणीशोफमुरुस्तंभहलीमकं कृमिप्लीहानमुदरंगलरोगंचनाशयेत् ४ इतिवृंदात् अथमंडूरलवणं कृत्वाग्निवर्णमलमायसंतुमू
त्रेभिषिंचेद्दृढरोगवांच तत्रैवसिंधूत्थसमंविपाच्यनिरुत्थधूमंचविभीतकाग्नौ १ तक्रेणपीतंमधुनाथवापिविभीतकास्थ्यंलवणंप्र
युक्तं पांड्वामयिभ्योहितमेतदस्मात्पांड्वामयघ्नंनहिकिंचिदन्यत् २ इतियोगतरंगिण्याः अथमधुमंडूरः गृहीत्वाभिषक्प्रस्थं
मंडूरभागंसतैत्रैफलेमर्दयित्वाचयामंपुटे पाचयेद्यामयुग्मंकृशानौपुरानीहदेयानिचास्मिन्द्रावारं १ तथाधेनुमूत्रेकुमारीरसेनापि
धेयाश्चपंचात्मतेयोगराजः भवेत्सिंधुनागैःस्फुटैःसिद्धिदोयमाचिंत्यप्रभावश्चमंडूरयोगः २ मधुमंडूरएषकणामधुनाचिरपांडु
गदंनुदेत्समितः जनकोरुधिरस्यनिहंतिपरांविविधान्निहरस्त्वनुपानबलैः ३ अथमंडूराद्योरिष्टः मंडूरस्यतुशुद्धस्यतुलार्धंप
रिकीर्तितं तद्वल्लोहस्यपत्राणितिलोत्सेधप्रमाणतः पुराणगुडपंचाशत्कोलप्रस्थत्रयंतथा निकुंभाचित्रकाभ्यांचपलेद्वेद्वेसुचू
र्णिते २ पिप्पलीनांविडंगानांकुडवंकुडवंपृथक् त्र्यूषापित्रिफलाप्रस्थंजलद्रोणेसमावपेत् अर्धमासस्थितोधान्येपयोरिष्टप्र
पातः दोषानुभक्तःश्चापपांडुरोगानियच्छति ४ कृमीनर्शांसिकुष्ठंश्चश्वासकासकफामयान् एषोरिष्टस्तुमंडूरःसर्वपांड्वामया
पहः ५ इतिगदनिग्रहात्मंडूराद्योरिष्टः इतियोगरत्नात् अथवंगसेनात् दहनाजमोदसैंधवनागरःसमे गोमूत्रासिद्धं ७९

155/1936

मरिचानिचाम्लतक्रेण सप्ताहादग्निबलंपांड्वार्शोमर्दनंपरं १ सप्तरात्रंगवांमूत्रेभावितंचाप्ययोरजः पांडुरोगप्रशांत्यर्थंपयसाप्रपिबेन्नरः १
गोमूत्रासिद्धमंडूरः चूर्णंसगुडमभ्यसेत् पांडुरोगेजयेत्सर्वेपांक्तिशूलंचदारुणं १ अयोमलंसुसंतप्तंभूयोगोमूत्रशोधितं मधुसर्पियुतंलीढ्वा
पांडुरोगीसुखीभवेत् दीपनंचाग्निजननंशोथपांड्वामयापहं कल्याणसाह्वयंयद्वाभक्षयेच्चगुडंनरः २ मानिकांभावितांदद्यात्तुल्यांनि
बरसेनच मृद्देशाकरणार्थंतुभिषक्पश्चादतंद्रितः २ अथमूर्वाद्यंघृतं मूर्वातिक्तानिशायासकृष्णाचंदनपर्पटैः त्रायंतीवत्सभूनिंबप
टोलांबुदधात्रुभिः १ अक्षमात्रैर्घृतप्रस्थंसिद्धंक्षीरंचपांडुना ज्वरविस्फोटशोथार्शोरक्तपित्तनुत् २ अथकाद्यंघृतं कटुकारोहिणीमु
स्तंहरिद्रावसकान्यपि क्लीबेरंचचंदनंमूर्वात्रायमाणंदुरालभं सपिप्पलीकर्कटकंभतिकंदेवदारुच विशालामात्रंचैसर्पिः प्रस्थंक्षीरादकंपि
पेत् १ रक्तपित्तंज्वरंदाहंस्वयथुंसभगंदरं अर्शांस्यसृदरंचैवहन्यादिस्फोटकांस्तथा २ देवदार्वीघृतं देवदुत्रिफलाव्योषरश्विकास्सम
योरजः हरिद्रेचित्रकंभार्गींपाठेद्देद्विपुनर्नवे विडंगंपिप्पलीलोध्रंपंचेमूत्रेचतुर्गुणे घृतंतत्पांडुहृद्रोगग्रहणीगुददोषनुत् २ अथर
जनीत्रिफलाद्यंघृतं रजनीक्वाथकल्काभ्यांघृतंपांड्वामयापहं त्रिफलाकल्कगोमूत्रासिद्धंवामाहिषंघृतं १ अथदंतीघृतं दंत्याश्चतुः
पलरसेपिष्टैर्दंतीस्थाडाभिः तद्वत्स्रोघृतनाशुल्मप्लीहहृद्रोगपांडुनुत् दंतीकुडवोत्रास्यापालिकापोडशाभिः सलिलकुडवैर्निःक्वाथ्य
पादावशेषःकर्तव्यः २ इतिघृतानि ताप्याद्रिजतुरूप्यायोमलान्पंचपलान्पृथक् पंचाभ्रजतुनोभागाद्वाद्युक्तस्यबुद्धिमान् त्रिक
त्रिफलाव्योषविडंगैपलिकैःसह शर्कराष्टपलोन्मिश्राचूर्णितामधुनाप्लुताः उदुंबरसमामात्रामतः स्वादेद्यथाग्निमान् दिनेदिनेप्रयो
गेणजीर्णंभुंज्याद्यथोचितं वर्जयित्वाकुलत्थश्चकाकमाचीउपोदकान् योगराजइतिख्यातोयोगोयममृतोपमः रसायनमिदंश्रेष्ठ
सर्वज्वरहरंपरं पांडुरोगंविषंकासंयक्ष्माणंविषमज्वरं कुष्ठान्यजरकंमेहश्वासहिक्कामरोचकं त्रिदोषात्मस्यपस्मारकामलांगुदजानिच
सुवर्णमथवारूप्यंयोगेत्रनसंभवेत् तत्कीर्तिनकर्मस्यात्तभिषक्कुर्यादतंद्रितं १ इतियोगराजः कौटजत्रिफलानिंबपटोलघननागरैः
भावितानिदशाहानिरसोद्विगुणितानिचौ शिलाजतुपलान्यष्टौतावनीशितशर्करा तक्षीरीपिप्पलीधात्रीकर्कटाख्यान्पलोन्मितान्

पां०र० ७७

निदग्धिकाफलंमूलंपलंयुंज्यात्रिकंटकात् मधुत्रिफलसंयुक्तंकुर्याद्क्षसमानगुडान् दाडिमाम्लपयःक्षीररसयूषसुरासवान् तांभक्षयि
त्वानापिबेत्निरन्नंभुक्तएवच पांडुकुष्टज्वरप्लीहकामलार्शोभगंदरान् श्रुतिहृकश्वासमूत्राग्निदोषशोथगदोदरान् कासांसृक्राजपित्ता
सृक्शोथगुल्मगलग्रहान् नेत्रवक्त्रगदान्हन्युः सर्वरोगहराः शुभाः इतिशिवगुटिका त्र्युषणंत्रिफलादारुहरिद्रेनीलिनीफलं द्रा
क्षामिंद्रयवंमुस्तामंजिष्टाकटुरोहिणी शतावरीशिग्रुबीजांचित्रकंगजापिप्पली शालीपर्णीपृश्निपर्णीबृहतीकंटकारिका पाठाभल्लातकं
दंतीविशालासदुरालभाः सटीमधुरसारास्नाविडंगंचसमाक्षिकं एतच्चूर्णंसमेवापिलोहंद्विगुणभावयेत् यावकैश्चैवसंत्यज्यगवांमू
त्रेणपाचयेत् ततोक्षमात्रांगुटिकांपाययेत्तंदुलांबुना पांडुरोगंजयेत्याशुवज्रदंडइवासुरान् कृमिकुष्टप्रमेहार्शोग्रहणीदोषनाशकृत्
भगंदरश्वासकासप्लीहगुल्मोदरापहं १ इतित्र्यूषणाद्योलोहः इतिपांडुचिकित्सा अथकामलाचि० रेचनंकामलार्तस्यस्निग्धस्यादौ
प्रयोजयेत् ततःप्रशमनीकार्याक्रियावैद्येनजानता १ पांडुरोगेक्रियांसर्वायोजयेच्चहलीमके मलानुसरणंदक्षासापिकार्याभिषग्वरैः
१ हरिद्रात्रिफलानिंबबलामधुकसाधितं सक्षीरंमाहिषंसर्पिःकामलापहमुत्तमं त्रिफलावागुडूच्यावादार्व्यानिंबस्यवारसं प्रातर्म
धुयुतोवैद्यःकामलार्तायपाययेत् १ दार्वीसत्रिफलाव्योषविडंगान्ययसोरजः मधुसर्पियुतंलिह्यात्कामलापांडुरोगवान् १ अयोरजो
व्योषविडंगचूर्णंलिह्यात्हरिद्रांत्रिफलान्वितंवा सशर्करांकामलिनांत्रिभंगीहिताणवाक्षीसगुडाचसुंठी १ धात्रीलोहरजोव्योषनि
शाक्षौद्रसशर्करा लीढानिवारयत्याशुकामलामुद्धतामपि १ लोहचूर्णनिशायुग्मंत्रिफलाकटुरोहिणी प्रलिह्यमधुसर्पिर्भ्यांकाम
लार्तःसुखीभवेत् १ व्योषाग्निवेल्लत्रिफलामुस्तैस्तुल्यमयोरजः चूर्णितंतक्रमध्वाज्यकोष्णोतोयोपयोजितं १ कामलापांडुहृद्रोग
कुष्टार्शोमेहनाशनं २ तुल्यंवायोरजःपथ्याहरिद्रांक्षौद्रसर्पिषा चूर्णितांकामलीलिह्यात्गुडक्षौद्रेणवाभयां १ एकाजीरकभूधात्री
सितागव्येनभावयेत् प्रातःसंसेवनंकुर्यात्कामलानांनाशनंपरं १ अर्कमूलहरेन्नस्यात्कामलांतंडुलोदकैः अंजनंकामलार्तस्यद्रो
णपुष्पीरसस्यतु निशागैरिकधात्रीणांचूर्णंवोपरिलेपयेत् गोदुग्धेनविशालाःमुनिसंख्यादलानितु जीरकेणयुतापेयंसमे ७७

157/1736

कंपलंपिबेत् १ अथवातज्जटाद्रावंकर्षार्धंदुग्धमिश्रितं पाययेत्प्रतिदिनंएवमेतद्दिनत्रयं २ घनदुग्धौदनंपथ्यंकुर्याद्वैलवणंविना कामलां
नाशयत्याशुवायुनाभ्रंहरेद्यथा इतियोगरत्नात् अथवंगसेनात् गुडूचिपत्रंकल्कंवापिबेत्तक्रेणकामलां १ नस्यंकर्कोटमूलस्यदेयंवाजा
विनीफलं [illegible]
१ गुडूचीरसकल्काभ्यांसिद्धंक्षीरंचतुर्गुणं माहिषंघृतमेवाशुकामलाहरमुत्तमं इतिगुडूचीघृतं किरातातिक्तंसुरदारुमूर्वामुस्तंगुडूचीक
टुकांपटोलं दुरालभापर्पटकंसनिंबंकटुत्रिकंवाद्रिफलत्रयंच विडंगसारंचसमांशकानिसर्वैःसमंचूर्णमथात्रलोहं सर्पिर्मधुभ्यांगुटिकावि
धेयातक्रानुपानंभिषजाप्रयोज्यं निहंतिपांडुश्वयथुंप्रमेहंहलीमकंद्व्यग्रहणीप्रदोषं श्वासंसकासंचसरक्तपित्तमर्शांस्यथोरुग्रहमा
मवातं व्रणान्समुत्थान्मुकफविद्रधिंश्चश्वित्राणिकुष्टंसततप्रयोगात् इतिअष्टादशांगलेहः कुंभाख्यकामलायांतुहितःकामलकोवि
धिः गोमूत्रेणपिबेत्कुंभकामलायांशिलाजतु १ मासांमाक्षिकधातुंचमलंवायाद्हिरण्यजं दग्धाक्षिकाष्टैर्मलमाभ्वयसंतुगोमूत्र
निर्वापितमष्टवारान् विचूर्णलीढंमधुनाचिरेणकुंभाह्वयंपांडुगदंनिहंति १ इतिकामलाकुंभकामलाचिकित्साधिकारः अथ
हलीमकचि० रसमामलकानांतुसंशुष्कयंत्रपीडितं द्रोणंपचेच्चमृद्ग्नौतत्रचेमानिदापयेत् १ चूर्णितांपिप्पलीप्रस्थंमधुकाद्विपलं
तथा प्रस्थंगोस्तनिकायाश्चद्राक्षायाःकिलपेषितं शृंगवेरपलेद्वेतुतुगाक्षीर्याःपलद्वयं तुलार्धंशर्करायाश्चघनीभूतंसमुद्धरेत्
२ मधुप्रस्थसमायुक्तंलेहयेत्सलसंमितं हलीमकंकामलांचपांडुत्वंचापकर्षति ४ इत्यामलक्यावलेहः पिबेत्बदरतोयेनमध्य
लोहरजांसिच सितातिक्ताबलायष्टीत्रिफलारजनीयुतैः लेह्यंलिह्यात्समध्वाजंहलीमकप्रशांतये १ मधुरैरन्नपानैश्चवात
पित्तहरैर्जयेत् कामलापांडुरोगोक्तांक्रियांचानुप्रयोजयेत् १ अथखदिरलेहः पचेत्खदिरनिःक्वाथेविडंगाद्व्यानयोरजःबला
तिक्तासितायष्टीत्रिफलारजनीद्वयं १ लेहंलिह्यात्समध्वाज्यंपांडुरोगीहलीमकं सलेहकामलांहन्यादपिसंवत्सरोत्थितां २ इति
खदिरावलेहः इतिवंगसेनात् हलीमकाधिकारः व्योषबिल्वाद्विरजनीत्रिफलाद्विपुनर्नवा मुस्तामयोरजःपाठाविडंगंदेवदारु

यो०र० ७८ दधिकालीचभार्ङीचसक्षीरैस्तैर्घृतंशुभं सर्वान्पित्तामयस्त्वाशुविकारान्प्रतिकाकृतान् इतिव्योषादिघृतं इतिखंडान्मूदः भक्षणाधिकारः
अथहंसमंडूरः मंडूरंचूर्णयेत्श्लक्ष्णंगोमूत्रेष्टगुणेपचेत् पंचकोलंदेवदारुमुस्ताव्योषफलत्रयं विडंगस्याप्रतिपलंपाकांतेचूर्णितंक्षिपेत्
भक्षयेत्कर्षमात्रंचतक्रेनकंचभोजने २ पांडुशोफंहलीमंच उरुस्तंभंचकामलां अर्शांसिहंतिनोचित्रंहंसमंडूरकोह्ययं ३ अथमदेभसिं
होरसः काश्यपग्रंथे रसगंधवराटलाभ्रव्योषविषवंगाभ्रककांततीक्ष्णमुंडं अहिहिंगुलटंकणंसमांशांसकलंतात्रिगुणंपुराणकिट्टं १
पश्चात्त्रिवृशोधितंक्रमशःत्रिफलाभृंगतथार्द्रकोत्थनीरैः सुविशोध्यवराम्लनालिकासास्वरसैरष्टगुणैःपुनर्नवोत्थैः २ पृथगग्निकृतं
घनंविपाच्यगुटिकागुंजमितानिजानुपानैः ज्वरपांडुत्रिशास्त्रपैत्तगुल्मक्षयकासस्वरमग्निसादमूर्छा पवनादिप्रदुस्तराष्टरोगालस
कंपित्तहरंमदारतंच बहुनाकिमसौयथार्थनामासकलव्याधिहरोमदेभसिंहः अथत्रैलोक्यनाथोरसः पलानिचत्वारिरसस्य
पंचगंधस्यसत्वस्यगुडूचिकायाः व्योषस्यचूर्णस्यचतालमूल्याः सशाल्मलस्येहपलंत्रयस्मात् पृथक्पृथक्षड्गगनस्यचा
थैलोहस्यसर्वंत्रिफलाजलेनले घृष्टंचतुःषष्टिमितंतदर्धाःस्युर्भावनामार्कवजद्रवस्य २ शिग्रुत्थनीरेणचषोडशाष्टौलथानलो
श्वालग्रहकन्यकाया आर्द्रद्रवस्येतिरसोयमुक्तः पांडुक्षयश्वासगदादिहर्ता ३ क्षौद्रेणवाशर्करयाघृतेनकर्षार्धमेतस्यभजेत्
प्रयत्नात् ४ त्रैलोक्यनाथःकथितोमुनींद्रैर्यथानुपानैश्चगदान्निहंति इतियोगरत्नात् अथपथ्यापथ्यविधिः छर्दिविरे
चनंजीर्णायवगोधूमशालयः मुद्गाढकीमसूराणांयूषांजांगलजारसः १ पटोलंरक्षकूष्मांडंतरुणंकदलीफलं जीवंतीक्षुर
मत्स्याक्षिगुडूचीतंदुलीयकं २ पुनर्नवाद्रोणपुष्पीवार्ताकंलशुनद्वयं पक्वाम्रमभयाविश्वाशृंगीमत्स्यागवांजलं ३ धात्रीक्ष
तंघृतंतैलंसौवीरकंतुषोदकं नवनीतंगंधसारोहरिद्रानागकेसरं यवक्षारोलोहभस्मकषायाणिचकुंकुमं दाहश्चरणयोसंधौ
नाभेर्धंगुलकादधः मस्तकेहस्तयोर्मूलेमध्येचस्तनकक्षयोः यथादोषमिदंपथ्यंपांडुरोगवतांभवेत् ६ रक्तस्रुतिर्धूमपानं
वमिवेगविधारणं स्वेदनंमैथुनंसिंबीपत्रशाकानिरामठं माषांबुपानंताम्बाकोतांबूलंसर्षपाःसुराः मृद्भक्षणंदिवास्वप्नंतीक्ष्ण ७८

श्वानिलव्यानिच ८ सर्वाण्यम्लानिदुष्टांबुविरुद्धाध्यशनानिच गुर्वन्नंचविदाहीनिपांडुरोगवतांविधिः ९ योगरत्ने यवगोधूमशा
ल्यन्नंरसैर्जांगलजैःशुभैः मुद्गाढकमसूराद्यैःपांडौभोजनमिष्यते १ वह्निमातपमायासमन्नपानंचपित्तलं मैथुनंक्रोधमध्वानंपां
डुरोगीसदात्यजेत् २ इतिपांडुकामलाहलीमकचिकित्सासमाप्तः अथरक्तपित्तनिदानं घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः
तीक्ष्णोष्णक्षारलवणैःरम्लैःकटुभिरेवच पित्तंविदग्धंस्वगुणैर्विदहत्याशुशोणितं ततःप्रवर्ततेरक्तमूर्ध्वंचाधोद्विधापिच २ केषुमा
र्गेषुप्रवर्ततेतत्ताह ऊर्ध्वंनासाक्षिकर्णास्यैर्मेढ्योनिगुदैरधः कुपितंरोमकूपैस्तुसमस्तैस्तत्प्रवर्तते ३ पूर्वरूपमाह सदनंशीतका
मित्वंकंठधूमायनंवमिः लोहगंधिश्चनिःश्वासोभवत्यस्मिन्भविष्यति ४ श्लैष्मिकमाह सांद्रंसपांडुसस्नेहंपिच्छिलंचकफान्वितं
वातिकमाह श्यावारुणंसफेनंचतनुरूक्षंचवातिके ५ पैत्तिकमाह रक्तपीतंकषायाभंकृष्णंगोमूत्रसंनिभं मेचकागारधूमाभमं
जनाभंचपैत्तिकं ६ सन्निपातिकमाह संसृष्टलिंगंसंसर्गात्त्रिलिंगंसान्निपातिकं दोषमिलितेनमार्गमाह ऊर्ध्वगंकफसं
सृष्टमधोगंमारुतानुगं द्विमार्गंकफवाताभ्यामुभाभ्यामनुवर्तते ७ मार्गप्रवृत्यातस्यासाध्यत्वमाह ऊर्ध्वंसाध्यमधोयाप्य
मसाध्यंयुगपद्गतं सुखसाध्यत्वेहेतुमाह एकमार्गंबलवतोनातिवेगंनवोत्थितं रक्तपित्तंसुखेकालेसाध्यस्यान्निरुपद्रवं ९
पुनरपिदोषानुसंसृष्टत्वेनसाध्यासाध्यत्वमाह एकदोषानुगंसाध्यंद्विदोषंयाप्यमुच्यते यत्त्रिदोषमसाध्यंस्यान्मंदाग्नेरतिवे
गवत् १० व्याधिभिःक्षीणदेहस्यवृद्धस्यानश्नतश्चयत् ११ तेषांउपद्रवानाह दौर्बल्यंश्वासकासज्वरवमथुमदःपांडुता
दाहमूर्छाभुक्तेघोरोविदाहोस्त्वधृतिरपिसदाहृद्यतुल्याचपीडा तृष्णाकोष्ठःसमेदःशिरसिचतपनंपूतिनिष्ठीवनत्वंभक्त
द्वेषोविपाकोविकृतिरपिभवेद्रक्तपित्तोपसर्गः १ विकृतिरूपत्वेनासाध्यत्वमाह मांसप्रक्षालनाभंकथितमिवचकर्दक
र्दमांभोनिभंवामेदःपूयास्रकल्पंयकृदिवयदिवापक्वजंबूफलाभं यत्कृष्णंयच्चनीलंभृशमतिकुणपंयत्रचोक्ताविकारा
स्तद्वर्ज्यंरक्तपित्तंसुरपतिधनुषायच्चतुल्यंभवंति असाध्यलक्षणांतरमाह येनचोपहतोरक्तंरक्तपित्तेनमानवःपश्येद्दृ

159/1936

पी०र०
७०

शांवियवैव तच्चासाध्यमसंशयं १४ लोहितंछर्दयेद्यस्तु बहुशोलोहितेक्षणः लोहितोद्गारदर्शीचम्रियतेरक्तपैत्तिकः १५ इतिनिदानं अथातो
सामान्येनटीका वायुनाधोगतं १ कफेनऊर्ध्वं १ कफवाताभ्यांद्विमार्गकं १ अथातोरक्तपित्तचिकित्सांव्याख्यास्यामः पित्तास्रंसंभवेन्नादौस्तंभनीयंब
लिनोश्नतं हृत्पांडुग्रहणीरोगप्लीहगुल्मोदरादिकृत् १ गलग्रहंपूतिनस्यंमूर्छायमरुचिंतथा कुष्ठान्यर्शांसिविसर्पांव्रणनाशंभगंदरं कुक्षींद्रियोपरोधंच
कुर्यात्स्तंभितमादितः २ क्षीणमांसबलंवालंवृद्धंशोषानुबंधनं अवाम्यमविरेच्यंचशमनीयैरुपाचरेत् १ ऊर्ध्वंप्रवृत्तदोषस्यपूर्वंलोहितपित्तिनः
अक्षीणबलमांसाग्नेःकर्तव्यमथतर्पणं १ ऊर्ध्वगेरेचनंपूर्वमधोगेवमनंहितं आरग्वधेनधात्र्यावात्रिवृतापथ्ययाथवा विरेचनंप्रयोक्तव्यंशर्करामाक्षि
कोत्तमं १ मुस्तेंद्रयवसुक्ष्माह्वमदनाह्वंपयोमधु शिशिरंवमनंयोज्यंरक्तपित्तहरंपरं द्राक्षामधुकक्वाथमयसितायुक्तंविरेचनं यष्टीमधुकसंयुक्तंसक्षौद्रं
वमनंहितं १ शालिपर्ण्यादिनासिद्धापेयापूर्वमधोगमे रक्तातिसारहंतावयोज्याविधिरक्षितः १ पयांसिसीतानिरसाश्चजांगलाः सतीनयूषाश्चसशा
लिषष्टिकाः हितानिचैतानिसरक्तपित्तेचान्यानिपित्तुःकिलपित्तहानि १ शालिषष्टिकनीवारकोरदूषप्रसाधिकाः श्यामाकाश्चप्रियंगुश्चभोजनंर
क्तपित्तिनां २ मसूरमुद्गचणकाः समकुष्ठाढकीफलाः प्रशस्तास्सूपयूषार्थेकल्पितारक्तपित्तिनां २ दाडिमामलकंबिल्वान्म्लार्थंचापिदापयेत्
पटोलनिंबवेत्राग्रप्लक्षवेतसपल्लवाः शाकार्थेशाकसात्म्यानांतंदुलीयादयोहिताः पारावतकपोतांश्चलावान्रक्ताक्षवर्तकान् शशान्कपिंज
लानेणान्हरिणान्कालपुच्छवान् रक्तपित्तहरान्विद्याद्रसतेषांप्रयोजयेत् ६ ईषदम्लानदम्लांश्चघृतभ्रष्टान्ससैंधवान् कफानुगेयूषशाकं
दद्याद्वातानुगेरसं ७ पथ्यंसतीनयूषेणससितैर्लाजसक्तुभिः ८ जलंखर्जूरमृद्वीकामधूकैःसपरूषकैः श्रृतशीतंप्रयोक्तव्यंतर्पणा
यसशर्करं ९ तर्पणंसघृतंक्षौद्रंलाजचूर्णैःप्रदापयेत् ऊर्ध्वगंरक्तपित्तंतत्कालेपीतंव्यपोहति १० ह्रीवेरंचंदनोशीरमुस्तपर्पटकैःश्रृतं
केवलंश्रृतशीतंवादद्यातोयंपिपासते १ पयःसितान्वितंश्रृतशीतमाजंगव्यंपयोवाप्रसमीक्ष्यवह्निं यष्टीमधुकार्जुनभावनीयंद्राक्षावला
गोक्षुरकैःश्रृतंवा द्राक्षायाफलिनीभिर्वाबलायानागरेणवा श्वदंष्ट्रयाशतावर्यारक्तजित्साधितंपयः १ श्रृतेनाजेनपयसासंपिष्टंकुंकुमं
पिबेत् ऊर्ध्वंरक्तविनाशायतेनैवाजेनभोजनं १ यष्टीमधुसमायुक्तंक्षीरंसंक्वाथ्यशीतलं शर्करामधुसंमिश्रंरक्तपित्तापहं पिबेत् १ ७०

161/1930

क्षीरेणलाक्षामधुमिश्रितेनप्रपीयजीर्णेपयसानुमद्यं सद्योनिहन्यादुधिरंक्षतोत्थंकांवार्जुनानामथवापिकल्कः कल्कंमधूकंत्रिफलार्जुनानानिशाशि
तंलोहमयेतुपात्रे सार्धंविलिह्यादुपिबेत्क्षशीतंसशर्करंछागपयक्षतार्तः १ वृषपत्राणिनिष्पीड्यरसंसमधुशर्करं अनेनप्रशमंयातिरक्तपित्तंसुदारु
णं १ मध्वाटरूषकरसौपादितत्वभागीकृत्वानरः पिबतिपुण्यनरःप्रभाते तद्रक्तपित्तमतिदारुणमप्यवश्यमाशुप्रशाम्यतिजलैरिववह्निपुंजः इति
राजमार्तंडात् अटरूषकनिर्यूहःप्रियंगुम्रत्तिकांजने विनीयलोध्रंसक्षौद्रंरक्तपित्तहरंपिबेत् १ पिष्टानाद्वृषपत्राणांपुटपाकोरसोहिमः मधु
युक्तोजयेद्रक्तपित्तकासज्वरक्षयान् २ इतिवासापुटपाकः वासायांविद्यमानायांमाशायांजीवितस्यच रक्तपित्तीक्षयकासीकिमर्थमवसीद
ति वासाकषायोत्पलमृत्प्रियंगुलोध्रांजनांभोरुहकेसराणि पिष्ट्वासिनाक्षौद्रयुतानिजिह्याल्पित्तासृजोवेगमुदीर्णमाशु १ आटरूषकमृद्वीकाप
थ्याक्वाथःसशर्करः क्षौद्राढ्यःकसनःश्वासःरक्तपित्तनिवर्हणः १ मुद्गासलाजाःसयवाःसकृष्णासीशीरमुस्ताःसहचंदनेन बलाजलेपर्युषि
तःकषायःसरक्तपित्तंशमयत्युदीर्णं १ ह्रीवेरंधान्यकंशुंठीचंदनंमधुयष्टिका वृषोशीरयुतःक्वाथः शर्करामधुयोजितः १ रक्तपित्तंजयत्यु
ग्रंतृष्णादाहंज्वरंतथा उशीरंचंदनंपाठाद्राक्षामधुकपिप्पली सक्षौद्रंपाययेत्क्वाथंरक्तपित्तंहरेध्रुवं १ अमृतामधुकंचैवखर्जूरंगजपिप्पली
क्वाथःक्षौद्रायुतोह्येषरक्तपित्तविकारनुत् चंदनेंद्रयवापाठाकटुकासदुरालभागुडूचीवालुकंलोध्रंपिप्पलीक्षौद्रसंयुतं १ कफान्वितंजयेद्रक्तं
तृष्णाकासज्वरापहं २ शतावरीबलारास्नाकाश्मर्यासपरूषकं पाययेद्रक्तपित्तघ्नंसद्यःशूलहरंपरं १ त्रिफलाकल्कमालाभवंक्वथनंसि
तयामधुनामीलितंहरति ननुशोणितपित्तरुजांविविधाचतदाहकपित्तजशूलहरं १ अतसीकुसुमसमंगावटप्ररोहास्तृणांभसा पीताः
साधयतिरक्तपित्तंप्रदिग्धकेनुद्ग्ध्रस्रेण १ पक्वोडुंबरकाश्मर्यपथ्याखर्जूरगोस्तनी मधुनाघ्नंतिसंलीढारक्तपित्तंपृथक्पृथक् १ वास
कःस्वरसैःपथ्यासप्तधापरिभाविता कृष्णावामधुनालीढारक्तपित्तंद्रुतंजयेत् १ द्रवेणयावताद्रव्यमेकीभूयार्द्रतांव्रजेत् तावत्प्रमाणं
निर्दिष्टंभिषग्भिर्भावनाविधौ २ अभयामधुसंयुक्तापाचनीदीपनीमता श्लेष्माणंरक्तपित्तंचहंतिशूलातिसारजित् ३ लोहगंधानिश्
श्वासीउद्गारेरक्तगंधिनी मृद्वीकोषणमात्रात्खादेद्विगुणशर्करा १ उशीरकालीयकरोध्रपद्मकप्रियंगुकाकट्फलशंखगैरिकाः पृथक्

यो०र०
८०

पद्मकं चंदनं तुल्यभागिकां सशर्करास्तंडुलधावनाप्लुताः १ रक्तं च पित्तं तमकं पिपासां दाहं च पीताः शमयंति सद्यः २ पलाशकल्ककाथो वा सुशीतः
शर्करान्वितः पिबेद्वा मधुसर्पिर्भ्यां गवाश्वशकृतो रसः १ सक्षौद्रं ग्रथितं रक्ते लिह्यात्पारावतं शकृत् अतिनिःसृतरक्तो वा क्षौद्रेण रुधिरं पिबेत्
१ खदिरस्य प्रियंगूनां कोविदारस्य शाल्मलेः पुष्पचूर्णानि मधुना लिह्याद्दारक्तपित्तनुत् १ अश्वत्थपत्राग्ररसात्पडंशा वा लोध्रतस्माद्द्विगुणं
मधुस्यात् रक्तप्रवाहं हृदयस्थितं वा वातीय। थाभ्रं हरते तथैव मूलानि पुष्पाणि च मातुलिंग्याः समं पिबेत्तंडुलधावनेन घ्राणप्रवृत्तेजलमा
श्वदेयं सशर्करं नासिकयोः पयो वा द्राक्षारसं क्षीरघृतं पिबेद्वा सशर्करं इक्षुरसं हितं वा १ उदुंबराणि पक्कानि गुडेन मधुना पिबा उपयुक्तानि
निघ्नंति नासारक्तं नृणां घ्रुवं १ नस्यं दाडिमपुष्पोत्थं रसो दूर्वाभवोऽथवा आम्रास्थिजः पलांडोर्वा नासिकाश्रुतरक्तजित् १ हरीतकी दाडिमपु
ष्पदूर्वालाक्षारसो नस्यविधानयोगात् निवारयत्येवाचिरप्रवृत्तमत्यायुनासांतरशोणितौघं १ नासाप्रवृत्तं रुधिरं घृतभृष्टं सुश्यामपिष्टमा
मलकं सेतु रिवरुधिरवेगं रुणाद्धि मूर्ध्नि प्रलेपेन १ प्रियंगुमृत्तिकालोध्रमंजनं चेति चूर्णयेत् तच्चूर्णं योजयेत्तत्र रसे क्षौद्रसमन्वितं २
नासिकामुखपायुभ्यो योनिमेढ्राच्च वेगितं रक्तपित्तं श्रवं हंति सिद्धयोपः प्रयोगराट् ३ यत्र शस्त्रक्षते चैव रक्तं पिष्टंति वेगिनः तदप्यनेन
चूर्णेन तिष्ठत्येवावचूर्णितं ४ मेढ्रतो निश्रवत्येवास्मिउत्तरदूषने ५ अथ दूर्वाद्यं घृतं दूर्वामुत्पलकिंजल्कं मंजिष्ठां सैलवालुकं शिवा
लोध्रमुशीरं च मुस्ता चंदनपद्मकैः निपचेत्कार्षिकैः कल्कैर्घृतप्रस्थं सुखाग्निना तंडुलांबु अजाक्षीरं दत्वा चैव चतुर्गुणं तत्पानाद्वमतो
रक्तं नावनान्नासिकागतं कर्णाभ्यां यस्य गच्छेच्च तस्य कर्णौ प्रपूरयेत् २ चक्षुर्भ्यां विगिरक्ते च पूरयेत्तेन चक्षुषी मेढ्रपायुप्रवृत्ते तु बस्तिक
र्मप्रकारयेत् रोमकूपे प्रवृत्ते तु वदाभ्यंगे प्रयोजयेत् ४ अथ वासादि घृतं वासां सशाखां सदलां समूलां कृत्वा कषायं कुसुमानि वास्याः
प्रदाय कल्कं विपचेद्घृतं च सक्षौद्रमाश्वेवा निहंति रक्तं १ घ्राणस्य कोविदारस्य वृषस्य पककुसुमस्य च कलकाटयत्वात्पुष्पकलकं च स्के
पलचतुष्टयं १ इतिहं० सनास्य कोविदारस्य वृषस्य कुसुमस्य च कल्काभाणात्मशांसति पुष्पकल्कं चतुष्टयं १ इति योगनरं० शतावरी
च दाडिमातितिडीकं काकोलिकोदामधुकं विदारी पिष्ट्वा च मूलं फलपूरकस्य पचेत् घृतं क्षीरचतुर्गुणं तत् १ कासज्वरोन्मादविबंधशूलं ८०

तद्रक्तपित्तं विविधं निहंति १ इति शतावरीघृतं अथ चंदनादि चूर्णं चंदनं नलदं लोध्रं उशीरं पद्मकेसरं नागपुष्पं च बिल्वं च भद्रमुस्तं सशर्करं
१ ह्रीबेरं चैव पाठा च कुटजोत्पलमेव च शृंगबेरं सातिविषा धातकी सरसांजनं २ आम्रास्थि जंबुसारास्थि तथा मोचरसोऽपि च नीलोत्पलं
समंगा च सूक्ष्मैला दाडिमत्वचः ३ चतुर्विंशतिरेतानि समभागानि कारयेत् तंडुलोदकसंयुक्तं मधुना सह योजयेत् ४ योगं लिहितापित्तानां
मर्शासांतरिणां तारिणां तथा मूर्छामदोपसृष्टानां तृष्णार्तानां प्रदापयेत् ५ अतीसारं तथा छर्दिं स्त्रीणां चापि रजोग्रहे प्रच्युतानां च गर्भाणां
स्थापनं परमिष्यते ६ अश्विनोः संमतो योगो रक्तपित्तनिबर्हणः ७ अथ एलादिगुटिका एलापत्रत्वचोऽर्धाक्षाः पिप्पल्यर्धपलं तथा शि
तामधुरखर्जूरमृद्वीकाश्च पलोन्मिता १ संचूर्ण्य मधुना युक्ता गुटिकाः संप्रकल्पयेत् अक्षमात्रां ततश्चैकां भक्षयेन्नां दिने दिने २ कासश्वा
सज्वरं हिक्काछर्दिमूर्छामदभ्रमं रक्तनिष्ठीवनं तृष्णापार्श्वशूलमरोचकं शोषप्लीहयकृद्वातं स्वरभेदं क्षतं क्षयं गुटिका तर्पणी वृष्या
रक्तपित्तं विनाशयेत् ४ अथ कूष्मांडकावलेहः कूष्मांडकात्पलशतं सुस्विन्नं निष्कुलीकृतं पचेत्तत्सघृतप्रस्थे पात्रे ताम्रमये दृढे १ यावन्
मधुनिभः पाकः स्यादारखंडशतं न्यसेत् पिप्पली शृंगबेरं च द्वे पले जीरकस्य च २ त्वगेलापत्रमरिचधान्यकानां पलार्धकं न्यसेच्चूर्णीकृ
तं तत्र दर्व्या तत् घट्टयेत्ततः ३ लीढ्वा शीते सुशीते च दद्यात्क्षौद्रं घृतार्धकं क्षौद्रार्धकां सितां कोविद्राक्षां कोविन्सितार्धकं ४ द्राक्षोद्भुं
निलवंगानि कर्षंकर्पूरकं क्षिपेत् तद्यथाग्निबलं खादेद्रक्तपित्तक्षतक्षयी ५ कासश्वासतमश्छर्दितृष्णाज्वरनिपीडितः वृष्यं पुनर्नवकरं
बलवर्णप्रसादनं ६ उरःसंधानकरणं बृंहणं स्वरबोधनं अश्विभ्यां निर्मितं श्रेष्ठं कूष्मांडकरसायनं ७ अथ खंडकूष्मांडः खंडकामलका
दयाह्वाद्रसत्रस्थ्हृद्योक्तितः खंडकूष्मांडकेकंसः स्विन्नकूष्मांडकद्रवात् १ अन्यत्र खंडकूष्मांडे संमतः सकलो रसः पंचाशत्पलं
स्विन्नं कूष्मांडात्प्रस्थमाज्यतः २ पक्वं पलशतं खंडं वासाक्वाथाढके पचेत् शिवाधात्रीघनभार्ङीत्रिसुगंधैश्च कार्षिकैः तालीसविश्वधा
न्याकमरिचैश्च पलांशकैः पिप्पलीकुडवं चैवं मधुमानिप्रदापयेत् ४ कासश्वासज्वरं हिक्कां रक्तपित्तं हलीमकं हृद्रोगमम्लपित्तं च पी
नसं चव्यपोहति ५ अथ वासाखंडः तुलामादाय वासायाः पचेदष्टगुणे जले तेन पादावशेषेण पाचयेदाढकं भिषक् चूर्णानाम
भयानां तु खंडस्तेशापलं तथा चातुर्जातं पलं तत्र चूर्णितं तत्र दापयेत् ३ रक्तपित्तं निहंत्याशु कासश्वासं तथा क्षयं विद्राधिं जठरं गुल्मं 163/1938

पीं०र० ८१

तद्वद्द्रोणपीतसात् पलार्धभोजनं वास्यपथ्येष्टं तत्र भोजनं ५ अथ खंडकाद्यावलेहः शतावरीमुंडीतकामलामलात्वचः पुष्करमूलभार्गी दृषोरह
त्वांसादिरस्यमूलीपृथक्पृथक्पंच पलानिमात्रा १ पक्त्वं जलद्रोणमितेष्टमांशयावत् तस्मिंश्च छेषं मथेवस्त्रं विमर्दितस्यापि निधाय धीमान्पला
नि द्वादशमाक्षिकस्य २ तथा सुवर्णस्य च लोहजस्य विधाधितं खंडधृतस्य तुल्यं देयं पलं षोडशकं विधिज्ञो विपाचयेल्लोहमये कटाहे ३
गुडेन तुल्यं च यदा भवेत्तदा तुगाविडंगं मगधा च शुंठी द्विजीरकं कर्कटकं पलत्रिकं धान्यं मरीचं सकणासकेसरं ४ पलेनमात्रां विदधीत तस्य
थक् सुधाहितं चूर्णमिदं घृतेन स्निग्धे कटाहे प्रणिधाय युंज्यात् कर्षप्रमाणां विदधीत चूर्णं ५ प्रभातकाले च सदुग्धपानं गुरूणि चान्नानि
च भोजनानि रक्तं सपित्तं सहसा निहंति रक्तप्रवाहं च सरक्तशूलं ६ रक्तातिसारं रुधिरप्रमेहं तथैव वल्लीं वहितं नराणां भगंदरार्शः श्वयथुं
निहंति तथाम्लपित्तं किल रोगराजं ७ विशेषतः कुष्ठयुतश्च गुल्मान् बलप्रदं दृष्यतमं प्रदिष्टं ८ अथ रसः शुद्धपारद बलीप्रवाहकं हेम
माक्षिकभुजंगरंगकं मारितं सकलमेतदुत्तमं भावयेत्पृथक्पृथग्द्रवेस्त्रिशः १ चंदनस्य कमलस्य मालतीकोरकस्य वृषपल्लवस्य च धान्य
वारण कणा शतावरी शाल्मलीवटजराम्भतस्य च २ रक्तपित्तकुलकंडनाभिधो जायते रसवरोस्य पित्तिनां प्रणदोमधुवृषद्रवैरियं सेवित
स्तु वल्लकं छलंमितः ३ नास्त्यनेन सममात्र भूतले भेषजं किमपि रक्तपित्तिनां इति रक्तपित्तकुलकुठारो रसः अथ वासासव आट
रूषनलपल्लवद्रवं पालिके सरभस्मवल्लिकं कर्षसंमितमधुप्रयोजितं प्राश्यनाशयति रक्तपित्तकं १ अथ बोलपर्पटी स्वगंधकसुकज्जलिका
याः पर्पटीसमसुतासमभागं बोलचूर्णविहितं प्रतिवाप्यं स्याद्रसोयमसृगामयहारी १ वल्लयुग्ममुगलं प्रतिदेयं शर्करामधुयुतः किल दत्तः
रक्तपित्तमुग्रजास्रुतियोनिश्रावमाशुविनिवारयतीशः २ अथ सुधानिधिरसः गंधं सूतं माक्षिकं लोहचूर्णं सर्वं घृष्टं त्रिफलोदकेन लोहे
पात्रे गोपयसा चकुलारात्रौ दद्याद्रक्तपित्तप्रशांत्यै १ इति सुधानिधि यच्चापि ज्वरे प्रोक्तं वहितं तच्च भेषजं रक्तपित्ते हितं तच्च क्षतक्षीणे हि
तं च यत् इति योगरत्नात् अथ वंगसेनात् पत्रं लवंगैलानतचंदनानां श्यामासमुस्तं शुंठीमधुकोत्पलानां साध्याविमांसी द्विगुणोत्तराणां चूर्णं शि
तासौद्रसमन्वितानां दाहज्वरे लोहितपित्तयुक्ते कासे क्षये शोणितमूत्रकृच्छ्रे रक्ते तिमात्रे पतिते सुरवे च मुखे च नासाश्रुतिमेढ्रयोगे प्रकर्षु
यं रक्तविनिग्रहार्थं चूर्णं च शिष्टं नमहागदघ्नं १ इति पत्रकादिचूर्णं अथ श्यामाघृतं श्यामाश्वमोरटानंताशर्कराभिः स्तनं घृतं सर्वदा ८१

165/1936

पहरं पथ्यं नस्यं नाशांत तेसत्रि १ अथ दूर्वाद्यं तैलं दूर्वाभव्यफलं माषकुलत्थौ वंशपत्रिका जलस्थलोद्भवो कर्णमोचकं रक्तमंजरी दंडोत्पलस्य मूलं च
निःक्वाथ्य षड्गुणेंभसि तत्पादशेषितं तैलं तत्कल्कं तथापि पाचयेत् तत्तैलं प्रतिमर्शेण आयुधार्त्यं गदं जयेत् १ अथ कामदेवघृतं अश्वगंधापल
शतं तदर्धं गोक्षुरस्य च शतावरीविदारी च शालिपर्णीबलामृता अश्वत्थस्य च शृंगाणि पद्मबीजं पुनर्नवा काश्मर्यश्च फलं चैव माषबीजं तथैव च
पृथग्दशपलान्भागान् चतुर्द्रोणेंभसा पचेत् द्रोणं शेषं रसेनस्मिन् घृतेशीतं प्रदापयेत् मृद्वीकापद्मकं कुष्ठं पिप्पलीरक्तचंदनं पत्रकं नागपुष्पं
च आत्मगुप्ताफलं तथा नीलोत्पलं सारिवे द्वे जीवनीयान्यशेषतः पृथक्कर्षसमाभागाः शर्करायाः पलद्वयं रसः स्यात्सौद्रसंस्तरणां आढकाढका
दृतं चतुर्द्रोणेन पयसा घृतप्रस्थं विपाचयेत् रक्तपित्तं क्षयं क्षीणं कामलावातशोणितं हलीमकं पांडुरोगं वर्णभेदं स्वरक्षयं मूत्रकृच्छ्रमुरोदाहं
पार्श्वशूलं च नाशयेत् एतच्छाशांप्रदातव्यं वहृतःपुरचारिणां स्त्रीणां चैवाप्रजानां च दुर्बलानां च देहिनां वृषं बलकरं धन्यं हृद्यं वृष्यरसायनं
वीजस्तेजकरं स्वर्यं आयुष्यं प्राणवर्धनं संहृष्यति सुद्धांश्चपुरुषांदुर्बलेंद्रियान् सर्वरोगविनिर्मुक्तोस्त्येयशिकोयथाद्रुमः कामदेवमिदं ख्या
तं सर्पिरुक्तं महागुणं १ अथ अनंताद्यं घृतं अनंतासारिवापाठासलोध्रं नीलमुत्पलं कल्कैरेतैः पचेत्सर्पिः सक्षीरं नावनं परं रक्तपित्तप्र
शमयेन्नारीणां प्रदरं तथा मधुकं मधुकं द्राक्षात्वक्षीरी पिप्पली तथा त्रिजातस्यात्र्यः कर्षापिप्पल्याश्च तथा पलं द्राक्षामधुकखर्जूरपला
शंश्लक्ष्णचूर्णितं मधुना गुटिकां बध्वा हंतीहापित्तशोणितं कासश्वासारुचिच्छर्दिमूर्च्छादिकामदभ्रमान् क्षतक्षयं रसभ्रंशं सप्लीहं चाप्यमा
रुतान् रक्तनिष्ठीवहृल्लाशं रुक्षिपासाज्वरानपि इति मधुकाद्या गुटिका दूर्वामधुकमंजिष्ठाद्राक्षेक्षुरसचंदनैः सारिवाद्वयनकाद्यैः
तैलप्रस्थं विपाचयेत् क्षीरं चतुर्गुणं दत्वा सिद्धमभ्यंजनापिबेत् रक्तपित्तं हरेच्चैतद्बल्यं वातघ्नमुत्तमं दूर्वातैलमिति ख्यातं सुवर्णकरणं महत्
इति द्वितीय दूर्वातैलं अमृतात्रिवृतादंतीश्राविणीखदिरोवृषा चित्रकोभृंगराजश्च कोकिलाक्षं सपुष्करं पुनर्नवावृषाकाशाशिग्रुमोरटदा
भितानि चैतानि जलद्रोणे विपाचयेत् अष्टभागं च विष्टं तु कषायमुपकल्पयेत् त्रिफलायाः स्तथा प्रस्थं जले षड्गुणपाचितं तस्माद्दष्टावशे
षं तु कषायमुपकल्पयेत् माक्षिकेणहतस्यापि पुटितस्य यथाविधि अपसं चूर्णितं शतं पलं शोषडसंमितं पलान्यभ्रस्य चत्वारि नावांतिगं

यो०र०
८२

धकस्यच द्विपलेवरसस्यापिस्खलितस्यापिधानतः गुडस्यचपलान्यष्टौशितायाश्चपलानिकं रक्तापित्तेथपंडस्यमत्स्यंडशवापिकर्षिका गुग्गुलो
द्विपलंहृत्वात्रयस्यार्धंसर्पिषातथा एवंपाकविधिज्ञस्तुपचेल्लोहंसमाहितः शीतेचतस्मिन्मधुनः क्षिपेदष्टपलंभिषक् माक्षिकस्यविशुद्धस्यपलं
रजसःक्षिपेत् शिलाजतोस्तथाचूर्णंपलार्धंसंमितंपृथक् अथैषांप्रक्षिपेच्चूर्णंपलमात्रंपृथक्पृथक् त्रिकटुत्रिफलादंतीत्रिवृताजीरकद्वयं
गायत्रीसारतालीसंधान्यकंमधुयष्टिका शुभारसांजनंशृंगीचित्रकंतालकंत्वचं चातुर्जातककंकोललवंगंजातिकाफलं द्राक्षाखर्जूरकंचूर्णं
पलार्धंसमितंपृथक् एषलोहपरः श्रीमान्सर्वव्याधिप्रणाशनः यत्रयत्रप्रयुज्येततत्तदाशुविनाशयेत् रक्तपित्तेम्लपित्तेचक्षयेकुष्ठेज्वरेरु
चौ दुर्नामीचोदरेशूलेग्रहण्यांचामवातिके वातरक्तेमूत्रकृच्छ्रेप्रमेहेशर्करागदे अस्यौषधप्रयोगान्मनुष्यस्तारुण्यमाधिगच्छति अल्पवर्षेणकुर्वीत
तुलंमाक्षिकसर्पिषा माक्षिकंरात्रिवारश्चायावदृष्टेचमाक्षिकात् वर्जयेद्विदलंसूपंमांसेचानूपसंभवं ककारपूर्वकंसर्वंप्रयत्नेनविवर्जयेत्
अमृताख्योवरोलोहः सर्वत्रैवोपयुज्यते अनेनजंतवःस्वस्थानीरुजःसंतिनान्यथा १ इतिअमृतारव्यलोहरसायणं इतिवंगसेनात्
अथपथ्यापथ्यविधिः अधोगतेछर्दनमूर्ध्वंभिन्निर्गमेविरेचनंस्यादुभयत्रलंघनं पुराणनाषष्टिकशालिकोद्रवाः प्रियंगुनीवारयवाश्च
साधिका १ मुद्गाम्मसूरास्तवणकास्तुवर्यो मकुष्टकाश्चिक्कदर्विमत्स्याः शशाःकपोतोहरिणेनलावशाराःशिरावर्तवर्तकाश्च चकोर
रात्रायश्वसकालपुछाःकपिंजलाश्चापिकथामवर्गः २ गवाम्जायाश्चपयोघृतंमहिष्याः पनसंप्रियालं रंभाफलंकर्कटकंतंदुलीयं
पटोलवेत्राग्रमहार्द्रिकानि ४ पुराणकूष्मांडफलंचपक्वंतालाचतद्वीजफलानियालः स्वादूनिबिंबानिचदाडिमानिखर्जूरधात्रीमि
शिनारिकेलं ५ कसेरुशृंगाटकपौष्कराणिकपित्थशालूकपरूषकानि भानिवंशाकंपिकुमुदपत्रंतुंबीकलिंगानिचलाजसक्तुः ६
द्राक्षासितामाक्षिकमिक्षवश्चशीतोदकंचौद्भिदवारिचापि सेकोवगाहःशतधौतसर्पीरभ्यंगयोगःशिशिरप्रदेहः ७ हिमानिल
श्चंदनमिंदुपादाःकथाविचित्राश्चमनोहराणि धारागृहंभूगृहसुशीतानानिवैदूर्यमुक्तामणिधारणंच ८ रंभासलांभोरुहपत्रशय्या
क्षौमांबरंचोपवनंसुशीतं प्रियंगुकाचंदनरूषितानामालिंगनंचापिवरांगनानां ९ पद्माकराणांसरितांह्रदानांचंद्रोदयानांहिमशीक
राणां सशीतलानांगिरिनिर्झराणांश्रुतिप्रशस्तानिचकीर्तनानि १० मृणालनीरांहिमवालुकाचपथ्यंनृणांशोणितपित्तरोगे ११ ८२

167/1936

आयामाध्वनिषेवनंरविकरंस्त्रीस्त्यानिकर्माणिवक्षोभोवेगविधारणंचपत्रनाहस्त्यश्वयानानिच स्वेदास्रस्रुतिधूमपानसुरतक्रोधाःकुलत्थोगु
डोवार्ताकदधिमाषसर्षपतिलक्षाराश्चकोपप्रदाः १२ तांबूलंमलदंमरीचलशुनंशिंबीविरुध्याशनंकद्वम्लंलवणंविदाहिचगणस्त्याज्योस्रपि
त्तैर्नृणां १३ इतिपथ्यापथ्यं इतिरक्तपित्तचि० अथराजयक्ष्मानिदानं तत्रकारणचतुष्टयमाह वेगरोधात्क्षयाच्चैवसाहसाद्विष
माशनात् त्रिदोषोजायतेयक्ष्मागदोहेतुचतुष्टयात् तस्यसंप्राप्तिमाह कफप्रधानैर्दोषैस्तुरुद्धेषुरसवर्त्मसु क्षीयंतेधातवःसर्वेततः
शुष्यतिमानवः २ पूर्वरूपमाह श्वासांगसादकफसंस्रवतालुशोषवम्यग्निसादमदपीनसकासनिद्राः शोषेभविष्यतिभवंतिसत्ता
पितंतु शुक्लेक्षणोभवतिमांसपरोरिरंसुः ३ तथास्वप्नेकाकादिवाहनंचपूर्वरूपमेव स्वप्नेचकाकशुकशल्लकनीलकंठगृध्रास्त
थैवकपयः कृकलासकाश्च तंवाहयंतिसनदीर्विजलाश्चपश्येच्छुष्कांस्तरूनपवनधूमदवार्दितांश्च ४ त्रिरूपंदर्शयन्नाह अंसपा
र्श्वाभितापश्चसंतापःकरपादयोः ज्वरःसर्वांगगश्चेतिलक्षणंराजयक्ष्मणः ५ तस्यषड्रूपमपिदर्शयितुमाह भक्तेद्वेषोज्वरः
श्वासःकासःशोणितदर्शनं स्वरभेदश्चजायंतेषड्रूपेराजयक्ष्मणि ६ दोषभेदेनएकादशरूपाणि स्वरभेदोनिलाच्छूलंसं
कोचश्चांसपार्श्वयोः ज्वरोदाहोतिसारश्चपित्ताद्रक्तस्यचागमः ७ शिरसःपरिपूर्णत्वमभक्तछंदएवच कासःकंठस्यचोध्वंसोवि
ज्ञेयःकफकोपनः ८ बहुरूपोअसाध्यस्तमाह एकादशभिरेलैर्वाषड्भिर्वापिसमन्वितं जह्याद्दोषान्वितंजंतुमिच्छन्सुविपुलंयशः ९
असाध्यलक्षणमाह सर्वैरर्धैस्त्रिभिर्वापिलिंगैर्मांसबलक्षये युक्तोवर्ज्यश्चिकित्स्यस्तुसर्वरूपोप्यतोन्यथा १० महाशिनंक्षीयमाणं
अतिसारनिपीडितं शूनमुष्कोदरंचैवयक्ष्मिणंपरिवर्जयेत् ११ उपक्रमेदात्मवंतंदीप्ताग्निमकृशंनरं शुक्लाक्षमन्नद्वेष्टारंऊर्ध्वश्वा
सनिपीडितं १२ कृच्छ्रेणबहुमेहंतंयक्ष्माहंतीहमानवं अन्यच्च परंदिनसहस्रंतुयदिजीवतिमानवः सुभिषग्भिरुपक्रांतस्तरुणः
शोषपीडितः १२ असाध्यलक्षणंयक्ष्मत्वंनिरस्यनाह व्यवायशोकवार्धक्यव्यायामाध्वप्रशोषिता व्रणोरक्षतसंज्ञोचयक्ष्म
णोलक्षणैःशृणु १३ व्यवायशोषिणोलक्षणमाह व्यवायशोषीशुक्रस्यक्षयलिंगैरुपद्रुतः पांडुदेहोयथापूर्वंक्षीयतेचास्यधा

यो०र०
८२

तवः १४ शोकशोषमाह प्रध्यानशीलस्त्रस्तांगः शोकशोषपतिताहृशः चिंताशुक्रक्षयकृतैर्विकारैरुपलक्षितः १५ जराशोषिणमाह जरा
शोषीकृशोमंदवीर्यबुद्धिबलेंद्रियः कंपनोरुचिमान्भिन्नकांस्यपात्रहतःस्वरः १६ शरीरायासजननंकर्मव्यायामशीवती शीवतिश्लेष्मणाहीनगौरवारुचिपीडितः संप्रशुतास्यनासाक्षः शुष्करूक्षमलछविः १७ अध्वशोषिणमाह अध्वशोषीत्वस्तांगः संभृष्टःपरुषछविः प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः १८ व्यायामशोषिणोलक्षणमाह व्यायामशोषीभूयिष्टमेभिरेवसमन्वितः लिंगैरुरःक्षतकृतैसंयुक्तश्चक्षतंविना १९ व्रणशोषिणमाह रक्तक्षयाद्वेदनाभिस्तथैवाहारयंत्रणात् व्रणिनश्चभवेच्छोषःसचासाध्यतमोमतः २० उरःक्षतनिदानमाह धनुषायस्यतोनित्यंभारंउद्वहतोगुरुं युध्यमानस्यबलिभिः पततोविषमोच्चतः २१ वृषंहयंवाधावंतंदम्यंचाप्यन्निगृह्णतः शिलाकाष्ठाश्मनिर्घातान्क्षिपतोनिघ्नतःपरान् २२ अधीयानस्यवात्युच्चैर्दूरंवाव्रजतोद्रुतं महानदीवातरतोहयैर्वासहधावतः २३ सहसोत्पततोदूरंतूर्णंचातिप्रनृत्यतः तथान्यैःकर्मभिःक्रूरैःभृशमभ्याहतस्यवा २४ विक्षतेवक्षसिव्याधिर्बलवान्समुदीर्यते २५ उरःक्षतक्षीणयोःपरस्परापेक्षाकारणमाह स्त्रीषुचातिप्रसक्तस्यरूक्षाल्पप्रमिताशनः उरोविरुज्यतेतस्यभिद्यतेथाविभज्यते २६ प्रपीड्यतेततःपार्श्वेशुष्यत्यंगंप्रवेपते क्रमाद्वीर्यंबलंवर्णोरुचिरग्निश्चहीयते २७ ज्वरोव्यथामनोदैन्यंविड्भेदोग्निवधस्तथा दुष्टःश्यावोथदुर्गंधःपीतोविग्रथितोबहु २८ कासमानस्यचाभीक्ष्णंकफःसास्रःप्रवर्तते सक्षतःक्षीयतेत्यर्थंतथाशुक्रौजसोक्षयात् २९ पूर्वरूपमाह अव्यक्तंलक्षणंतस्यपूर्वरूपमितिस्मृतं उरोरुक्शोणितच्छर्दिकासोवैशोषिकःक्षतः ३० क्षीणस्वरूपमाह क्षीणेसरक्तमूत्रत्वंपार्श्वपृष्ठकटिग्रहः अल्पलिंगस्यदीप्ताग्नेःसाध्योबलवतोनवः ३१ इतिराजयक्ष्मानिदानं अथातोराजयक्ष्माचिकित्सितंव्याख्यास्यामः मलायत्तंबलंपुंसांशुक्रायत्तंतुजीवितं तस्माद्यत्नेनसंरक्षेद्यक्ष्मणोबलरेतसि १ व्यवायशोषिणंक्षीररसमांसाज्यभोजनैः मधुरैर्मधुरैर्गंधैर्जीवनीयैरुपाचरेत् १ व्रणशोषंजयेत्स्निग्धैःदीपनैःस्वादुशीतलैः दीपनैर्लघुभिश्चान्नैःशोकशोषमुपाचरेत् हर्षणाश्वासनैःक्षीरैः स्निग्धैर्मधुरशीतलैः आश्वासुखैर्दिवास्वप्नशीतैर्मधुरबृंहणैः २ तक्रमांसरसाहारैरध्वशोषिणमाचरेत् द्रवरम्लैरनम्लैर्वाश्चप्रमांसरसादिभिः ४ व्यायामशोषिणंस्निग्धैः ८२

169
1936

क्षतक्षयहितैर्हिमैः उपाचरेज्जीवनीयैर्विधिनाश्लेष्मिकेणतु ५ बलिनोबहुदोषस्यवमनंरेचनंतथा वातश्लेष्महरंकार्यंदद्याद्दोषापहंपुरा ६ यक्ष्मिणःक्षीणदेहस्ययत्नतस्याद्विषोपमं ७ शालिषष्टिकगोधूमयवमुद्गादयःशुभाः मद्यानिजांगलाःपक्षिमृगाःशस्ताविशुष्यतः ८ दंतकाष्ठंकारवेल्लंचतैलंबिल्वंचराजिकां मैथुनंचदिवानिद्रांक्षयीकोपंचवर्जयेत् ९ मूलकानांकुलित्थानांयूषैर्वासूपसंस्कृतैः सपिप्पलीकंसयवंसकुलित्थंसनागरं १० दाडिमामलकोपेतंस्निग्धमाजरसंपिबेत् तेनषड्विनिवर्तंतेविकाराःपीनसादयः ११ सधान्ययवगोधूममुद्गाश्चापिसदाहिताः स्त्रियश्चतुष्पदंश्चेष्टापुमांसोविहगामताः १२ हरिणछागमांसंतुश्लक्ष्णचूर्णीकृतंशुभं अजाक्षीरेणपानंचक्षयव्याधिनिवारणं १३ छागमांसंपयश्छागंसर्पिश्छागंसशर्करं छागोपसेवाशयनंछागमध्येतुयक्ष्मनुत् १४ अथषडंगयूषः द्रव्यतोद्विगुणंमांसंसर्वतोष्टगुणंजलं पादस्थंसंस्कृतंवाज्येषडंगोयूषउच्यते धान्यकंपिप्पलीविश्वंदशाम्लीजलंपिबेत् पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये १ दशाम्लबलारास्नापुष्करामरदारुनागरैः क्वथितंपेयंपार्श्वांसशिरोरुक्क्षतकासादिशांतयेसलिलं २ इतिदशाम्लादिः ककुभत्वक्नागरबलावातारिबीजानिचूर्णितंपीतं पक्कंमधुघृतयुक्तंसाध्यंयक्ष्मारिकासहरं १ अश्वगंधामृताभीरुदशमूलीबलाद्वयं पुष्करातिबलेभ्योतिक्षयंक्षीरसेवेशिवः १ अथतालीसाद्यंचूर्णं तालीसपत्रंमरिचंनागरंपिप्पलीशुभा यथोत्तरंभागवृद्ध्यात्वगेलेचार्धभागिके पिप्पल्यष्टगुणाचात्रप्रदेयासितशर्करा कासश्वासारुचिहरंतच्चूर्णंदीपनंपरं २ पांडुहृद्ग्रहणीदोषप्लीहशोषज्वरापहं ३ अथसितोपलाद्यंचूर्णं सितोपलाषोडशस्यादष्टौस्याद्वंशरोचनः पिप्पलीस्याच्चतुःकर्षास्यादेलास्याच्चद्विकार्षिका एकःकर्षस्त्वचःकार्यांचूर्णयेत्सर्वमेकतः सितोपलादिकंचूर्णंमधुसर्पियुतंलिहेत् २ कासश्वासक्षयहरंहस्तपादांगदाहजित् मंदाग्निंसुप्तजिह्वत्वंपार्श्वशूलमरोचकं ज्वरमूर्ध्वगतंरक्तंपित्तमाशुव्यपोहति ३ अथलवंगाद्यंचूर्णं लवंगंकंकोलमुशीरचंदनंनतंसनीलोत्पलकृष्णजीरकं एलासकृष्णागरुभृंगकेसरंबलासविश्वानलदंसहांबुना १ कर्पूरजातीफलवंशरोचनंसिताधर्भागंसमसूक्ष्मचूर्णितं सरोचनंतर्पणमग्निदीपनंबलप्रदंवृष्यतमंत्रिदोषनुत् २ उरोविबंधंतमकंगलग्रहंसकासहिध्मारुचियक्ष्मपीनसं ग्रहण्यतीसारभयासृजक्षयं

प्रमेहगुल्मांश्चनिहंतिसत्वरं २ अथकर्पूराद्यंचूर्णं कर्पूरचोचककंकोलजातीफलदलैःसमाः लवंगमांसमरिचकृष्णाशुंठ्याविवर्धिताः १ चूर्णं
सितासमंहृद्यंसदाहक्षयकासजित् वैवर्ण्यपीनसश्वासछर्दिकंठामयापहं २ प्रयुज्यंचानुपानेवाभेषजेद्वेषिणांहितं ३ इतिहृद्यदाहेक
र्पूराद्यंचूर्णं अथएलादिचूर्णं एलापत्रंनागपुष्पंलवंगंभागस्त्वेपादौचखर्जूरकस्य द्राक्षायष्टीशर्करापिप्पलीनांचत्वार्येतत्क्षौद्रयुक्तं
क्षयेस्यात् अथाश्वगंधाचूर्णं अश्वगंधाद्वात्रिंशत्पलंतदर्धंनागरान्वितं तदर्धकणसंयुक्तंमरिचंचचतुर्थकं १ चातुर्जातंवरालंचभागीतालीसप
त्रकं कचोरंजाजिकैडर्यमासीतत्कोलमुस्तकं रास्नाकटुकरोहिण्यांजीवंतिकुष्ठकंतथा प्रातःकर्षमितंचूर्णंचूर्णेनसमशर्करा २ प्रातःकालेलि
हंचूर्णंजलंनोष्णेनसेवयेत् धानक्षयेपिनक्षयेअजागोघृतसंयुतं ४ श्लेष्मक्षयेक्षौद्रयुक्तंनवनीतेनमेहजित् शिरोभ्रमणपित्तार्तेगोक्षीरेणस
मायुतं ५ क्षतक्षीणंचदेहंचविशेषबलवर्धनं मंदोदरंचमंदाग्निंकुक्षिशूलंदरापहं ६ अनुपानविशेषेणसर्वरोगहरंपरं अथद्राक्षादि
चूर्णं द्राक्षाशालाजसितोत्पलंसमधुकंखर्जूरगोपीतुगाक्षीरीरामलकाष्टचंदननतंतत्कोलजातीफलं चातुर्जातकणासधान्यकमिदंचूर्णंसमं
शर्करायातभक्षितमात्मकेनविधिनापित्तंसदाहंजयेत् १ मूर्छाछर्दिमरोचकंचशमयेत्कायस्यकांतिप्रदंपांडूकामलरक्तपित्तमुदरंदाहज्व
रंरोचकं यक्ष्माणंरुधिरभ्रमे हृदरणंतद्योनिदोषापहं रक्तार्शोमद शाधिविद्राधिहरंद्राक्षादिचूर्णोत्तमं २ यवगोधूमचूर्णंवाक्षीरसिद्धं
घृतप्लुतं सक्तुनासर्पिषाक्षौद्रासितात्कान्नक्षयशांतये २ अथचतुर्दशांगलोहः रास्नाकर्पूरतालीसभेकपर्णीशिलाजतु त्रिकटुत्रिफला
मुस्तविडंगदहनासमा चतुर्दशायसोभागास्तच्चूर्णंमधुसर्पिषा लीढंकासंज्वरंश्वासंराजयक्ष्माणमेवच २ बलवर्णाग्निपुष्टिंचवर्धनंदो
षनाशनं अथबृहत्त्र्यायसं त्रिकटुत्रिफलाभीजीजातीफललवंगकैः नवभागोन्मितैरेतैः समंतीक्ष्णंमृतंभवेत् १ संचूर्णलोडयेत्क्षौ
द्रेनित्यंयोसेवतेनरः कासश्वासंक्षयंमेहंपांडुरोगंभगंदरं २ ज्वरंमंदानलंशोथंसंमोहंग्रहणीजयेत् ३ अथशिलाजतुयोगः फलत्रिक
क्वाथविपुष्टमाक्षीशाघ्रंगडूच्यादशमूलसिद्धं स्थिरादिकाकोलियुगादिसिद्धंशिलाजतुस्यात्क्षयिणुभव्यान्तं १ द्राक्षाखर्जूरसर्पि
र्भिःपिप्पल्याचसहस्मृतं सक्षौद्रंज्वरकासघ्नंस्वर्यंचैतत्प्रयोजयेत् २ मधुनाप्याविडंगाभ्रजतुलोहघृताभया हंतियक्ष्माणमत्युग्रं ८४

सेवनानांहिताशनः ३ शिलाजतुमधुव्योषताप्यलोहरजांसिच क्षीरभुक्लोहितश्चापिक्षयःक्षयमवाप्नुयात् ४ कृष्णाद्राक्षासितालेहःक्षयंहा
क्षौद्रतैलवान् मधुसर्पिर्युतांवाश्वगंधाकृष्णासितोद्भवः ५ कूष्मांडकशिरोषेनरसेनपरिपेषितं लाक्षाकर्षद्वयंपीत्वाजयेद्रक्तक्षयंत्विषा १ शतधौ
तंसमधुकंकुष्ठंतगरचंदनं आलेपनंस्यात्सघृतंशिरःपार्श्वांसशूलनुत् १ अश्वत्थवल्कलंचैवत्रिकटुलोहकिट्टकं गुडेनसहदातव्यंक्षयरोग
विनाशकं १ चिकित्साकलिकातः अथच्यवनप्राशावलेहः द्विपंचमूलीजलसिद्धमाज्यंवासाघृतंवाप्यथषट्पलंच तपोहिपः छागलगव्य
वाथप्रयुज्यतेनागबलाभिधानं शृंगाटामलकीफलानिकबला छिन्नाविदारीसटीजीवंतीदशमूलचंदनघनैःनीलोत्पलैरावृतैः मृद्वीकाष्ट
कवर्गपौष्करयुतैःसार्धंशतंपालिकैरष्टोत्तरंशतानिपंचविपचेधात्रीफलानामयः २ उद्धृत्यामलकानितैलघृतयोःषड्भिश्चषड्भिःफलैः
भृष्टावर्धतुलानिधायविधिवन्मत्स्यंडिकायाःपचेत् शीतेषण्मधुनःपलानिकुडवंवाथाश्वतुर्जातते मुष्टिभागाधिकापलद्वयमयंप्राश्यः
स्मृतश्च्यावनः ३ नशोषःसाफल्यंव्रजतिवपुषीक्षीणमनसोनमूर्छानछर्दिर्नसदापित्तनचश्वासकसनं नवालक्ष्मीर्विघ्नंकचिदपिचनव्याप
द्भयंप्रयोगादेतस्मान्मासिजनाधियोविश्वातिमनः ४ इतिच्यवनप्राशः अथखंडपिप्पल्यावलेहः कृष्णाप्रस्थंपचेदाढकपयसिघृतस्यां
जलिपौरंवत्रं शात्वालेह्योयमस्मिन्मुरकुसुमचतुर्जातविश्वोषणादीन् ग्रंथीश्रीखंडयष्टीमधुमस्तृणजलंजातिकोशंचकर्षं प्रत्येकंचूर्णं
पीत्वामधुकुडवयुतःस्याच्चकृष्णावलेहः १ भोजोमंदाग्निकाशौहरतिसवशिशुस्त्रीजरमानुषेषु प्रायोरथ्योक्षयाद्योविपुलबलकरो
दीपनःपाचनस्य कासश्वासाश्वमेहक्षयरुगतिलपाकामलापांडुकंडूप्लीहाजीर्णज्वरंचानिलकफविकृतिरक्तपित्तंचहन्यात् २ अथ
वासावलेहः तुलामाराप्यवासायाःपचेदष्टगुणेजले तेनपादावशेषेणपाचयेदाढकंभिषक् १ चूर्णानामभयानांतुखंडछेदशतंतथा
द्वेपलेपिप्पलीचूर्णात्सिद्धशीतंचमाक्षिकात् २ कुडवंपलमानंतुचातुर्जातंसचूर्णितं क्षिप्त्वावलोडितंखादेद्रक्तपित्तक्षतक्षयी ३ कास
श्वासग्रहीतस्त्वयक्ष्मणाचविशेषतः इतिशारंगधरात् अथअगस्त्यावलेहः हरीतकीशतंभद्रंयवानामाढकंतथा पलानिदश
मूलस्यविंशतिश्चनियोजयेत् १ चित्रकःपिप्पलीमूलमपामार्गंशटीतथा कपिकच्छूशंखपुष्पीभार्गीचगजपिप्पली बलापुष्करमूलं

171
1936

यो०र०
८५

पृथक्द्विपलमात्रया पचेत्तंचाढकेनीरेर्यवैः स्विन्नैः सर्तनयेत् २ तच्चाभयाशतं दद्यात्कार्यतत्मिन्विचक्षणः सर्पिस्तैलेचपलिके क्षिप्तं कुडव
लांयथा ४ पक्वालेहत्वमानीयासिक्षद्मानिपृथक्पृथक् क्षौद्रंचपिप्पलीचूर्णंदद्यात्कुडवमात्रया ५ हरीतकीद्वयंखादेतेनलेहेननित्यशः
क्षयंकासंज्वरंश्वासंहिक्काशोरुचिंविनिसान् ग्रहणीनाशयेत्स्रपवलीपलितनाशनः बलंलवर्णकरः पुंसांअवलेहोरसायनः ७ विधि
नोगस्त्यमुनिनासर्वरोगनिबर्हणः शर्करामधुसंयुक्तंनवनीतंलिहन्क्षयी ८ क्षीराशीलभतेपुष्टिमतुल्यांवाज्यमासिकं ९ अथशि
वगुटिका त्रीन्वारास्मथमंशिलाजतुजलेभाव्यंभवेत्त्रिफले निक्काथेदशमूलजेथतदनुछिन्नोद्भवायारसे वाद्यालंकथनेपटोलसलिले
यष्टीकषायेपुनर्गोमूत्रेथपयस्तथाधिचगवामेषांकषायेतत: १ द्राक्षाभीरुविदारिकाद्वयपृथक्पर्णीस्थिराउप्करंपाठाकोष्ठजकर्कटाख्य
कटुकाराष्ठ्रांबुदालंबुरैः दंतीचित्रकचव्यवारणकणावीराष्टवर्गौषधीरिष्टोर्णेचरणास्थितेपलमितैरेभिः पृथक्भावयेत् २ धात्रीमेषावि
षाणिकात्रिकटुकैरेभिः पृथक्पंचकैर्द्रव्यैश्चाद्विपलोन्मितैरपिपलंचूर्णंविदारीभवं तालीसात्कुडवंचतुःपलमितप्रासिप्यतेसर्पिस्तैल
स्याद्विपलंपलाष्टकमथक्षौद्राद्विपम्योजयेत् ३ तस्यांपलैःषोडशभिःसितायास्त्वक्क्षीरिकापंचककेसरैश्च बिल्वांशकैस्त्वक्कट
टिसंप्रयुक्तैरित्यक्षमात्रागुटिकाःप्रकल्प्याः ४ तासामेकतमाःप्रयोज्यविधिवत्प्रातःपुमान्भोजनात्प्राग्वामुद्गरलांबुजांगलर
संशीतंम्लनवाजलं माक्षीकंमदिरामगुर्वशनभुक्पीत्वापयोवागवांप्राप्नोत्यंगमनंगवत्कभवतांसंपन्नमानंदकृत् ५ शोफग्रंथिवि
संथवेपथुमीमांपांडूमयश्लीपद प्लीहार्शःप्रदरप्रमेहापिटिकामेदाश्मरीशर्करा ६ हृद्रोगार्बुदवृद्धिविद्रधियकृद्योन्यामय
ध्वंसनः दंसत्वंभगंदरज्वररुजस्तनीघ्नत्नीतृषा ७ वातास्रक्भवलंप्रहृष्टमुरुंकुष्टंकिलासंकृमीन् कासश्वाससुरक्षतक्षय
मसृग्पित्तंसपानात्ययं ८ उन्मादंमदमथयस्मृतिमतिरोत्यंकृशत्वंतनोः सालस्यंचहलीमकंचशमयेन्मूत्रस्यकृच्छ्राणिच ९
भवतिनरश्चसर्वश्वैतैरकालजराहतैर्वर्जनमलिकुलाकारैर्मोभिःशिरस्थशिरोरुहैः प्रसरतिबलंप्रस्लाकंतंवपुश्वसहस्रदृहन्भवति
चानंस्त्रीणांगंतुंजनोजनवल्लभः १० स्तिमितमतिरप्यज्ञानांधः सदस्यंपटुपुमान्सकृदपियथाज्ञानोपेतःश्रुतिस्मृतिमान्भवेत् ८५

173
1936

जातिवयपावुकोपागाशिवस्यसमीपताशिवगुटिकापाकभामेतांकरोतिनमानुषः ११ अथलघुशिवगुटिका कौटजत्रिफलानिंबपटोलाघ
ननागरैः भावितानिदशाहानिरसैर्द्वित्रिगुणानिच १ शिलाजतुपलान्यष्टौतावताशिलशर्करा त्वक्षीरीपिप्पलीधात्रीकर्कटाख्यान्यलोन्मि
तान् निदग्धफलमूलाभ्यांपलंयुञ्ज्यात्रिजातकात् मधुत्रिफलसंयुक्तंकुर्यादक्षसमागुडान् २ दाडिमाम्लंपयःक्षीररसपूषसुरासवान् लभक्ष
यित्वानुपिबेन्निरंनोहितभक्षभाक् ४ पांडुकुष्टज्वरप्लीहतमकार्शोभगंदरं नाशयेन्मूत्रकृच्छ्राणिमूत्रस्तनविबंधनात् ५ यद्यत्रविजितोथेनकां
तलोहंतथाभ्रकं पलंपलंचमिलितेतदास्याल्लिमतःपर ६ तीव्रदुःखप्रदंपांडुंप्रमेहमपरिग्रहं राजरोगंचव्याधिंचजयेदितिकिमद्भुतं ७
अथसूर्यप्रभागुटिका दार्वीव्योषविडंगचित्रकवचापित्ताकरंजाम्रतादेवाह्वातिविषालपात्सकटुकाकुस्तुंबरुःकारवी दौक्षारौलवणत्र
यंगजकणाचव्यंतथापुष्करंतालीसंकणमूलपुष्करजटाभ्रानिंबसंज्ञैर्युतं १ भार्गीपद्मकजीरकोशकृतमःआतीर्वचाभद्रकंसर्वंकर्षसमांश
कंसुरभिपनासक्ष्मंचसंचूर्णेत तद्वत्पंचपलंवरांगिरिजतुःस्यात्तंचमुष्टिःपुरोलौहस्याद्विपलंपलद्वयमथोतापंचसंमिश्रितं २ शिलाप्रंच
पलानिशुभ्रसिकतावांशीपलंयोजितं एकैकंत्रिसुगंधवस्तुपालिकंक्षौद्रैर्घृतैर्लोहयेत् एकीकृत्यसमांशमेवगुटिकाकार्यासुवर्णान्वि
तासाचब्रह्मसुरवांबुजप्रगटितास्त्वर्यप्रभानामतः ३ शोषंकाससुरक्षतंसतमकंपाडूमयंकामलांगुल्मंविद्रधिपार्श्वशूलमुदरंस्त्रीशुल
यंचाक्रिमीन् कुष्ठंशोथविषमज्वरंग्रहणिकाम्मूत्रग्रहंनाशयेद्भुक्तैकागुटिकांप्रहृष्टमनसायोज्यंयथेष्टाशनं ४ नास्त्येतत्सम्मो
षधंत्रिजगतीचक्रेहितंप्राणिनांमुद्रामप्रमदाम्रदद्वीपदेराट्सिंहीतुसूर्यप्रभा ५ अथबलाद्यंचूर्णं बलाश्वदंष्ट्राबृहतीकलशी
धावनीस्थिरां निंबकर्कटकंमुस्तंत्रायमाणंदुरालभां १ कृत्वाकषायंपेयार्थंदद्यात्आमलकीसदि द्राक्षापुष्करमूलंचमेदामामलकानि
च २ घृतंपयश्चलात्सिक्षंसर्पिर्ज्वरहरंपरं क्षयकासप्रशमनंशिरपार्श्वरुजापहं ३ अथकोलाद्यंघृतं कोलक्षारसेतद्वत्लक्षी
राष्टगुणसाधितं कल्कैःषडंगदावीत्वक्द्राक्षाक्षोडफलोडितं १ घृतंखर्ज्जूरमृद्वीकामधुकैःसपरूषकैः सपिप्पलीकंवैश्वयंकासश्वा
सज्वरापहं २ अथगोक्षुराद्यंघृतं श्वदंष्ट्रासदुरालभाचतस्रःपर्णिनीबलां भागान्पलोन्मितान्कृत्वापलंपर्पटकस्यच पचेद्दशगुणे

पी०२०
८९

नीयेदष्टभागावशेषितं रसेशृतेतुद्रव्याणांरपान्कल्कान्समापयेत् सटीपुष्करमूलानांपिप्पलीत्रायमाणयोः २तामलक्याकिरातानांतिक्तस्य
कटुकस्यच पलानांसारिवायाश्चसंपिष्टाकर्षसंमितान् ३तैःसाधयेत्घृतप्रस्थंक्षीरंद्विगुणितंभिषक् ज्वरंदाहंतमःश्वासंकासंपार्श्वंशिरो
रुजं ४तृष्णांछर्दिमतीसारमेतत्सर्पिर्व्यपोहति ५अथजीवंत्यादिघृतं जीवंतीमधुकंद्राक्षाफलानिकुटजस्यच सटीपुष्करमूलंचव्या
घ्रीगोक्षुरकंबलां नीलोत्पलंचामलकीत्रायमाणंदुरालभा पिप्पलीचसमांपिष्ट्वाघृतंवैद्योविपाचयेत् एतद्व्याधिसमूहस्यरोगराजस्य
दुर्जयं रूपमेकादशविधंसर्पिरग्र्यंव्यपोहति २अथचंदनादितैलं चंदनांबुनखंवाप्ययष्टिशैलेयपद्मकं मंजिष्ठासरलंदारुसव्येप्रतिके
सरं १पत्रांबिल्वमुशीरंचकक्कोलंचंदनांबुदं हरिद्रेसारिवेतिक्तालवंगागरुकुंकुमं २त्वग्रेणुनलिकाचैतैस्तैलंमस्तुचतुर्गुणं लाक्षारससमं
मिश्रंग्रहघ्नंबलवर्णकृत् अपस्मारज्वरोन्मादकृत्यालक्ष्मीविनाशनं आयुःपुष्टिकरंचैववशीकरणमुत्तमं ४विशेषात्क्षयरोगघ्नंरक्तपि
त्तहरंपरं ५अथलाक्षादितैलं तैलंप्रस्थमितंचतुर्गुणजतुक्वाथंचतुर्मस्तुरुग्यष्टीदारुनिशाब्दमूर्वकटुकामिश्याश्वकौंतीहिमैः रास्नाद्यैः
पिचुसंमितैः कृतमिदंशस्तंतुजीर्णज्वरेसर्वस्मिन्विषमेपियक्ष्मणिशिशोर्वृद्धेसगर्भासुच १अथचंदनबलादितैलं चंदनंचबलामूलं
लाक्षालामज्जकंतथा पृथक्पृथक्प्रस्थमितंजलद्रोणेविपाचयेत् १चतुर्भागावशेषेस्मिन्तैलप्रस्थंद्वयंक्षिपेत् चंदनोशीरमधुकशे
ताह्वाकटुरोहिणी देवदारुनिशाकुष्ठंमंजिष्ठागरुवालकं अश्वगंधाबलादार्वीमूर्वामुस्तासमूलकं ३एलात्वङ्नागकुसुमरास्नालाक्षा
सुगंधिका चंपकंपीतसारंचसारिवाचोरकद्वयं ४कल्कैरेतैःसमायुक्तंक्षीरादकसमन्वितं तैलमभ्यंजनेश्रेष्ठंसप्तधातुविवर्धनं ५
कासश्वासक्षयहरंसर्वछर्दिनिवारणं असृग्दरंरक्तपित्तंहंतिपित्तकफामयं ६कांतिकृद्दाहशमनंकंडूविस्फोटनाशनं शिरोरोगंने
त्रदाहंमंगदाहंचनाशयेत् वातामयहतानांचक्षीणानांक्षीणरेतसां बालमध्यमवृद्धानांशस्यतेशोफकामलां ८ पांडुरोगेविशेषेण
सर्वज्वरविनाशनं ९ अथाश्वगंधादितैलं अश्वगंधाबलालाक्षाप्रस्थंप्रस्थंपृथक्पृथक् जलद्रोणेविपक्वंचचतुर्भागावशेषितं १तै
लंचमाणिकंदद्यात्दधिमस्तुचतुर्गुणं अश्वगंधानिशादारुकौंतीकुष्ठाब्दचंदनैः २निशातिक्ताशताह्वाबलाक्षामूर्वासमूलकैः सु ८८

रदारुचमंजिष्ठामधुकोशीरसारिवा समभागानिसर्वाणिकल्कीकृत्वाविपाचयेत् सर्वज्वरंहरत्याशुशोफघ्नंलघुबृंहणं कासश्वासहरंचैव
सर्वधातुविवर्धनं एतदभ्यंजनेनाशुक्षयरोगोविमुंचति ५अथलक्ष्मीविलासतैलं एलाश्रीखंडरास्नाजलनखशशिनकोलकंवाथमुस्ता
वालत्वग्दारुकृष्णागरतगरजटाकुष्ठमेतत्समांशं त्रैळण्यंकालशालंसदृढडमरुकायंत्रतःसिद्धमेतत् तैलंपुष्पैश्चभाव्यंपरमलमिलितं
नामतोगंधतैलं १एतल्लक्ष्मीविलासंजनयतिजगतीनायकैःसंप्रयुक्तं युक्त्यानानाचरोगात्निखिलगदहरंवानसंघातहरं प्रीतंना
मूलवल्लीदलामिलितमलंजाठरंवह्निमिश्रंकुर्यादुर्नामरंद्रक्षयमपिनितरामंगसंमर्दनेन २अथद्राक्षासवः मृद्वीकायास्तुलार्धंतु
द्रोणेवांविपाचयेत् पादशेषेकषायेचपूतेशीतेप्रदापयेत् १गुडस्यद्वितुलांमानिधातक्याघनभाजने विडंगंफलिनीकृष्णात्वगे
लापत्रकेसरं मरिचंचभिषक्चूर्णंसम्यग्दत्वाविचक्षणः क्षिपेच्चपलिकेभागैरेणपयेच्चैवतद्दिने ततोयथाबलंपीत्वाकासश्वासगला
टंचरेत् दृढमृन्मयपात्रस्थेगंधंदत्वाध तरे ४ तन्मध्येपोटलीन्यस्यनिर्वातमवनांतरे वितस्तिप्रमितांगर्तांतस्यांसंस्थाप्यमुद्धरेत् ५
अंगुलीमात्तिकाभिश्चज्वालयेदिंधनानिच यामेनसिध्यतांयातिहेमगर्भाख्यपोटली ६ अनुपानानुसारेणसर्वरोगेषुयोजयेत् ७
इतिहेमगर्भरसः अथपथ्यापथ्यविधिः स्वेदोविरेचनंछर्दिर्धूमपानसमोषिनाः शालिषष्टिकगोधूमश्यामाकयवकोद्रवा १ आम्रगु
मामाषमुद्गकुलत्थानांरसाः पृथक् ग्राम्यौदकान्पधन्वमांसानिविविधानिच २ सुराउरातनंसर्पिश्छागंचापिपयोघृतं वास्तुकंवायसीशा
कंवार्ताकंबालमूलकं ३ कंटकारिकासमर्दोचजीवंतीसुनिषण्णकं द्राक्षाबिंबीमातुलिंगंपौष्करंवासकंतटी ४ गोमूत्रंलसुणंपथ्याव्योषमु
ष्णोदकंमधु लाजादिवसनिद्राचलघून्यन्नानियानिच ५ पथ्यमेतद्यथादोषमुक्तंकासगदातुरे वमिनस्यमसृग्मोक्षंव्यायामंदंतघर्षणं
आतपंदुष्टपवनंरजोमार्गनिषेवनं विष्टंभीनिविदाहीनिरूक्षाणिविविधानिच गुरुशीतंचान्नपानंकासरोगीपरित्यजेत् ८ मैथुनंस्निग्ध
मधुरंदिवास्वापंपयोदधि पिष्टान्नपायसादीनिकासीधूमंचवर्जयेत् इतिपथ्यापथ्यं इतिकासचिकित्सासमाप्ता अथहिक्कानिदानं
विदाहिगुरुविष्टंभिरूक्षाभिष्यंदिभोजनैः शीतपानाशनस्नानरजोधूमातपानिलैः १ व्यायामकर्मभासभ्रवेगाघातापतर्पणैः हिक्का
श्वासश्चकासश्चनृणांसमुपजायते २ अन्यदपिकारणानि आमरोगाभिघाताच्चक्षयरोगप्रपीडितैः विषमाशनभोज्यैश्चतथासंग्रहण्यै
रपि ३ संप्राप्तिमाह मुहुर्मुहुर्वायुरुदेतिसस्वनोयकृत्प्लीहांत्राणिमुखादिवोत्क्षिपन् सघोषवानाशुहिनस्त्यसून्यतस्ततस्तुहिक्केत्य
भिधीयतेबुधैः ४ तासांनामानि अन्नजांयमलांक्षुद्रांगंभीरांमहतींतथा वायुःकफेनानुगतःपंचहिक्काःकरोतिहि ५ तासांस्वरूप
माह कंठोरसोर्गुरुत्वंचवदनस्यकषायता हिक्कानांपूर्वरूपाणिकुक्षेराटोपएवच ६ अन्नजांलक्षणमाह पानान्नैरतिसंभुक्तैःसहसा

197
1936

पीडितोनिलः हिक्कायत्स्वर्धगोभ्नत्वार्तांविद्यादन्नजांभिषक् ७ यमलमाह चिरेणयमलैर्वेगैर्याहिक्कासंप्रवर्त्तते कंपयंतिशिरोग्रीवायमलं
तांविनिर्दिशेत् ८ क्षुद्रामाह प्रकृष्टकालैर्यावेगैर्मंदैःसमभिवर्त्तते क्षुद्रिकानामसाहिक्काजत्रुमूलात्प्रधावति ९ गंभीरामाह नाभिप्रवृ
त्तायाहिक्काघोरागंभीरनादिनी अनेकोपद्रववतीगंभीरानामसास्मृता १० महतिमाह मर्माण्युत्पीडयंतीवसंततंयाप्रवर्त्तते महाहिक्के
तिसाज्ञेयासर्वगात्रप्रकंपिनी ११ असाध्यत्वलक्षणमाह तासांगंभीरमहतीवर्ज्या आयम्यतेहिक्कतोयस्यदेहोदृष्टिश्चोर्ध्वंताम्यतेयस्यनि
त्यं क्षीणान्नाहिद्विषोतियश्चातिमात्रंद्वेचांत्येवर्जयेद्धिक्कमानौ १२ अतिसंचितदोषस्यभक्तच्छेदकृशस्यच व्याधिभिःक्षीणदेहस्य
वृद्धस्यातिव्यवायिनः १३ पुनः असाध्यत्वमाह आसांयासासमुत्पन्नाहिक्काहंत्याशुजीवितं यमिकाचप्रलापार्तिमोहतृष्णासमन्विता
१४ अक्षीणश्चाप्यदेहश्चस्थिरधात्विंद्रियस्यच तस्यसाध्यपितुंहिक्काञ्जन्यार्हंतितत्तोन्यथा १५ इतिआसाध्याइतिनिदानं अथात्तोचि
कित्सितंव्याख्यास्यामः वातेनहिक्काप्रभवंतिपंचतासामसाध्यत्वमुदाहरंति अक्षीणमांसस्यभवेत्तुसाध्याःप्रांतेवहिक्कापरिवर्जनीया १
नारीपयःपिष्टकचंदनंचकृतंसुखोष्णंनससैंधवंच पिष्टंतथासैंधवमंबुनावानिहंतिहिक्कांननुनावनेन १ इतिनारायणीयात् मधुकंमधु
संयुक्तंपिप्पलीशर्करान्वितं नागरंगुडसंयुक्तंहिक्काघ्नंनावनत्रयं १ अथयवागू दशाम्लीसटीरास्नापिप्पलीविश्वपौष्करैः शृंगीतामल
कीभार्ङीगुडूचीनागरादिभिः यवागूंमधुनासिद्धांकषायंवापिबेन्नरः कासहृद्ग्रहपार्श्वार्तिहिक्काश्वासप्रशांतये २ अथधूपः कासम
र्दकपत्राणांधूपःशोभांजनस्यच शुष्कमूलकधूपश्चहिक्काश्वासनिवारणः १ मूदधिघ्नोपसर्पिष्कोघ्नपौवार्ताकलोहितःइतिवृंदात्
हिंगुसौवर्चलाजाजीविडपौष्करचित्रकैः सटीकर्कटशृंगीन्वयवागूःश्वासहिक्किनां १ इतिहिंग्वादिर्यवागूः अथक्वाथः दशाम्ली
जलयुतांहिक्केषुपरियोजयेत् श्वासकासहरःसर्वविधिरत्रापियुज्यते १ इतिरसरत्नप्रदीपात् पाटल्यापलतोयेनक्षौद्रेणचस
मन्वितं हेमभस्मनिहंत्येवहिक्कापंचातिदुस्तरां १ दशाम्लीकषायेणमधुनाचसमन्वितं कांतावाभस्महिक्कानांपंचानांपंचतांनयेत्
२ कुलित्थयवकोलांबुदशाम्लबलाजलं पानार्थंकल्पयेत्कासहिक्काश्वासप्रशांतये ३ वृंदात् धात्रीचमागधीशुंठीक्वाथःश्वे
तांसितायुतः हिनस्तिहृदयोद्भूतांहिक्कांप्राणापनोदिनी १ इतिवैद्य० अथचूर्णं शिखिपिच्छभस्मकृष्णाचूर्णंमधुमिश्रितंमुहु ९८

199
1936

र्लिहं हिक्वहरतिप्रबलाश्वासंचैवातिदुस्तरं १ इतिचिकित्सादीपात् कृष्णामलकशुंठीनांचूर्णंमधुसितायुतं मुहुर्मुहुःप्रयोक्तव्यंहिक्काश्वासनि
वारणं १ हिक्काश्वासीपिबेद्भार्गींसविश्वांविश्ववारिणा नागरंभासिताभार्गींसौवर्चलसमन्वितं १ इतिवृंदात् शृंगीकटुत्रिकफलत्रयकंटकारीभा
र्गीसपुष्करजटालवणानिपंच चूर्णंपिबेदशिशिरेणजलेनहिक्काश्वासोर्ध्ववातकसनारुचिपीनसेषु १ इतिशृंग्यादिचूर्णंयोगरत्नाकरात् विश्वा
भिश्चकणाचूर्णंसशर्करंसमधुःस्मृतः गुडूचीनागरंनस्यंहिक्काधिकारकारणं इतिवैद्यजीवनात् अथसामान्यप्रकारः हिक्कार्तस्यपयःक्वा
थहितंनागरसाधितं रसान्यचेत्कलाक्वोश्वलाजचूर्णंससैंधवं इतिनारायणीयात् यष्ट्याह्ववामाक्षिकेणाक्लीढकृष्णाचूर्णंशर्करान्वितं
वा सर्पिःकोष्णंक्षीरमुष्णंरसोवाहन्यादिक्षोःप्राणतःपंचहिक्कां १ इतिभुक्तात् मधुसौवर्चलोपेतंमातुलिंगरसंपिबेत् हिक्कार्तोमधुनाद्रि
क्षाशुंठीधात्रीकणान्वितं योगतरंगिण्यां कपित्थस्वरसंवापिरसमामलकस्यच पिप्पलीक्षौद्रसंयुक्तोगुडगोभ्नशाकृद्रसान् हिध्माभिघ्नं
दिक्कासघ्नान्लिह्यान्मधुघृतान्वितान् १ खर्जूरपिप्पलीद्राक्षाशर्कराचेतितत्समं मधुसर्पिर्युतोलेहोहिक्काश्वासनिवारणः चिकित्सासा
रात् कटुकागैरिकाभ्यांचमुक्ताभस्मंतथैवच बीजपूररसस्यैतीमंनवाग्नंतदत्समाक्षिकं १ हेममुक्तार्ककांतानांभस्मवल्लमितंवरं बीजपूरर
सक्षौद्रसौवर्चलसमन्वितं २ हंतिहिक्काशतंसत्यमेकमात्राप्रयोगतः काकथापंचहिक्कानांहरणेसत्तरुच्यते इतिबोधसर्वस्वात्
अथशंखचक्रोरसः रसरत्नप्रदीपात् रसाभ्रहेमभस्मानिवैक्रांतंसर्वतुल्यकं सर्वैःपंचगुणंशंखंचूर्णंस्थूलंविमर्दयेत् लेहयेन्मधु
नाभाषचतुष्कंसानुपानकं हिक्कांस्त्वविधांहंतिमुर्धारासितत्क्षणात् २ इतिरसः कासप्रकरणोक्तंचभिषगत्रनियोजयेत् क्षयो
क्तंवात्रकासेचाहिक्काश्वासेनियोजयेत् १ इतियोगरत्नात् अथवंगसेनात् यथाग्निरिंधःपवनानिविद्धोवज्रंयथावासुररा
जमुक्तं रोगास्तथैवखलुदुर्निवाराःश्वासश्चहिक्काचविलंबिकाच १ गाथावरोधतर्जनविस्मापनविभाषितैश्चभीरैःकथाप्रयोगैः
सममेधिकांमनोघातैः २ प्रवालात्रिफलाशंखचूर्णंमधुघृतप्लुतं पिप्पलीगैरिकंचातिलेहोहिक्कानिवारणं १ कोलमज्जांजनलाजा
जातिकाकांचनगैरिकं कृष्णाधात्रीसिताशुंठीकासीसंदधिनामच पाटलायाःफलंपुष्पंकृष्णाखर्जूरमुस्तकं षडेतेपादकाःश्लो
काहिक्काघ्नामधुसंयुता नैपाल्यागविषाणाद्भाकुशाल्मलीजंरसस्तथा धूमंकुशस्यवासाज्यपिबेद्धिक्कोपशांतये १ निर्धूमांगार

निक्षिप्यश्लक्ष्णमाषरजोद्भवः हिक्कापंचापिहंत्याशुधूमःपित्तोनसंशयः अथसुप्रतिटीकाद्यंचूर्णं सुप्रतिकीटोलसुनोग्रगंधाहिंगवक्षमाचूर्णं
शुभाविताग्रा अजाविमूत्रेणचसमकृत्वाघ्राहत्विचूर्णविनिहंतिहिक्कां १ हरेणवोथापिप्पल्याःकाथोहिंगुसमायुतः हिक्कांप्रशमनोश्रेष्टोध
न्वंतरिवचोयथा १ कुकुलानलसंस्विन्नामिक्षुवाल्याभिसंभवः रसःसमाक्षिकःपीतोहिक्कामाशुनियच्छति १ इतिनारीक्षीराद्यंघृतं यष्टि
विलक्षवातघ्नमुख्यंवातानुलोमनं भिषजापानमन्नंवाहिक्काश्वासेप्रुतत्मनं १ हिक्काश्वासातुरेपूर्वंतैलाक्तंस्वेदमिष्यते ऊर्ध्वाध्रःशोधनेशा
केदुर्बलोशमनंमतं १ अभयानागराकल्कंपौष्करार्यावंश्लकर्ममरिचं कल्कंवानोयेनोष्णेनपिच्छासाहिक्कीचलब्धयै १ कपित्थोदशाम्लस्यक्वा
थंवादेवदारुणः मदिरांवापिबेधुक्तांहिक्काश्वासनिपीडितः १ दशाम्लेनसेत्सार्पिर्दधीमंडेनसाधयेत् कृष्णासौवर्चलाक्षारयवरुणाहिं
गुचोरकाः कासस्थयाचलस्तानांधिक्काश्वासोनियच्छति इतिदशाम्लघृतं वासाघृतंवाथापिबेत्तपिबेन्नपणमेवच वातापित्तानुबंधे
तुगुडांविश्वसमान्वितं छागक्षीरंप्रयोक्तव्यंस्तनतोयेचतुर्गुणे श्वासघ्नंभेषजंनेचतत्रकार्यंप्रपल्लतः १ इतिवंगसेनात् अथपथ्यापथ्य
विधिः स्वेदनंवमनंनस्यंधूमपानंविरेचनं निद्रास्निग्धानचान्नानिमृहृदनिलवणानिच १ जीर्णाकुलत्थागोधूमाःशालयःषाष्टिकायवाः
एणंनितिरलावाद्यांजांगलाम्तपक्षिणः २ पक्वंकपित्थलशुणंपटोलंबालमूलकं पौष्करंकुलुतुलसीमादिरानलदंबुद ४ शीतांबुसेकंस
हसात्रसोविस्मापनंभयं क्रोधोहर्षोप्रियोवेगः प्राणायामनिषेवनं दग्धासिक्तमृत्ताघ्राणंकुर्याधाराजलार्पणं नाभ्यधःपीडनंदाहेदी
पदग्धोहरिद्रया ६ पादयोर्ध्वंगुल्फाभेनोरुधैवेष्टांनिहिक्किनं वातमूत्रोद्गारकाससहृदयंगविधारणं रजोतिलान्नपायासान्नविरुधा
न्यन्नानानीच ७ विष्टंभीनिविदाहीनिरुक्षाणिकफदानिच निष्पावमाषपिण्याककवारिजान्नपमामिषं ८ अतिदुग्धंदंतकाष्टंवस्ति
मत्स्यान्श्वसर्षपान् आम्लतुंबीफलंकंदंतैलंभ्रष्टमुपोदकां गुरुशीतंचान्नपानंहिक्कारोगीविवर्जयेत् ११ इतिपथ्यापथ्यविधिः इति
हिक्काचिकित्सासमाप्तः अथश्वासनिदानं यैरेवकारणैर्हिक्काबहुभिःसंप्रवर्त्तते तैरेवकारणैःश्वासोघोरोभवतिदेहिनां १ महो
र्ध्वछिन्नतमकक्षुद्रभेदैश्चपंचधा भिद्यतेसमहाव्याधिःश्वासएकोविशेषतः २ तस्यपूर्वरूपमाह प्राग्रूपंतस्यहृत्पीडाश्लमा
ध्मानमेवच आनाहोवक्त्रवैरस्यंशंखनिस्तोदएवच ३ महाश्वासलक्षणमाह यदास्त्रोतांसिसंरुध्यमारुतःकफपूर्वको विश्व ९९

201
1936

ग्जतिसंमरुधस्तदाश्वासान्करोतिच ४ उद्धूयमानवातोयःशब्दवदुःखितोनरः उच्चैःश्वसितिसंरुद्धोमत्तमर्षद्भवानिशं ५ प्रभष्टज्ञान
स्तथाविभ्रांतलोचनः विस्तारिताननोबद्धमूत्रवर्चाविशीर्णवाक् ६ दीर्घःश्वप्रोसितिचास्य दूराद्विज्ञायतेभृशं महाश्वासोपसृष्टस्तुक्षि
प्रमेवविपद्यते ७ ऊर्ध्वश्वासमाह ऊर्ध्वंश्वसितियोदीर्घंनचप्रत्याहरत्यधः श्लेष्मावृत्तमुखस्त्रोताःक्रुधगंधवहार्दितः ८ ऊर्ध्वदृष्टिर्वि
लंस्तनोविक्लवंप्रपश्यन्श्वसिति ऊर्ध्वदृष्टिर्विपश्यंश्वविभ्रांताक्षइतस्ततः प्रमुह्यन्वेदनार्त्तश्चशुष्कास्योरतिपीडितः ९ ऊर्ध्वश्वसितिन
चाधःप्रत्याहरतीतियदुक्तंतत्रहेतुमाह ऊर्ध्वश्वासेप्रकुपितोह्यधःश्वासोनिरुध्यते मुह्यतस्ताम्यतश्चोर्ध्वंश्वासस्तस्यैवहंत्यसून्
१० विछिन्नामिमी यस्तुश्वसितिविछिन्नंसर्वप्राणेनपीडितः नवाश्वसितिदुःखार्त्तोमर्मछेदरुगार्दितः दह्यमानेनवस्तीनोपलक्षितः
आनाहःस्वेदमूर्छार्त्तोदह्यमानेनवास्तिना विप्लुताक्षःपरिक्षीणःश्वसन्रक्तैकलोचनः १२ व्याधिप्रभावादसाध्यत्वमाह विचेताःपरि
शुष्कास्योविवर्णःप्रलपन्नरः छिन्नःश्वासेनविछिन्नःसशीघ्रंविजहात्यसून् १३ तमकलक्षणमाह प्रतिलोमंयदावायुःस्त्रोतांसि
प्रतिप्रपद्यते ग्रीवांशिरश्चसंगृह्यश्लेष्माणंसमुदीर्यच १४ तेनकफेनरुद्धोवायुःस्तानिकुर्वंति करोतिपीनसंतेनरुद्धोघुर्घुरकंतथा अ
तीवतीव्रवेगंचश्वासंप्राणप्रपीडकं १५ तेनश्वासवेगेनप्रताम्यति प्रताम्यतिसवेगेनत्रस्यतेसंनिरुध्यते प्रमोहंकासमानश्चगच्छति
मुहुर्मुहुः १६ तस्यमुच्यमानेनश्लेष्मणामुच्यमानेनभृशंभवतिदुःखितः विमोक्षांतेकिंचित्सुकं तस्यैवचाविमोक्षांतेमुहूर्तंलभते
सुखं १७ तथास्योद्ध्वंसतेकंठःकृच्छ्राच्छक्नोतिभाषितुं नचापिनिद्रांलभतेशयानःश्वासपीडितः १८ पार्श्वेतस्यावगृह्णातिशा
यानस्यसमीरणःआसीनोलभतेसौख्यमुष्णंचैवाभिनंदति १९ उच्छ्रिताक्षोललाटेनस्विद्यताभृशमार्तिमान् विशुष्कास्योमुहुःश्वा
सोमुहुश्चैवावधाम्यते १९ मेघांबुशीतप्राग्वातैःश्लेष्मलैश्चविवर्धते सय्याप्यस्तमकःश्वासःसाध्योवास्यान्नवोत्थितः २०
तमकस्यैवपित्तानुबंधाज्वरादियोगेनप्रतमकसंज्ञामाह ज्वरमूर्छापरीतस्यविद्यात्प्रतमकंरुजं उदावर्तरजोजीर्णाक्लिन्नकाया
वरोधजः २१ तमसाअंधकारेणमानसतमोगुणादिदोषेणेति तमसावर्धतेत्यर्थंशीतैश्चाशुप्रशाम्यति मज्जतस्तमसीवास्यवि
द्यात्संतमकंरुजं २२ क्षुद्रमाह रूक्षायासोद्भवःकोष्टेक्षुद्रोवातउदीरयन् क्षुद्रश्वासेनसोत्यर्थंदुःखेनांगप्रबाधकः २२ हिनस्ति

नसगात्राणिनचयुक्तोवयथोनरः नवभोजनपानानांनिरुणध्युविनांगतिं २४ नेंद्रियाणांयथानापिकांचिदापादयेदुजं ससाध्यउक्तोबलिनः
सर्वेचाप्यक्तलक्षणा २५ साध्याःसाध्यानाह वाताधिकंभवेत्क्षुद्रस्तमसस्तुकफोनरः कफाद्वानाधिकापित्तेसंसरस्थाद्भिन्नसंज्ञितः १५
क्षुद्रसाध्यतमस्तेषांतमकःकृछ्रउच्यते त्रयःश्वासानसिध्यंतितमकोदुर्बलस्यच २६ शीघ्रकारित्वादवश्यंमारणात्मकत्वमाह कामंप्रा
णहरारोगाबहवोनतुतेतथा यथाश्वासश्चहिक्काचहरतःप्राणमाशुच २७ इतिश्वासनिदानं अथश्वासचिकित्सितंव्याख्यास्यामः स्रे
हवस्तिस्नेहकेचिदूर्ध्वंचाधश्चशोधनं मृदुप्रणयतांश्रेष्ठंश्वासिनामादिशंतिहि १ सर्वेषुश्वासरोगेषुवातश्लेष्मनिबर्हणं विदधीतवि
धिंविद्वानादौस्वेदौंमृदुंतथा २ अथक्वाथः कुलित्थनागरंव्याघ्रीवासाभिःक्वथितंजलं पीतंपौष्करसंयुक्तंश्वासकासनिवारणं १ इतिकु
लित्थादिः दशमूलीकृतःक्वाथः पौष्करेणावचूर्णितं श्वासकासप्रशमनंपार्श्वशूलविनाशनः १ इतिदशमूलादि देवदारुवचाव्या
घ्रीविश्वकट्फलपौष्करैः कृतःक्वाथोजयत्याशुश्वासकासावशोषितः १ इतिदेवदार्वादि सिंहीनिशासिंहमुखीगुडूचीविश्वौषधकल्याभृग
जापनानां कृष्णमरीचैर्मलिनःकषायःश्वासाटवीदाहपयोदएषः १ इतिवैद्यविलासात् वासाहरिद्रामगधागुडूचीभार्गीघनानागरशिंगि
णीनां क्वाथेनमरीचचूर्णान्वितेनश्वासःशमंयातिनकस्यपुंसः आपिप्राणप्रियेजातीफललोहितलोचने भार्गीनागरयोःक्वाथःश्वासत्रासा
यपापयेत् १ इतिवैद्यजीवनात् द्राक्षामृतानागरमुस्तकौमंकृष्णाविशाकंवङ्गरोगानिघ्नं श्वासंचशूलंकसनंचमांद्यंजीर्णज्वरंचैवजलेचतु
ष्का १ इतिशार्कराख्यात् अथचूर्णं कूष्मांडकशिफाचूर्णंपीतंकोष्णेनवारिणा शीघ्रंशमयतिश्वासंकासंचैवसुदारुणं १ इतियोगत्न्नः
शृंगीकटुत्रयफलत्रयकंटकारीभार्गीसपुष्करजटालवणानिपंच चूर्णंपिबेदशिशिरेणजलेनहिक्काश्वासोर्ध्ववातकसनारुचिपीनसेषु १
इतिशृंग्यादियोगशतात् शटीभार्ङीबलाव्योषंपारुचककटूले: तेजोह्वापौष्करंशृंगीसक्षौद्रंश्वासकासनुत् १ मुष्टीषणानिशारा
स्नाद्राक्षामागधिकास्मृता इतिवृंदात् शुंठीकणामरिचनागदलत्वगेलाचूर्णंकृतंक्रमविवर्धितमूर्ध्वमंत्यात् खादेदिदंसमसितंगुद
जाग्निमांद्यगुल्मारुचिश्वसनकंठहृदामयेषु १ इतियोगशतात् मर्कटीनांतुबीजानांतुबीजानांचूर्णंमाक्षिकसर्पिषा प्रलिह्यान्मा
रुतात्श्वासार्तःस्वास्थ्यमाप्नुयात् १ इतिचिकित्सासारात् अथावलेहः हरिद्रामरिचंद्राक्षागुडरास्नाकणासटी तैलमिश्रंलिहे १००

203
1936

हन्यात्श्वासान्प्राणहरानपि इतिहरिद्रादि भार्गीनागरयोश्चूर्णंलीढमार्द्रकवारिणा श्वासंनिहंतिदुर्धर्षंपंचाननइवाद्विपं १ इतिभार्ग्यादि
व्याघ्रीशतंस्यादभयाशतंचद्रोणेजलस्यत्रपचेत्कषायं तुलाप्रमाणेनगुडेनयुक्तंपक्त्वाभयाभिःसहनाभिरत्र १ शीतेक्षिपेत्पन्मधुनःपलानि
षटानिचत्रीणिकटुत्रयस्य त्वक्पत्रकेलाकरिकेसराणांचूर्णंपलंचेतिविदेहदक्षः २ क्षुद्रावलेहःकफजान्विकारान्श्वासंक्षयानापिपंच
कासान् हिक्कामुरोरोगमयस्मृतिंचहत्वाविशाधिंकुरुतेनलस्य ३ इतिक्षुद्रावलेहःयोगतरंगिण्यामित्यादिलेहः भार्गीजटापलशतंसहि
तार्मणस्यायुक्तंचमूलतुलयासहितंविपाच्य पादस्थितेतुशतमत्रहरीतकीनांपक्त्वाव्यमुज्ज्वलगुडस्यशतेनसार्कं १ उत्तार्यतत्रशिशिरेम
धुरःपलानिचत्वारिचाद्विगुणितानिफलत्रयंच व्योषंत्वटीत्वभार्गिकेसरपत्रकाणामेषांपलंखलुभिषग्यमथोपयोज्यं २ श्वासंचकासम
पिशोषमहिक्काथमेकाहिकंज्वरमथोकफपीनसंच हन्याद्रसायणमिदंहिपुरंदरस्यप्रोक्तंसहस्रकरमत्रभिषग्वराभ्यां ३ इतिवीरासिं
हावलोकाद्भार्गीहरीतक्यावलेहः बोपदेवशतात् द्राक्षांहरीतकींमुस्तांकर्कटाख्यांदुरालभां सर्पिर्मधुभ्यांवालिहन्श्वासान्हंतिसु
दारुणात् १ प्रलिह्यान्मधुसर्पिर्भ्यांभार्गीमधुकसंयुतात् पथ्यांतिक्ताकणाव्योषयुक्तावाश्वासनाशिनी १ गुडदाडिमरक्षीकापिप्प
लीविश्वभेषजैः मातुलिंगरसक्षौद्रंलीढंश्वासनिबर्हणं १ इतिवृंदात् अथरसः रसगंधविषंचैवटंकणंचमनःशिला एतानि
टंकमात्राणिमरीचंचाष्टटंककं १ एकैकंमरिचंदत्वारवल्वंसूक्ष्मंविमर्दयेत् त्रिकटुटंकमात्रंचदत्वापश्चाद्विचूर्णयेत् २ सर्वमेकत्रसं
योज्यकाचकूप्यांविनिक्षिपेत् श्वासेकासेचमंदाग्नौवातश्लेष्मामयेषुच ३ गुंजामात्रंप्रदातव्यंपर्णखंडेनधीमता संनिपातेच
मूर्छायामपस्मारेतथापुनः ४ अतिमोहत्वमापन्नेनस्यंदत्वाविचक्षणः रसश्वासकुठारोयंसर्वश्वासविकारहा ५ इतिश्वास
कुठारः इतियोगरत्नात् अथवंगसेनात् दशमूलीसटीरास्नापिप्पलीविश्वपौष्करं शृंगीतामलकीभार्गीगुडूचीनागराह्विनैः
यवागूंविधिनासिद्धांकषायांवापिबेन्नरः कासहृद्ग्रहपार्श्वार्तिहिक्काश्वासप्रशांतये १ कुलत्थयवकोलाम्लदशमूलांबुनाजलं
पानार्थंकल्पयेत्कासहिक्काश्वासनिवृत्तये १ रंभाकंदाशिरीषाणांकुसुमंपिप्पलीयुतं पिष्टातंदुलतोयेनपीत्वाश्वासमपोहति १
मार्गीमहौषधकणाघनपुष्कराणांचूर्णंसटीमरिचकर्कटकीसमेतं क्वाथेनपीतमम्रतात्रयपंचमूल्याश्वासंक्षयहेणानिहंतितंतं

यो०र०
१०१

घोररूपं १ व्याघ्रीदुरालभाभृंगी छिन्नमध्यात्रिकंटकैः साग्नानाग्निसैतैरेतैः यूषस्यात्श्वासनुत्परः १कुलत्थदशमूलानांक्वाथेसुनोगलारसः
कासमर्दकपत्राणांयूषःसौभांजनस्यच शुष्कमूलकयूषश्चहिक्काश्वासनिवारणः १ गुडंकटुकतैलेनामिश्रयित्वासमालिहेत् त्रिसप्ताहप्रयोगे
णश्वासांनिर्मूलतांनयेत् स्याविद्यःश्वत्र्योदग्धामक्षौद्रघृतशर्करा श्वासकासहरौबार्हिपादौचमधुसर्पिषा १ हरिद्रांमरिचंद्राक्षांगुड
रास्नांकणांसटीं तैलेनाविलिहन्वहन्यात्काशान्प्राणहरानपि १ भल्लातकमधुपर्णीपथ्यादशमूलनागरक्वाथः नमकेकफप्रधानेशरा
लः श्वासेचमारुते १ पथ्याकषायमथवापिवेद्रसमार्कवमधुना नमकेपुष्परजंवानागरंक्षारमेवच अथसत्पाद्यंचूर्णं सटीपुष्करजीवंती
त्वग्मुस्तंपुष्कराह्वयं सुरसांतामलकीलापिप्पल्यागुरुनागरं वालकंचसमंचूर्णंकृत्वाष्टगुणशर्करं सर्वधातमकेश्वासेहिक्कायांचप्रयोजयेत्
अत्रैकस्माद्दृष्टेव्याघुणाशर्कराशाद्यासर्वथेतिपानभोजनादिषु १ अथहिंस्राद्यंघृतं हिंस्राविडंगपूतिकत्रिफलाव्योषचित्रकैः द्विक्ष
रंसर्पिषः प्रस्थंचतुर्गुणजलेश्रुतं कर्षमात्रंपिबेत्श्वासकासव्यपोहति अर्शांसिरोचकंगुल्मसकृद्भेदंक्षयंतथा इतिकासौवर्चलक्षारप
थ्यात्रिकटुहिंगुभिः समानैरघृतंसिद्धंसक्षीरैश्वासकासनुत् गुल्मानाहंचशमनंभट्टश्वानगुदजानपि १ इतिक्काद्यंघृतं सौवर्चलय
वक्षारकटुकाव्योषचित्रकैः घृतंवचाविडंगैश्चसाधितंश्वासशांतये कुलत्थरससंयुक्तंपंचमूलस्मृतंघृतं दीपनंश्वासकासघ्नंकफव्या
धिहरंपरं १ इतिकुलत्थाद्यंघृतं सुवहाकालिकाभार्गीशुकाक्षानैकुचंफलं काकादनीश्रृंगवेरंवषभिःहतीद्वयं कोलमात्रेघृतप्रस्थंपात
येनजलाढकं कटुकंपीतमेतच्छिश्वासामयविनाशनं १ इतिसुवहाद्यंघृतं अथभृंगराजतैलं तैलंदशगुणेसिद्धंभृंगराजरसेशुभे
पीयमानंयथान्यायंश्वासकासौव्यपोहति १ द्वितीयकुलत्थादीघृतं कुलत्थदशमूलंचपथ्याब्राह्मणयष्टिका प्रस्थंप्रस्थंचसंगृह्यवा
रिद्रोणेचनापयेत् पादशेषेरसेतस्मिन्घृतप्रस्थंविपाचयेत् जीरकंद्विगुणंदत्वाकाल्किनैः पंचकोलकैः सक्षारैःपलिकैःसर्वैःश
नैर्मृद्वग्निनापचेत् श्वासकासहरंचैवहिक्कांसाविषमज्वरं हन्यार्शग्रहणीरोगंहृद्रोगारुचिपीनसान् गुल्मप्लीहामयंहन्यात्बलवर्णाग्नि
वर्धनं अग्निसंदीपनंचैवकोलस्थेषट्पलघृतं अथभार्गीगुडः शतंगृह्यभार्ग्यास्तुदशमूल्यास्तथापरं शतंहरीतकीनांचपचेत्तोये
चतुर्गुणे पादावशेषेतास्मिन्रसेवस्त्रेणनिपीडयेत् आलोड्यतुलांपूतांगुडस्यतुभयामतः पुनःपचेत्तुमृदग्नौयावल्लेहत्वमागतं १

205
1936

शीतेचमधुनश्चात्रषट्पलानिप्रदापयेत् त्रिकटुत्रिसुगंधंचपलिकानिपृथक्पृथक् कर्षद्वयंयवक्षारंसंचूर्ण्यप्रक्षिपेत्ततः भक्षयेदभ
यामेकांलेहस्यार्धपलंलिहेत् श्वासंसुदारुणंहंतिकासंहंतिविधंतथा स्वरवर्णप्रदाह्येषाजठराग्नेश्चदीपने हरीतकीशतंकस्यजलप्रस्थ
मिहाधिका १ अथकुलत्थगुडः कुलत्थदशमूलंचतथैवद्विजयष्टिका शतंशतंचसंगृह्यजलद्रोणेविपाचयेत् पादशेषेतुतस्मिंस्तुगुडस्या
र्धंतुलांक्षिपेत् शीतेभृतेचपक्केचमधुनोष्टौपलानिच षट्पलानितुगाक्षीर्याःपिप्पल्याश्चपलद्वयं त्रिसुगंधसुगंधंचखादेदग्निबलंप्रति
श्वासंकासंज्वरंहिक्कांनाशयेत्तमकंयथा योगसंदर्शनादत्रस्थवैद्योपदेशतः जलंचतुर्गुणंदेयंसत्वसत्वाद्रोगवारिणः मानमात्रोधिसं
वादात्रिफलांत्रिसुगंधिभिः इतिवंगसेनात् अथपथ्यापथ्यविधिः विरेचनंस्वेदनधूमपानवछर्दनानिस्वपनंदिवाच पुरातनाषष्टिकर
कशालीकुलत्थगोधूमयवाःप्रशस्ताः १ शशाहिभुक्तितिरलवदक्षभुकादयोधन्वमृगाद्विजाश्च पुरातनंसर्पिरजोप्रतमंपयोघृतं
चापिसुरामधूनि निदग्धिवास्तुकतंडुलीयजीवंतिकाम्लमृणांदकंच पटोलवार्ताकरसोनपथ्याजंबीरबिंबीफलमातुलिंगं २ द्राक्षा
टरिःपौष्करसुष्णवारिकटुत्रयंगोजनितंचमूत्रं अन्नपानानिचभेषजानिश्लेष्मानिलघ्नानिचयानितानि ४ वक्षःप्रदेशादपिपार्श्व
युग्मेकरस्थयोर्मध्यमयोर्ध्वयोश्च प्रदीप्तो हेमेनचकंटकूपेदाहोपिश्वासिनेपथ्यवर्गः ५ अथअपथ्यवर्गः मूत्रोद्गारछर्दिवृ
कासरोधानस्यंवास्तिर्दंतकाष्ठंश्रमश्च अध्वाभारोरणवः सूर्ययादाविष्टंभिनिश्राम्यधर्मोविदाही ६ अन्नपानामिषंतैलभ्रष्टंनि
ष्पावाश्चश्लेष्मकारिणिभावः रक्तस्रावः पूर्ववातोनुपानंमेषीसार्पिर्दुग्धमंभोपिदुष्टं ७ मत्स्याः कंदाःसर्षपाश्चान्नपानंरूक्षंशी
तंगुर्व्यांश्वासवर्ज्ये ८ इतिपथ्यापथ्यविधिः इतिश्वासरोगचिकित्सासमाप्तः अथस्वरभेदनिदानं अत्युच्चभाषणविषा
ध्ययनाभिघातात्संदूषणैःप्रकुपिताःपवनादयस्तु श्रोतस्सुतेस्वरवहेषुगताःप्रादिष्टाहन्युःस्वरंभवतिचापिहिषाडिधःसः १
वातिकमाह वातेनकृष्णनयनाननवर्चोभिन्नस्वरंशादतिगर्भभवत्स्वरंच पैत्तिकमाह पित्तेनपीतनयनाननमूत्रवर्चाब्रूयाद्गलेन
सचदाहसमान्वितेन २ कफजमाह ब्रूयात्कफेनसततंकफरुद्धकंठःस्वल्पंशनैर्वदतिचापिदिवाविशेषात् सांनिपातमाह स
र्वात्मकेभवतिसर्वविकारसंयतेएनंअसाध्यमृषयः स्वरभेदमाहुः २ क्षयजमाह धूम्येतवाक्क्षयकृतेक्षयमाप्नुयाच्चवाक्येषु चा

पिहतवाक्यारिवर्जनीयः मेदोजमाह अंतर्गतस्वरमलक्ष्यपदंचिरेणभेदोन्वयाद्ददतिदिग्धगलस्तृषार्तः ४ असाध्यमाह क्षीणस्यवृद्ध
स्यकृशस्यचापिचिरोत्थितोयःसहजोपजातः मेदःस्विनःसर्वसमुद्भवश्चस्वरामयोयोनससिध्यमेति इतिनिदानं अथचिकित्सितंव्या
ख्यास्यामः स्निग्धात्स्वरांतरगतादावकृष्यधातन्अभेनछर्दनरेचनवस्तिभिश्च नस्यावपीडमुखधावनधूमलेहैः संपादयेत्तुविविधैः
कवलग्रहैश्च १यःश्वासकासविधिरादितएवचोक्तस्तंचाप्यशेषभवतारपितुंयतेत अथवातस्वरभेदः स्वरोपघातोनिलजेभुक्तो
परिघृतंपिबेत् मरीचचूर्णसहितंमरुत्स्वरहतिप्रणुत् १कासमर्दरसंदत्वाभार्गीकल्कंशनैःशनैः सिद्धंसर्पिर्हितंपीतंस्वरभेदमरु
द्भवं २इतिकासमर्दघृतं अथैकोष्णजलंपेयंजग्धाघृतगुडोदनं पीतंघृतंहंत्यनिलंसिध्यमार्कवजेरसे ३ अथपित्तस्वरभेदः
पैत्तिकेतुविरेकस्यात्पयश्चमधुरैःशृतं लिह्यान्मधुरवस्तूनांचूर्णंमधुसमन्वितं अश्नीयाच्चससर्पिष्कंयष्टीमधुकषायकं १
शर्करामधुमिश्राणिशृतानिमधुरैःसह पिबेत्पयांसियस्योच्चैर्वदतोपिहतःस्वरः २ शतावरीचूर्णयोगंबलाचूर्णमथापिवा ला
जाशतावरीचूर्णंलिह्यान्मधुसमायुतं १अथशुंठीघृतं शुंठीतत्रोदुग्धपुनांद्रुमाणांसंपिष्यदुग्धेविवक्वेतुतेन कल्केनयष्टीमधु
कस्यसर्पिस्सशर्करंपित्तरुजामयघ्नं १इतिपित्तस्वरः अथकफस्वरभेदः पिप्पलीपिप्पलीमूलंमरिचंविश्वभेषजं पिबेन्मूत्रेयाम
तिमान्कफजेस्वरसंक्षये १इतिपिप्पल्यादिचूर्णं अथसंनिपातस्वरभेदः अजामोदानिशाधात्रीक्षारवह्निविचूर्णयेत् मधुस
र्पियुतंलीढ्वात्रिदोषस्वरभंगनुत् १फलत्रिकत्र्यूषणयावशूकचूर्णानिहन्यात्स्वरभंगमाशु किंवाकुलित्थंवदनांतरस्थंस्वरामयस्थंह
त्यथपौष्करंवा १वातेसलवणंतैलंपित्तेसर्पिःसमाक्षिकं कफेसक्षारकटुकंक्षौद्रंकेवलइष्यते १गलेनालनिजिह्वापांदंतमूलेषुवाश्रितं
तेनानिष्क्रम्यतेश्लेष्मभोज्जरश्वासप्रसीदति १ अथक्षयभेदः स्वरभंगोक्षयजेस्वरभेदेतुतत्रोक्ताविधिनाचरेत् कटुतिक्तकषायाद्यैः
मेदःस्वरहातिंजयेत् १अथसामान्यविधिः चव्याम्लवेतसकटुत्रिकतिंतिडीकतालीसजीरकतुलादहनैःसमांशैः चूर्णंगुड
प्रमुदितंत्रिसुगंधियुक्तंवैस्वर्यपीनसेनेकफारुचिषुप्रशास्तं १इतिचव्यादिचूर्णं अथव्याघ्रीघृतं व्याघ्रीस्वरसाविपक्वंरास्नां
वाट्यालगोक्षुरव्योषैः सर्पिःस्वरोपघातंहन्यात्कासंचरपंचविधं इतिघृतं बदरीपत्रकल्कंवाघृतभ्रष्टंससैंधवं स्वरोपघाते २

काससेचलेहमेनंप्रयोजयेत् इतिकदंबात् विहितंघुस्रणंचूर्णान्यासनालेनसार्धंकल्तिरुफलवथासैंधवानिप्रदद्यात् अभिपेलेतिविज्ञे
यःस्वरस्यभ्रणाशांसहापिबतिसहदुग्धेनामलकाः फलंवा १इतिसारसंग्रहात् तैलोक्तस्वरभेदेवाखादिरंधारयेन्मुखे पथ्याप्पिप्पलि
युक्तंवासंयुक्तंनागरेणवा इतिवृंदात् अथरसः रसभस्मार्कलोहस्यभावितस्यत्रिसमधा क्षुद्राफलरसैर्मुद्गतुल्याकार्यावटीशुभा मुख
स्थहरतेसर्वंस्वरभंगमसंशयं गोरक्षनाथेगदिता स्वरामइक्रातालुभिः इतिगोरक्षवटी इतियोगरत्नात् अथवंगसेनात् अगरुसु
रदारुसलिलंस्वरभेदकासिवेकोष्णं व्याघ्रीसुरतरुनागरससिंहमुखक्काथमथवापि स्वरोपघातमेदोजंकफवद्विधिरिष्यते क्षय
जेसर्वजेचापिप्रत्याख्यायाचरेत्क्रियां १अथनिदग्धिकावलेहः निदग्धिकाफलशतंतदर्धंयथकस्यच चित्रकस्यतदर्धस्यदश
मूलंचतत्समं द्रोणद्वयेपानिःक्वाथ्यकषायमाढकमाहरेत् प्रस्थेकृतैलदर्धेतुपुराणस्यगुडस्यच सर्वमेकत्रकृत्वाचलेहवत्साधुसाधये
त् अष्टौपलानिपिप्पल्यास्त्रिजातकमजंतथा मरीचानांपलंचैकं सर्वमेकत्रचूर्णितं मधुनःकुडवंदत्वाभक्षयेत्तुयथाबलं स्वरभेदहरं
मुख्यंप्रतिश्यायहरंपरं कासश्वासाग्निमांद्यघ्नोगुल्ममेहगलामयात् अनाहंमूत्रकृच्छ्राणिहन्यात्अथ्यर्बुदानिच १वातादिजनितः
श्वासकासच्छायेचकीर्तिता यांगास्तांश्चापियुंजीतयथादोषंचिकित्सकः खर्जूरकंटकार्याद्येश्चोषपचेत्घृतं १इतिवंगसेनात्
अथपथ्यापथ्यविधिः स्वेदोवस्तिर्धूमपानंविरेकः कवलग्रहः नस्यंभालसिराभेदोनवालोहितशालयः हंसाठवीताम्रचूडकोकिमा
सरसाःसुरा गोकंठकः काचमाचीजिवंतीबालमूलकं द्राक्षापथ्यामातुलुंगंलसुनंलवणार्द्रकं तांबूलंमारिचंसर्पिः पथ्यानिस्वरभेदि
नां ३आम्रंकपित्थंबकुलंशालूकंजांबवानिच तिंदुकानिकषायाणिवमिस्वप्नजल्पनं ४अन्नपानंविरुद्धंचस्वरभेदीविवर्जयेत् ५
इतिपथ्यापथ्यविधिः इतिस्वरभेदचिकित्सासमाप्तः अथारोचकनिदानं अरोचकोभवेद्दोषैर्जिह्वाहृदयसंश्रितैः सन्निपाते
नमनसःसंतापेनचपंचमः १परिक्षिप्तंमुखेचान्नंजंतुनभ्यदतेमुहुः अरोचकः सविज्ञेयोभक्तद्वेषमतःशृणु २ शतादिभिः शोक
भयातिलोभक्रोधैर्मनोघ्नाशनगंधरूपैः अरोचकास्युःपरिहृष्टदंतःकषायवक्त्रश्चमतोनिलेन पित्तजमाह कट्वम्लमुष्णंविरसं
चपूतीपित्तेनविद्याल्लवणंचवक्त्रं कफजमाह माधुर्यपैच्छिल्यगुरुत्वशैत्यविबद्धसंबद्धयुतंकफेन शोकजमाह अरोचकः शो

207
1936

यो०र०
१०३

कफ्याति लोभक्रोधाद्यहृद्यान्नपानभक्षणाद्यैर्भवेत्स्यात् त्रिदोषजमाह स्वाभाविकं चास्यमथारुचिश्च त्रिदोषजेनैकरसंभवेत् ५ विकृतिमाह हृ
च्छूलपीनसयुतं पवनेन पित्तात्तृट्दाहशोषबहुलं सकफप्रसेकं श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात्रैगुण्यमोहजडताभिरथापरं च ६
इत्यरोचकनिदानं अथातोऽरोचकचिकित्सितं व्याख्यास्यामः वस्तिः समीरणे पित्ते विरेको वमनं कफे सर्वजे सर्वकामार्थहर्षणं स्वाद
रोचके १ अरुचौ कवलग्राह्यो धूमैः सुखधावनः मनोज्ञमन्नपानं वा हर्षणाश्वासनानि च १ सात्म्यान्स्वदेशाग्वितान्विविधांश्च भक्ष्यान्पा
नानि मूलफलखाडवरागलेहान् संवेद्य सांश्च विविधानि विधैः प्रयोगैः भुंजीत चापि लघु रुक्षमनः सुखानि १ अथ मुखधावनं अजा
जी मरिचं कुष्टं विडं सौवर्चलं तथा मधुकं शर्करा चैवं वाति के मुखधावनं १ करंजदंतकाष्ठं च विधेयमरुचौ सदा त्र्यूषणात्रिफलारजनी
द्वयं च चूर्णीकृतानि यवक्षारकविमिश्रितानि क्षौद्रान्वितानि वितरेन्मुखधावनार्थमन्यानि तिक्तकटुकानि च भेषजानि १ अथ गंडूषाः
किंचिल्लवणसंयुक्तं मारनालं विपाचयेत् तेन गंडूषमात्रेण आस्यवैरस्यशांतये १ अथ पानककवलग्रहौ आम्लिकां गुडतोयेन तु
गेलामरिचान्वितं अभक्तच्छंदरोगेषु शस्तं कवलधारणे १ इत्याम्लिकापानकं भागैकं निंबुजं नीयं षड्भागं शर्करोदकं लवंगमरिचोन्मि
श्रं पानकं पानकोत्तमं १ निंबूरसभवं पानमत्यम्लं वातनाशनं वह्निदीपिकरं रुच्यं समस्ताहारपाचकं २ इति निंबूपानकं कुष्टसौ
वर्चलाजाजीशर्करामरिचं विडं धान्यैलापद्मकोशीरपिप्पलीचंदनोत्पलं १ लोध्रं तेजोवती पथ्या त्र्यूषणं सयवाग्रजं आर्द्रदाडिम
निर्यासश्चाजाजीशर्करायुतं सतैलमाक्षिकास्वेते चत्वारः कवलग्रहाः चतुरो रोचकान्हंत्युर्वातादेकजसर्वजान् २ इति कुष्टाद्याश्च
त्वारः कवलग्रहः विडंगचूर्णकर्षैकं क्षौद्रकर्षचतुर्मितं असाध्यमपि संहन्यादरुचिं वक्त्रधावनात् १ अथ गुटिका कारव्यजाजिमरि
चंद्राक्षा वृक्षाम्लदाडिमं सौवर्चलं गुडः क्षौद्रमेषाकार्या वटी शुभा १ बदरास्थिमिता सास्ये धार्यारोचकनाशिनी २ इति कारव्यादिगुटी
सिताव्योषकपित्थानां चूर्णं क्षौद्रकृता वटी सर्वारोचकशांत्यर्थं धारयेद्दनांबुजे १ अथ चूर्णानि यवानितिंतिडीकं च नागरं चाम्ल
वेतसं दाडिमं बदरं साम्लं कार्षिकान्युपकल्पयेत् धान्यसौवर्चलाजाजीवरांगं चार्धकार्षिकाः पिप्पलीनां शतं चैकं द्वे शते मरिचस्य च
शर्करायाश्च चत्वारि पलान्येकत्र चूर्णयेत् यवानिखांडवाख्यातं चूर्णमेतद्दरोचकं ३ इत्येवमानरंतस्थास्थापितं मुखे मुदुः जिह्वा २

विशोधनं हृद्यं दीपनं भक्तरोचनं ४ हृल्लीडांपार्श्वशूलघ्नं च विबंधानाहनाशनं कासश्वासहरं ग्राही ग्रहण्यर्शोविकारनुत् इति यवानिखांड
वाद्यं चूर्णं अथ वोपदेवशतात् खांडवचूर्णं तुल्यं तालिसव्योषलवणगजदीकणाग्रंथ्य जाजीवृक्षाम्लाग्नित्वचां त्रिघनबदरघनैः ताज
मोदाम्लविश्वं सार्धं स्वेलांघ्रिसारे तिसृतिकमिव मो खांडवो रुच्यजीर्णे गुल्माध्मानलास्योद्भवणवगदमरुद्धहृद्दद्रे श्वासकासे १
अथ आमलक्याद्चूर्णं अमलां चित्रकः पथ्या पिप्पली सैंधवं तथा चूर्णितो वंगणो ज्ञेयः सर्वज्वरविनाशनः १ भेदी रुचिकरः श्लेष्मघ्ने
जो दीपनपाने च १ इति शारंगधरात् अथ कर्पूराद्यं चूर्णं कर्पूरत्वचकंकोलजातीफलीलिदलासना लवंगं नागमरिचं कृष्णा शुंठी विव
र्धितः १ चूर्णं सितासम्यां हृद्यं रोचनं क्षयकासजित् वैस्वर्यं श्वासगुल्मार्शः छर्दिकंठामयापहं २ प्रयुक्तमन्नपानेषु भिषग्ज्ञो रोगिणां
हितं २ इति शारंगधरात् अथ तालिसाद्यं चूर्णं तालिसं मरिचं शुंठी पिप्पली वंशरोचनं एकाद्वित्रिचतुःकर्षैः पंचभागान्प्रकल्पयेत्
एलात्वचोस्तु कर्षार्धं प्रत्येकं भागमावहेत् द्वात्रिंशत्कर्षतुलिता प्रदेया शर्करा बुधैः २ तालिसाद्यमिदं चूर्णं रोचनं पाचनं स्मृतं कास
श्वासज्वरहरं छर्द्यतीसारनाशनं ३ शोषाध्माननहरं प्लीहग्रहणी पांडुरोगजित् पक्त्वा वा शर्करां चूर्णं क्षिपेत्स्याद्गुटिका तथा ४ इति शा
रंगधरात् अथाऽवलेहः शारंगधरात् अर्द्रकमातुलिंगावलेहः आर्द्रकस्य रसं प्रस्थं तदर्धं शंगुडं क्षिपेत् कुडवं बीजपूराम्लं गाल
यित्वा विचक्षणः सर्वं मंदाग्निना पक्त्वा तेमानि विनिक्षिपेत् त्रिजातकं त्रिकटुकं त्रिफलायासमेव च २ चित्रकं ग्रंथिकं धान्यं जीरक
द्वयमेव च कर्षांशान्सूक्ष्मचूर्णं तु मेलइत्वाथ भक्षयेत् ३ अरोचकक्षयहरं अग्निदीप्तिकरं परं कामलापांडुशोफघ्नं श्वासकासहरं परं
४ अध्मानोदरगुल्मानि प्लीहशूलं च नाशयेत् ५ अथ योगसारात् खंडार्द्रकयोगः अर्द्रकस्य सिताया श्चाद्विगुणाष्टपलानि च
निष्कद्वादशकं तीक्ष्णं मष्टतीक्ष्णा च मागधी १ अष्टनिष्कं चतन्मूलं पंचानि ष्कं च नागरं जातीफलैलादहनवंशाद्याः पंचनिष्ककाः २
सर्वाण्येतानि शुष्कानि चूर्णं कृत्वा पृथक्पृथक् अर्द्रकं खंडशः कृत्वा गोघृते ष्टपले पचेत् २ शर्करा पूर्वचूर्णं च चार्द्रकं सह मेलयेत्
मंडलं सेवयेन्नित्यं महापैत्य विनाशनं ४ आम्लपैत्यं निहंत्याशु सर्वपित्तविकारजित् सर्वारुचिर्वातरोगे मंदाग्नि च नियच्छति ५
इति खंडार्द्रकयोगः अथ मस्तुन पालार्द्रकयोगः धौतखंडी च मार्द्रकं च सलिलैः क्षिप्तं सुतप्ते घृते सिंधूसं मरिचं सुजीरयु

209/1936

गलंचूर्णीकृतंप्रक्षिपेत् चूर्णंभृष्टनवोद्भवंचविजुषंहिंग्वाज्यधूमेजयेत् इत्थंदोषविहीनमार्द्रकवरंसुस्वादुसंजायते १ अथमातुलिं
गादियोगः मातुलिंगफलकेसरोधृतः सिंधुजन्ममरिचान्वितोमुखे हंतिवातकफरोगमास्यकंशोषमास्यजउतारोचकं अथमातु
लिंगकेसरगुणाः केसरंमातुलिंगस्यसैंधवंमधुनापिवा अस्यवैरस्यशमनंभक्षयेत्कर्षसंमितं १शमयतिकेसरमरुचिंसकलवण
घृतमाक्षमातुलिंगस्य दाडिमचर्वणमथवाचरकोरुचिकारिक्षरूचयामास १इतिचिकित्सासारात् अथशर्करादियोगः शर्क
रादाडिमंचाथद्राक्षाखर्जूरमेवच १अथार्द्रकदाडिमयोगद्वये जिह्वाकंठविशोधनंतदनुचस्यात्शृंगवेरान्वितांसिंधुत्थांहितमत्र
चात्रमधुनाशस्तोरसोदाडिमः अम्बुद्बोधकराण्यजीवर्णशमनान्याहुस्तथाभेषजान्यत्रारोचकहृद्भयोगमसकृत्तत्तत्स्ययोरेनि
च १इतिलघुयोगतः अथसारसंग्रहात्जीरकाद्यंघृतं पिष्ट्वाजाजीसधान्यकंघृतप्रस्थंविपाचयेत् कफपित्तारुचिहरंमंदानल
वमिंजयेत् १इतिजीरकाद्यंघृतं अथरसः सूतगंधाभ्रमगधाम्लिकामरिचसैंधवैः गुटिकारोचकहाराजिह्वावदनशोधिका
१इतियोगतरंगिण्याः सूतादिगुटिका अथगदनिग्रहाल्लघुचुक्रसंधानं गुडक्षौद्रारनालानिसमस्तानियथोत्तरं शंसंतिद्वि
गुणान्भागानसम्यकचुक्रस्यसिद्धये १मन्मस्त्वादिचुक्रोभांडेसक्षौद्रगुडकांजिकं धान्यराशौत्रिरात्रस्थंशुक्रंचुक्रंतदुच्यते इ
तियोगरत्नात् अश्ववंगसेनात् यतेवचाभिरनलेविधिवास्विन्नस्नेहोद्धतोयमदिराज्यतमेनचूर्णं कुष्ठाविडंगयवक्षरेणु
भार्गीरास्तैलहिंगुलवणोत्तमनागराणां पिवेगुडांबुमधुकेवमनंप्रशस्तंलेहंससैंधवाशितामधुसार्पिरिष्टः निष्टांबुछर्दितवतःक
फजेषुपानंराजद्रुमांबुमधुनातुसदीपकाद्यं मारिचंमधुनालिह्यात्कफजेरोचकेभिषक् २शृंगवेररसेचैवमधुनासहयोजयेत्
अरुचिश्वासकासघ्नंप्रतिश्यायंचवातनुत् भोजनाग्रेसदापथ्यंजिह्वाकंठविशोधनं अग्निसंदीपनंहृद्यंलवणार्द्रकभक्षणं १
कारव्याजातिपत्रैलाव्योषवृक्षाम्लदाडिमं सक्षौद्रशर्करंहृद्यरुचिवह्निप्रदीपनं १इच्छाभिनाशभयजेषुतुवाधकेषु भवाभवाय
वितरेत्वरवल्लशक्यरूपात् अर्थंपुत्रातिपातिनंनपुनर्भवाय पौराणकैश्रुतिपथैरनुमानयेत् सात्म्यात्तुधेशाचरितांविविधां
श्चभक्ष्यान्पानानिमूलफलखांडवराजरोगान् सेवद्रवांश्चविविधान्विविधप्रकारैः भुंजीतचापिलघुरूक्षमतःसुखानि २ ४

यस्यचद्वेषितांकिंचित्तद्देयंअरुचौसदा १विचूर्ण्यंमधुसंयुक्तोरसोदाडिमसंभवः असाध्यमपिसंहन्यादरुचिंचविधारितः १अथकल
हंसकांजिकं शिग्रुफलान्यष्टौशमरिचंविंशातिपिप्पल्याः आर्द्रकफलंगुडपलंप्रस्थत्रयमारनालस्य विडलवणसहितमेतेषजह
तिसुरभिगंधाढ्यं विजनसहस्राभिघातज्ञेयंकलहंसकंनाम १अथराजीज्याद्यंचूर्णं द्वेपलेदाडिमान्यष्टौखंडाव्योषपलत्रयं त्रिसुगं
धंपलंचैकंचूर्णमेकत्रकारयेत् दीपनंरोचनंहृद्यंपानसस्वरकासजित् २इतिदाडिमाद्यंचूर्णं पिप्पलीनांशतंचैकंद्वेपलेमरिच
स्यच शितापलचतुष्कंचनागरार्धपलंतथा धान्यसौवर्चलाजाज्यंत्वगेलाचार्धभागके कोलदाडिमवृक्षाम्लयवानीचाम्लवेतसं क
र्षिकांश्चूर्णयेज्ज्ञेतान्हृद्यमन्नंप्ररोचकं प्लीहहृद्ग्रहणीदोषपंचकासनिवारणं खांडवोनामगुल्मार्तिविबंधानाहशूलनुत् १इतिखां
डवचूर्णं तालीसोषणचव्यनागलवणैस्तुल्यांशकोर्द्धितैः कृष्णग्रंथिकतिंतिडीकफुतशुकसक्षीरकाद्वैर्युतैः कंठास्योदरकंदिकार
शमनः कायाग्निसंदीपनंगुल्माध्मानविबंधिकासगुदजाश्वासारुमिछर्दिहाकासारुच्यतिसारमूढमरुतां जैताचसंकीर्तितं चू
र्णोयंभिषजामतीवकथितःखातोमहाखांडवः १इतिमहाखांडवचूर्णः सूक्ष्मैलापत्रकंलकपत्रंतालीसकंशुभं ग्रंथिकाधान्यदा
डिमाश्चार्द्धकार्षिकं पिप्पलीपिप्पलीमूलंचव्यचित्रकनागरं दीप्यकंचैववृक्षाम्लंमरिचंचाम्लवेतसं अजमोदाचगंधाश्चयादि
छे चेतिकार्षिकं प्रदेयंचातिशुध्याया शर्करायाश्चतुःपलं चूर्णमग्निप्रसादंस्यात्सरमंतुप्रवर्धनं प्लीहकासमयाशांसिशूल
श्वासवमिंज्वरं निहंतिदीपयत्याग्निबलवर्णप्रदंपरं वातानुलोमनंहृद्यंकंठजिह्वाविशोधनं इतिसूक्ष्मैलाद्यंचूर्णं इतिवं
गसेनात् अथपथ्यापथ्यविधिः वस्तिर्विरेकोवमनंयथाबलंधूमोपसेवाकवलग्रहस्तथा तिक्तानिकाथानिचदंतधर्षणे
चित्रान्नपानानिहिलैकृतान्यपि १गोधूममुद्गारुणशालिशाष्टीकामांसंवराहाजशशैणसंभवं वेगोज्झपांडुमधुरालिके
लिशः प्रोष्ठिकलेशःकवरीचरोहितः २कर्कारुवेत्राग्रनवीनमूलकंवार्ताकसौभांजनसोचदाडिमं सर्वपटोलंरुचकंघृतं
योवालानितालानिरसोनसूरणः २रक्षारसालंनस्तुदधुकांजिकंकोलंरसालंदधितक्रमार्द्रकं कंकोलखर्जूरप्रियालति
दुकपक्वकपित्थंबदरंविकंकतं ४तालाग्निमजाहिमवालुकासितापथ्यायवानामरिचानि रामठं स्वादम्लतिक्तानिचदेहम

211
1936

यो०र०
१०५

र्जनंवंगोयमुक्तोरुचिरोगिणांहितः तस्योद्गारस्क्षुधानेत्रवारिवेगविधारणं अहृद्यान्नमसृग्मोक्षंक्रोधंलोभंभयंशुचं दुर्गंधान्
नसेवार्थानकुर्यादरुचिनरः १ इतिपथ्यापथ्यविधिः इतिअरोचकचिकित्सासमाप्ता अथातश्छर्दिचिकित्सितंव्याख्यास्यामः अ
माशयोत्क्लेशभवाहिसर्वाश्छर्दयोलंघनमेवतस्मात् प्राक्कारयन्मारुतजांविनातुसंशोधनंवाकफपित्तहारी १ अथवातछर्दिः
योगतरंगिण्याः अथधान्यकादियोगः धान्याकविश्वद्राम्लकषायासिद्धान्नपानरसान्पवनवम्यरुचिप्रशान्त्यै पीत्वासुखा
नित्यभवेन्मधुमिश्रितंवाशर्कराक्षपास्वरसस्तथायवर्णयुक्तं अथलवणादि लवणत्रयसंयुक्तं संयुक्तंलवणेनवा हन्यात्क्षीरद
कंपीतंछर्दिपवनसंभवां १ अथसैंधवादि ससैंधवांपिबेत्सर्पिर्वातछर्दिनिवारणं १ अथपित्तछर्दिः चंदनपाकं चंदनस्याक्षमात्रे
णसंयोज्यामलकीरसं पिबेन्माक्षिकसंयुक्तंपित्तछर्दिनिवृत्तये इतिवृंदात् अथलाजादियूषः लाजाम्मसूरयवमुद्गकृताय
नागरःछर्द्याहितानमधुयुतावद्वापित्तजायां यूषःसुगंधिमधुतिक्तरसप्रयुक्तोम्लद्रवःस्लोष्टभवमंबुहितंतृषायां १ इतिसारसंग्र
हात् चंदनावलेहः चंदनंचमृणालंचवालकंनागरंतथा सतंडुलोदकक्षौद्रःपीतःकल्कोवमींजयेत् १ इतिशारंगधरात् अथो
दीच्यादि सोदीच्यगैरिकंदेयंसेव्यंवातंडुलांबुना धात्रीरसेनवापीतासितालाजावहंतितां १ इतिचिकित्सारात् अथमुद्ग
कषायं कषायोमुद्गसंस्थानांसलाजमधुशर्करः छर्द्यतीसारदाहघ्नोज्वरघ्नःसंप्रकाशितः अथयोगतरंगिण्यः अथपर्पट
क्वाथः क्वाथःपर्पटजःपीतःसक्षौद्रःशिशिरःकृतः पित्तछर्दिंशिरस्तापंचक्षुर्दाहंव्यपोहति १ अथमक्षिकाविट्लेहःसि
ताचंदनमध्वाज्यैर्विलिहन्माक्षिकाशकृत् सोपद्रवापित्तभवाछर्दिरनेनशाम्यति १ अथलाजासक्तुवलेहिकः सर्पिःक्षौद्रसि
तोपेतान्लाजसक्तूनलेहितः पित्तछर्दिरनेनाशुप्रशाम्यतिसुदुस्तरा १ अथगुडूच्यादिक्वाथः गुडूचीत्रिफलारिष्टपटोलैः
क्वथितंजलं क्षौद्रयुक्तंनिहंत्याशुछर्दिंपित्तसमुद्भवां १ इतियोगसारात् अथवंगसेनात् हरीतकीनांचूर्णंतुलिह्यान्माक्षिक
संयुतं अधोभागिकृतेदोषेछर्दिःशीघ्रंनिवर्तते अथकफछर्दिः छर्द्यांकफोद्भवायांतुवमनंकारयेद्भिषक् तोयैःसर्षपसि
धसरादनिंवकृणायुतैः १ शस्यतेशालिगोधूमयवमुद्गमकुष्टकाः षष्टिकानत्रयूषश्चपटोल्याद्यश्चभोजने १ अथविडंगादि ५

213
1938

चूर्णं विडंगत्रिफलाव्योषचूर्णंमधुयुतंलिहेत् शाम्यत्यनेनकफजाछर्दिःसोपद्रवान्दृणां इतियोगतरंगिण्यः अथरक्तशाल्यादि अथ
रक्तशालिभक्तगोदधिशर्कराविमिश्रंच कुर्याद्भोजनमेतत्कफछर्दिछिदंजंतो इतिचिकित्सासारात् अथजांबवादियोगःयोगस
रात् सजांबवंबदरचूर्णमम्लमुस्तायुतंकर्कटकःसस्रंगी दुरालभावामधुनाश्वयुक्तालिह्यात्कफछर्दिविनिग्रहार्थं १ इतियोगरत्ना
शस्यंतेशालिगोधूमयवमुद्गादिषष्टिका नक्रकाजिकयूषाश्चपलारोघाश्चभोजनेः विडंगप्लवशुंठीनांभवोथश्लेष्मजांअमीं इति
वंगात् इतिकफछर्दिः अथत्रिदोषजाछर्दिः अथकफछर्दिः अथधात्रीफलादिपानकं पिष्ट्वाधात्रीफलंद्राक्षांशर्करांच
कोन्मिता दत्वामधुपलंचैवकुडवंसलिलस्यच वाससागालितंपीतंहंतिछर्दिंत्रिदोषजां १ अथमसूरसक्तुः मसूरसक्तवःक्षौद्र
मर्दितादाडिमांभसा पीतानिवारयत्याशुछर्दिंदोषत्रयोद्भवं १ अथएलादिचूर्णं एलालवंगगजकेशरकोलमज्जालाजाप्रियंगु
घनचंदनपिप्पलीनां चूर्णंसितामधुयुतंमनुजोविलिह्यछर्दिंनिहंतिकफमारुतपित्तजानां १ योगरत्नावलितः अथशारंगधरात्
बिल्वादि बिल्वत्वचोगुडूच्यावाक्वाथःक्षौद्रेणसंयुतः जयेत्रिदोषजांछर्दिंपर्पटःपित्तजांतथा १ इतियोगरत्नात् अथवंगात् ये
पृथक्त्वेनक्रियामयोक्तांतांसन्निपातेनसमस्यबुध्यात् रोगार्तिदोषाग्निबलानिवेक्ष्यकुर्याद्भिषक्शास्त्रविदप्रमत्तः धात्रील
जाश्वपलात्रिकां श्यामांजनाह्वकोलास्थिमक्षिकाविट्शितंयुतं कणोषणकपित्थांबुत्वगेलापत्रकंसमं सक्षौद्रपादिकाकेला
घडेतेछर्दिनाशनः १ श्रीफलस्यगुडूच्यावाकषायोमधुसंयुतः पेयश्छर्दित्रयेशीतोमूर्वोवातंडुलांबुना १ समाक्षिकामधुर
सापीतावोतंडुलांभसा तर्पणंवामधुयुतंतत्तृष्णासर्पिर्भिषज १ कृतंगुडूच्याविधिवत्कषायंहिमसंज्ञितां नित्यपिबेत्सव्यं
माक्षिकेणसमान्वितं १ मातुलिंगरसोलाजांशर्करामधुसंयुतः १ पिप्पलीचूर्णसंयुक्तंश्लेष्मछर्दिनिवारणः १ कृष्णोषणक
णाचूर्णंलाजातुल्यंसमाक्षिकं कपित्थबीजम्राम्लकल्कितंछर्दिनाशनं १ कुस्तुंबरमाक्षिकाशर्करालाशिवाहिंबरोस्थिनांद्रिका
न् मधुनाद्राक्षालेहादनिलछर्दिंनिवर्तयेभ्रतः इतिवंगसेनात् इतित्रिदोषछर्दिः अथसामान्यछर्दिः बिल्वत्वचोगु
डूच्योवाकोलामलकमज्जानोमाक्षिकासिद्दसितामधु सकृष्णतंडुलोलेहः छर्दिमाशुव्यपोहति इतिकालाद्यलेहः अथ

यो०र०
१०६

मनःशिलादियोगः योगशतात् मनःशिलामागधिकोषणानां चूर्णं कपित्थाम्लरसेन युक्तं लाजैः समांशैर्मधुना वलीढं छर्दिं प्रसक्ता
मसकृन्निहंति १ अथयोगसारात् अश्वत्थवल्कलादिः अश्वत्थवल्कलं शुष्कं दग्धं निर्वापितं जले तज्जलं पानमात्रेण छर्दिं जयति दुर्जयं
योगतरंगिण्याः अथलाजादियोगत्रयं लाजा कपित्थं मधु मागधिकोषणानां क्षौद्राभया त्रिकटु धान्यक जीरकाणां पथ्यास्तताम्रि
चमाक्षिकपिप्पलीनां लेहास्त्रयः सकलवम्यरुचिप्रशांत्यै १ अथयोगतरंगिण्यः अम्रास्थिक्वाथः अम्रास्थिबिल्वनिर्यूहः पी
तः समधुशर्करः निहंति छर्द्यतीसारं वैश्वानर इवाहुतिं १ अथयोग० जंबुपल्लवादि जम्ब्वाम्रपल्लवश्चातं क्षौद्रं दत्वा सुशीतलं
तोयं जलैरेवं चूर्ण्यापि वेच्छर्द्यतीसारे परं सिध्यं १ अथयोगत० पद्मकाद्यं घृतं पद्मकामृतनिंबानां धान्यचंदनयोः पचेत् कल्के
क्वाथे च हविषः परं छर्दिनिवारणं १ अथमयूरभस्मपक्षावलेहः योगतरं० मयूरपक्षं निर्दग्ध्वा तद्भस्म मधुमिश्रितं लीढा निवा
रयत्याशु छर्दिं सोपद्रवामपि १ अथसारसंग्रहाद्ब्रोण्याद्यं पुराणगोणीभस्माभोमधुयुक्तं निपीय तु छर्दिं छिन्नाति मनुजस्त
त्वान्यैव द्रुतनाशनः १ अथचिकित्सासारात् जातीपत्रादिः जातीपत्र सैरंकृष्णमरिचं शर्करान्वितं एतानि मधुयुक्तानि हंति च्छ
र्दिं चिरोद्भवां १ अथचिकित्सासारात्कोलमज्जादि कोलमज्जा कणा बर्हिपक्षभस्म सशर्करं मधुना लेहयेच्छर्दिं हिक्काकोपस्य
शांतये १ अथशार्ङ्गधरात् बीजपूरादि बीजपूराम्रजंबूनां पल्लवानि जटः पृथक् विपचेत् पुटपाकेन क्षौद्रयुक्तश्च तद्रसः १ छ
र्दिं निवारयेत् घोरां सर्वदोषसमुद्भवां १ अथचिकित्सासारात् जंब्वाम्रपल्लवादिः जंब्वाम्रपल्लवोशीरवटशुंगावरोहणः क्वाथः
क्षौद्रयुतः पीतः शीतलो विनिगच्छति १ छर्दिं ज्वरमतीसारं मूर्छां तृष्णां च दुर्जयां १ अथपटोलाद्यं घृतं पटोलशुंठ्योः कल्का
भ्यां केवलं कुलकेन वा घृतप्रस्थं विपक्तव्यं कफपित्तवमीं हरेत् १ अथहिंग्वादि हिंगुनासारिवाम्ललं सर्ववातिहरं परं रंभाकंद
रसो वापि मधुना शक्रत् १ अथदध्युत्तरसादि दध्युत्तरससंयुक्तं पिप्पलीमाक्षिकान्वितं मुहुर्मुहुर्नरो लिह्याच्छर्दिभ्यः प्र
तिमुच्यते १ इतिसुश्रुतात् अथकरंजादि कोमलकरंजपत्रं सलवणमम्लेन संयुक्तं यः खादति दीनवदनो छर्दिकफोल
स्यकृत्तेह १ इतिसारसंग्रहात् अथकरंजबीजादि इषत्भृष्टं करंजस्य बीजं खंडि(?)कृतं पुनः मुहुर्मुहुर्नरो भक्त्वा छर्दिं जयति ६

215
1936

दुस्तरां १ अथशंखपुष्पीरसादि शंखपुष्पीरसं टंकं द्वयं समरिचं मुहुः सक्षौद्रं मनुजः पीत्वा छर्दिभ्यः किल मुच्यते १ इतिलघुयोगत० अ
थहरीतक्यावलेहः हरीतकीनां चूर्णं तु लिह्यान्माक्षिकसंयुतं अधोभागे कृते दोषे छर्दिस्तेनैव शाम्यति १ अथयोगसाराज्जीरकाद्यधूपः
जीरान्वितं बहुवस्त्रं वर्तिं कृत्वाथ धूपयेत् आघ्राणाद्विलयं याति सर्वा च्छर्दिश्चिरोद्भवा १ इतिसामान्यविधिः अथविशेषादिपंचवमिषु वाम
त्वामामवीभत्सैर्हेतुभिः संहरेद्वमिं दौहृदस्य वमिं हृद्यैः काक्षिकैर्वस्तुभिर्जयेत् १ लंघनैर्वमनैर्वापि साल्म्यैर्वा साम्यसंभवां कृमिहृद्रोगवच्चा
पि साधयेत्कृमिजां वमिं १ यथादोषं च विनिवेक्ष्य विधिमनंतरं पवनघ्नी चिरोत्थासु प्रयोज्या छर्दिषु क्रिया २ अथरसः पारदादिचूर्णं
रसरत्नप्रदीपात् रसबलिघनसारकोलमज्जामरकुसुमांबुधराप्रियंगुलाजाः मलयजमगधात्वगेलपत्रं दलितमिदं परिभाव्यचंदनाद्भिः
१ मधुमरिचयुतं रसोस्यमाषं जयति वमिं प्रबलां विलिह्य मर्त्यः २ अथयोगरत्नावल्याः जीरकादिरसः अजाजीधान्यपथ्याभिः सक्षौ
द्रैः सकटुत्रिकैः एतैः सार्धं सूतभस्म सद्यो वांतिं विनाशयेत् १ अथयोगसारात् वमनाम्रतयोगः गंधकः कमलाक्षिश्च यष्टिमधु शिला
जतु रुद्राक्षोटकणश्चैव सारंगस्य च शृंगकं चंदनं च तवक्षीरी गोरोचनमिदं समं बिल्वमूलकषायेण मर्दयेद्यामसप्तकं २ मात्रां चैव प्र
कुर्वीत वल्लस्यैव प्रमाणतः नानाविधानुपानेन छर्दिं हंति त्रिदोषजं ३ वमनाम्रतयोगोयं कमलाकरभाषितं ४ अथद्वितीयो वांतिहृद्र
सः अयः शंखवलीस्तुल्यं खल्वे तुल्यां विमर्दयेत् कन्याकनकचांगेरीरसैर्गोलं विधाय च सप्तसप्तकर्पटैर्लिह्यात् पुटितो वांतिहृद्रसः
द्विवल्लः कृमिरोगोपि साजमोदसवेल्लकः २ वांतिहारिणमद्रुनाभोक्तोयं मधुनायुतः पिप्पलक्षारपानीयं पाययेद्वांतिहृद्भिषक् ३ अथ
छर्दिनकरसः रसभस्म पलांशं स्यात्तत्साद्स्वर्णभस्म च ताम्रभुजंगवंगमौक्तिकं तत्समांशकं तेषामन्यतमं चूर्णमभ्रकं तत्समं भवेत् तत्
समं गंधकं दत्वा बीजपूरार्द्रकांबुना सर्वं खल्वे विनिःक्षिप्य मर्दयेत्त्रिदिनावधि तत्कल्कं भावयेत्सप्तदिनान्यामलकद्रवैः पश्चात्तन्म
त्स्रपात्र्यां रुध्वा भांडे विनिक्षिपेत् पांसुभिः परिपूर्याथ क्रमवृद्धेन वह्निना पचेद्यामत्रयाच्चूल्याः स्वांगशीतं समुद्धरेत् ततः सर्वस
मारूप चूर्णयेत्सद्वगालितं अजाजीदीप्यकं व्योषं त्रिफला कृष्णजीरकं कृमिशत्रुवरालं च प्रत्येकं निष्कमानकं ततः सर्वं चूर्णयित्वा
योजयेत्सर्वभस्मना इत्येयं च रसेनेन प्रोक्तः छर्दिनकोरसः तन्द्रां गहरेद्धृधैर्दद्याद्वल्लप्रमाणतः अम्लापनमस्रकापित्तं छर्दिंगुल्मम

यो०र०
१०७

शेषकं आमवातंचदुःसाध्यंप्रसेकछर्दिहृद्रुजं सर्वलक्षणसंपूर्णंविनिहंतिक्षयामयं स्वाश्विहितोहिसकरः सर्वेषामन्नतोपमः इतिरसः
अथपथ्यापथ्यं कलायपवगोधूममुद्गषाष्टिकशालयः शशातितिरलावाद्याम्रगाजांगलसंज्ञिताः १ रागखांडववेत्राग्रकोलद्राक्षाफला
निच वमिरोगेषुपथ्यानिमुनिभिःकथितानितु २ लवांबीवीकोशवत्योमधुकांचित्रमेलांसर्षपंदंवदाली व्यायामंवासाव्युदुष्टान्नपानंक
धांसद्योवर्जयेदप्रमत्तः इतिपथ्यापथ्यविधिः इतिछर्दिचिकित्सासमाप्तः अथतृष्णाचिकित्सितंव्याख्यास्यामः अथवाततृष्णा वात
घ्नमन्नपानंतुमिश्रलघुशीतंचवाततृष्णायांस्याज्जीवनीयात्सिद्धंक्षीरघृतंवातजेतर्षे इतिवृंदात् अथवंगसेनात् तृष्णानुरुद्धाउदरेण
प्रशीतांवामयेच्छमाधिकांदनेन विलंघनंचात्राहितंवदंतिसुवर्णरूपादिभिरग्नितप्तैः लोष्टैरसंवासिकतायुवापिजलंसुखोष्णंशमयेत्तु
तृष्णां सशर्करांक्षौद्रयुतांहिताँवापंचांगिकायंगणायउक्तोस्तिष्टांतुसिध्दं प्रथमेगणेच पिबेन्मुखोष्णामनुजोल्पमल्पमुच्यते तृष्णा
पवनात्मकस्य इतिवाततृष्णा अथपित्ततृष्णा पित्तजायांसितायुक्तः पक्वोदुंबरजोरसः पापिबेत्तसितमंथंपयःकोलजसक्तुभिः अथवा
श्यर्यादि कार्श्मर्यशर्करायुक्तंचंदनोशीरपद्मकं द्राक्षामधुकसंयुक्तंपित्ततर्षेजलंपिबेत् इतिचिकित्सासारात् अथवंगसेनात्
पित्तोत्तरापित्तहरोविपक्वंनिहंतितोयंपयएववापि स्वादुतिक्तंद्रवंशीतंपित्ततृष्णाहरंपरं स्याज्जीवनीयसिद्धंचक्षीरंवापिजेतर्षे
१ द्राक्षाचंदनखर्जूरोशीरसमधुसंयुतंतोयं जीर्णभक्तापिबेद्वापिमधुनातंदुलोदकं २ इतिपित्ततृष्णा अथकफतृष्णा यवोत्थं
कफतृष्णायांकथितंथैवक्वाथंस्यात् सभारुष्यविपाकालस्यछर्दिधुकफानुगांतृष्णां १ ज्ञात्वामधुदाधितर्पणलवणेनजलेवमन
मभीक्ष्णं दाडिम्मम्लफलंवापन्यत्सकषायमवलेहं पयमथवाप्रदद्याद्रजनीमधुशर्करायुक्तं ३ इतिवृंदात् अथसामान्य
विधिः तृष्णातिदाधावुदरेचपूर्णेसंछर्दयन्मागधिकोदकेन विलोमसंचाररहितांविधेयंस्याद्दाडिमाम्रातकमातुलिंगैः १ सुवर्णरौ
प्यादिभिरग्नितप्तैर्लोष्टैःकृतंवासिकतोपलैर्वा जलंसुखोष्णंशमयेत्तुतृष्णांसशर्करंक्षौद्रहितांहिमंवा १ कसेरुशृंगाटकपद्मबी
जबिसेक्षुसिध्दंससितंसवारि तृष्णांक्षतोत्थामपिपित्तजान्नांनिहंतिपीतांशिशिरीकृतंच २ इतिसारसंग्रहात् मधुयुक्तंजलंशी
तंपिबेद्वाकंठमातुरः पश्चाद्वमेदशोषंतत्तृष्णातेनप्रशाम्यति १ इतियोगतरंगिण्याः मधुरैःसंजीवनीयैःशीतैश्चसनिक्तवंश्च ८

तंक्षीरं पानाभ्यंजनसेकेलिप्तंमधुशर्करायुक्तं १ तज्जलंवाघृतंनिरंपानाभ्यंगेषुतस्यमपिकिंचीत् जंब्वाम्रातकबदर्यम्लवेतसवल्कलं
चाम्लैः हन्मुखाशिरःप्रदेहाःसघृतान्मूर्छातिश्रमत्तपाघ्नः १ इतिवृंदात् सजीरकान्यार्द्रकशृंगवेरसौवर्चलान्यर्धपरिप्लुतानि मद्यानि
धान्यानिचगंधवंतीपीतानिसद्यःशमयंतितृष्णां १ अम्रजंबुकषायंवापिबेन्माक्षिकसंयुतं सर्वांछर्दिप्रणुदतितृष्णांचैवापकर्षति १ गोस्त
नीक्षुरसक्षीरयष्टीमधुमधूत्पलैः नियतंवास्यनोपांतैस्तृष्णाशाम्यतितत्क्षणात् १ जीरकुस्तुंबरीद्राक्षाचंदनोत्पलशीतलं शीतलेनसमं
दद्यात्तृष्णाहंत्यातिशीतालि १ निर्वापितंतप्तलोष्टैःकपालासिकतादिभिः तृष्णायांवमनोत्थायांसगुडंदधिशस्यते १ इतिचिकित्सासारात् अ
थमधुलघुकादिक्वाथः शारंगधरात् मधुकपुष्पगंभारीचंदनोशीरधान्यकैः द्राक्षयाचकृतःक्वाथः शीतशर्करयायुतः १ तृष्णापित्त
हरःप्रोक्तादाहमूर्छाभ्रमान्जयेत् १ अथगंडूषः सक्षौद्रमाम्रजंबूत्थंपिबेत्क्वाथंसुपाचितं सतृष्णोमधुनाकुर्याद्गंडूषान्शिशिराञ्छितं
इतिरसरत्नप्र० क्षीरेक्षुरसमृद्वीकाक्षौद्रसिंधुगुडोदकैः सहवृक्षाम्लगंडूषस्तालुशोषंतृडंतकृत् १ इतियोगतरं० अथलेपः दाडि
मदाधिकापित्थलोध्रैः सवीदारिवीजपूरकैः शिरसःलेपोगौरामलकैःश्चनारनालयुतैःसहितैः १ इतिवृंदात् अरुणचंदनवालकैर्नस
दपद्मकतुल्यकृतांशकैः शिरासिलेपनमाचरणात्तृष्णातिडपयात्युपशांतिमसंशयं १ इतिकदंबात् दाडिमंवाधरलोध्रंकपित्थंवी
जपूरकं पिष्ट्वालेपःशिरस्येषोपिपासादाहनाशनः इतियोगतरं० इतिलेपः अथगुटिका नीलांबुजाब्दमधुलाजवटावरोहैः लक्ष्मी
कृतोविरचितागुटिकामुखस्थां तृड्वानिवारयतितत्क्षणमेवतीव्रांमत्यो स्पृहामिवयतेःपरमार्थचिंता इतिराजमार्तंडात् वटप्ररो
हंमधुकुष्ठमुत्पलंसलाजचूर्णगुटिकाप्रकल्प्य सुसंहितासावदनेचधारितातृष्णांसुबद्धामपिहंतिसज्वरं १ इतियोगशतात् तुलाम्र
दवटप्ररोहमधुकैर्मध्वान्वितैःकल्पिता गुटिकामुखसंस्थाप्रशमयेदास्यांतरस्थागुटी एलालाजलवंगनपलस्त्रीलोकमज्जांबुद
श्रीखंडमधुयुक्ताप्रियेप्रशमयेद्वांतिंत्रिदोषोद्भवां १ इतिवैद्यजीवनात् रोगोपसर्गजातायांधान्याबुसासितामधु वटप्ररोहयष्ट्या
कक्रणामधुकृतावटी मुखस्थाचिरकालोक्षांकृष्णांहन्यात्सुदुस्तरां १ इतिचिकि० इतिसामान्यविधिः क्षतोद्भवांरुग्विनिवारणेन
जयेद्रसानांमसजश्चपानैः क्षयोत्थीतांक्षीरजलंनिहन्यान्मांसोदकंवामधुकोदकंवा १ अमोद्भवांबिल्ववनाद्युतानांजयेत्क्वा

217
1936

यो०र०
१०८

यैरपिदीपनानां उल्लेखनैर्गुर्वन्नानभजातांजयेत्तस्योत्थांतुविपासां १स्निग्धैर्न्नैर्भुक्तेयात्तृष्णास्यात्तांगुडांबुनाशमयेत् अतिरूक्षदुर्बलानां तर्षंशमयेन्नृणामिहांबुपेयः १छागमांसरसंसाज्यंशीतंसमधुशर्करं पीत्वाजयतिदुर्दांतमूर्छांछर्दिमदात्ययान् १सात्म्यान्नपान भैषज्यैस्तृष्णार्तस्यजयेत्तृषां तस्यांशिनाप्यामत्योपिव्याधीश्चिकृत्स्निकित्सितं २ताषितोमोहमायातिमोहात्प्राणान्विमुंचति तस्मात्सर्वास्व वस्थासुनकश्चित्तृषार्तवार्यते अन्नेनापिविहीनस्तुप्राणान्संधारयेच्चिरं तोयाभावेपिपासार्तः क्षणात्प्राणैर्विमुच्यते १अथरसादिगुटी रसरजतगुटींपरीयसीयांवदनसरोरुहमध्यगांदधाति सजयतितृषितस्तृषांमनुष्योन्द्रमद्यामिवत्रिमार्गगांभः १अथरसादिचू र्णं रसंगंधककर्पूरैः शैलोशीरभरितैः सासितैःक्रमवृद्धैश्चसूक्ष्मंकृत्वाल्पवद्गुरे त्रिगुंजाप्रमितंखादेपिवेत्पर्युषितांबुच भ्रष्टांतृषां निहंत्येवमाशुवैश्यांचप्रकाशितं १इतिसारसंग्रहात् इतिरसः अथपथ्यापथ्यविधिः शाष्टिकाशालयःपेयापेयाविलेपिलासक्तवः अन्नमुंडोधान्यरसःशर्करारागखांडवैः १भ्रष्टैर्मुद्गैर्मसूरैर्वाचणकैर्वाकृतोरसः रंभापुष्पंतककूर्चंकूभांडकमुपोदिका खर्जूरंदाडिमं धात्रीबीजपूरंगवांपयः जंबीरंकरमर्दश्चपथ्यमेतत्तृषातुरे गुर्वन्नमम्लंलवणंकषायंकटुकंस्त्रियं दुष्टजलानितीक्ष्णं एतानिसर्वाणि हिताभिलाषीतृषातुरोनैवभजेत्कदाचित् २इतितृष्णाचिकित्सासमाप्तः अथमूर्छाचिकित्सा मूर्छामोहोद्विधासप्रभवतिसह जागंतुभेदेनभिन्नस्तत्रागंतुस्त्रिधास्याद्रुधिरविषसुराजन्यभेदाद्विभिन्नाः प्रत्येकंदोषभेदाद्भवतिचसहजःसात्रिधावद्कपित्तं प्राधान्येनेवतिष्ठेदभिदधातिचतांद्वंद्वजांसन्निपाते १सेकावगाहामणयःसहाराःशीताःप्रदेहाव्यजनानिलाश्च शीतानिपाना निचगंधवंतिसर्वासुमूर्छास्वनिवारितानि १कोलमज्जोषणोशीरकेशरंशीतवारिणा पीतंमूर्छांजयेल्लीढाकृष्णांवामधुसंयुतां १ इतिवृंदात् महौषधामृताद्राक्षापुष्करग्रंथिकोद्भवं पिबेत्कणायुतंक्वाथंमूर्छायांचमदेषुच वृंदात् नारीकेलांबुनापीताःसक्तवः समशर्कराःपित्तहृत्कफतृण्मूर्छाभ्रमादीन्हंतिदारुणात् इतिचिकित्सासारात् दुरालभाकषायस्यघृतयुक्तस्यसेवनात् भ्रमः शाम्यतिगोविंदचरणस्मरणादि इतिवैद्यजीवनात् मधुनाहंत्यु पयुक्तात्रिफलारात्रौगुडार्द्रकंप्रातःसप्ताहात्पथ्यभुजोमद मूर्छांकामिलोन्मादात् इतिचिकि० स्विन्नमामलकंपिष्टाद्राक्षायासहसंप्रजेत् विश्वभेषजसंयुक्तंमधुनासहलेह्येत् १तेनास्य १०८

219
1936

शाम्यतेमूर्छाकासश्वासस्तथैवच इतिवृंदात् अथयोगतरंगिण्यांघृतं पथ्याक्वाथेनसंसिद्धंघृतंधात्रीरसेनवा सर्पिकल्याणकंवापि मदमूर्छापहंपिबेत् रक्तजायांतुमूर्छायांहितःशीतक्रियाविधिः मद्यजायांवमेन्मद्यांनिद्रांसेवेद्यथासुखं १विषजायांविषघ्नानिभेषजा निप्रदापयेत् १अंजनान्यवपीडाश्चधमाःप्रधमनानिच सूचिभिस्तोदनंशस्तंदाहपीडांनखांतरे १लुंचनंनखलोम्नांश्चदंतैर्दशन मेवच आत्मगुप्तावधर्षश्चहितस्तस्यावबोधने १अंड्योर्घर्षणंचापिहितमेतैर्विशोधनं नासावदनरोधेननस्यैर्मरिचनिर्मितैः नरंजा गरयोन्मौमूर्छितंमदमारुतैः १अथरसः कणामधुयुतस्सूतंमूर्छायामनुशीलयेत् शीतसेकावगाहादिसर्वंवापीडनंहितं १इतिरस रत्नप्रदीपात् अथपथ्यापथ्यं जीर्णायवालोहितशालयश्चकौभंहविर्मुद्गसतीनयूषः धन्वोद्भवामांसरसाश्चरागात्सुखांडवागव्य पयःसिताच पुराणकूभांडपटोलमोचहरीतकीदाडिमनारिकेलं मधूकपुष्पाणिचतंडुलीयमुपोदकीन्नातिलघूनिचापि २ अत्युच्चशब्दोद्भुतदर्शनंचगीतानिवाद्यान्यपिचोत्कटानि श्रमश्रुतिश्चिंतनमात्मबोधोधैर्यंचमूर्छाश्रितिपथ्यवर्गः ३तांबूलपत्र शाकानिदंतघर्षणमातपं विरुद्धान्यंनपानानिव्यवायस्वेदनंकटु ४विण्मूत्रवेगरोधंचतक्रंमूर्छामयीत्यजेत् ५ इतिमूर्छाचिकि त्सासमाप्तः अथपानात्ययरमदापानाजीर्णपानविभ्रमाचिकित्सा अथवातपानात्ययं मद्यंसौवर्चलव्योषयुक्तंकिंचिज्जला न्वितं जीर्णमाद्यायदातव्यंवातपानात्ययापहं १सुतंसौवर्चलंशृंगीत्र्यूषणार्द्रकदीपकैः मद्यंपीत्वाजयत्युग्रंपवनोत्थंमदात्ययं अथपित्तपानात्ययं पित्तपानात्ययेपेयंवटशृंगंहिमांबुना सशर्करंपुनर्मद्यंपिबेत्किंचिज्जलान्वितं १क्षुद्रामलकखर्जूरपरू षकंहिमंपिबेत् सिताविमिश्रितंपीतंपानात्ययविकारनुत् १अथकफपानात्ययं पानात्ययेकफोत्थेतुतलीतांलेखनंचरेत् य थाबलंलंघनंचदीपनीयौषधानिच अथाष्टांगलवणं सौवर्चलमजाजीचवृक्षाम्लंसाम्लवेतसं त्वगेलामरिचार्धशांशर्कराभा गयोजितं एतल्लवणमष्टांगमग्निसंदीपनंपरं मदात्ययेकफोत्थेतुदद्यात्स्रोतोविशोधनं २अत्रैकोद्रव्यभागस्त्वगेलामरि चादिप्रत्येकमर्धभागातिशर्करासौवर्चलादिभिस्तुल्या इत्यष्टांगलवणं इतिकफपानात्ययं सर्वजेसर्वमेवेदंप्रयोक्तव्यंचि कित्सितं आभिःक्रियाभिःसिध्याभिःशांतियातिमदात्ययः १अथसामान्यप्रतीकारः मधुनाहंत्युपयुक्तात्रिफलारात्रौगु

यो०र०
१०८

यैरपिरीपनानां उल्लेखनैर्गुर्वन्नानभ्नातांजयेत्क्षयोत्पांतुविपासां १स्निग्धेन्नेभुक्तेयात्तछ्यस्यातांगुडांकुरान्नामयेत् अतिरुक्षदुर्बलानां
त्पंज्ञामयेन्तृणामिहांबुपियः १छागमांसरसंसाज्यंज्ञालिसमधुज्ञार्करं पीत्वाजयातिदुर्दांहमूर्छांछर्दिमदात्ययान् १सात्म्यान्नपान
भैषज्यंस्तत्क्षार्तस्यजयेत्तृषां तस्योगिनायामत्योपिव्याधीश्चिकुश्चिकित्सितुं २तापितोमोहमायातिमोहात्प्राणान्विमुंचति तस्मात्सर्वास्व
वस्थासुनक्वचिद्वारिवार्यते अन्नेनापिविहीनस्तुप्राणान्संधारयेच्चिरं तोयाभावेपिपासार्त्तः क्षणात्प्राणैर्विमुच्यते १अथरसादिगुटी
रसरजतगुटीयंटीयसीयोवदनसरोरुहमध्यगांदधाति सजयतितापितस्तृषांमनुष्योन्चिरामद्यामिवात्रिमार्गगांभः १अथरसादिचू
र्णं रसंगंधककर्पूरैः शैलोशीरभारिचक्रैः सासितैः क्रमवृद्धैश्चसूक्ष्मंकृत्वात्वहर्मुखे त्रिगुंजाप्रमितंखादेपिबेत्सर्युषितांबुच तृष्णांतथा
निहंत्येवमाश्विभ्यांचप्रकाशितं १इतिसारसंग्रहात् इतिरसः अथपथ्यापथ्यविधिः शाष्टिकाशालयः पेयापेयाविलेपिलासक्तवः
अन्नमुंडोधान्यरसः शर्करारागखांडवैः १मृदैर्मुद्गैर्मसूरैर्वाचणकैर्वाकृतोरसः रंभापुष्पंतककूर्चंकूभांडकसुपोदिका खर्जूरंदाडिमं
धात्रीबीजपूरंगवांपयः जंबीरिंकरमर्दश्चपथ्यमेतत्तृषातुरे गुर्वन्नमम्लंलवणंकषायंकटुकास्त्रियं दुष्टजलानितीक्ष्णं एतानिसर्वाणि
हितानिलाषीतृषातुरोनैवभजेत्कदाचित् २इतितृष्णाचिकित्सासमाप्तः अथमूर्छाचिकित्सा मूर्छामोहोद्विधासप्रभवतिसह
जागंतुभेदेनाभिन्नस्तत्रागंतुत्रिधास्याद्रुधिरविषसुराजन्यभेदाद्विभिन्नाः प्रत्येकंदोषभेदाद्भवतिचसहजःसात्रिधावद्दुकाप्तिं
प्राधान्येनैवतिष्टेदभिदधातिचतांद्वंद्वजांसान्निपाते १सेकावगाहामणयःसहाराः शीताःप्रदेहाव्यजनानिलाश्च शीतानिपाना
निचगंधवंतिसर्वासुमूर्छास्वनिवारितानि १कोलमज्जोषणोशीरकेशरंशीतवारिणा पीतंमूर्छांजयेल्लीढाकृष्णांवामधुसंयुतां १
इतिवृंदात् महौषधाम्रताद्राक्षापुष्करग्रंथिकोद्भवं पिबेत्कणायुतंक्वाथंमूर्छायांचमदेषुच वृंदात् नारीकेलांबुनापीताःसक्तवः
समशर्कराः पित्तहृत्कफतृण्मूर्छाभ्रमादीन्हंतिदारुणात् इतिचिकित्सासारात् दुरालभाकषायस्यघृतयुक्तस्यसेवनात् भ्रमः
शाम्यतिगोविंदचरणस्मरणादि इतिवैद्यजीवनात् मधुनाहंत्यु पयुक्तात्रिफलाराात्रौगुडार्द्रकंप्रातः सप्ताहात्पथ्यभुजोमद
मूर्छाकामिलोन्मादान् इतिचिकि० स्विन्नमामलकंपिष्टाद्राक्षाभ्यासहर्संभ्रजेत् विश्वभेषजसंयुक्तंमधुनासहलेह्येत् १तेनास्य १०८

219
1936

शाम्यतेमूर्छाकासश्वासस्तथैवच इतिवृंदात् अथयोगतरंगिण्यांघृतं पथ्याक्वाथेनसंसिद्धंघृतंधात्रीरसेनवा सर्पिकल्याणकंवापि
मदमूर्छापहंपिबेत् रक्तजायांतुमूर्छायांहितःशीतक्रियाविधिः मद्यजायांवमेन्मद्यंनिद्रांसेवेद्यथासुखं १विषजायांविषघ्नानिभेषजा
निप्रदापयेत् १अंजनान्यवपीडाश्चधूमाःप्रधमनानिच सूचिभिस्तोदनंशस्तंदाहपीडांनखांतरे १लुंचनंनखलोम्नांश्चदंतैर्दशन
मेवच आत्मगुप्तावधर्षश्चहितस्तस्यावबोधने १अंडयोर्घर्षणंचापिहितमेतैर्विशोधनं नासावदनरोधेननस्यैर्मरिचनिर्मितैः नरंजा
गरयोद्भूतौमूर्छितंमद्भास्त्रैः १अथरसः कणामधुयुतंसूतंमूर्छायामनुशीलयेत् शीतसेकावगाहादिसर्वंवापीडनांहितं १इतिरस
रत्नप्रदीपात् अथपथ्यापथ्यं जीर्णायवालोहितशालयश्चकोभंहविर्मुद्गसतीनयूषः धन्वोद्भवामांसरसाश्वरागात्सुखांडवाग्व्य
पयःसिताच पुराणकूभांडपटोलमोचहरीतकीदाडिमनारिकेलं मधूकपुष्पाणिचतंदुलीच्चयमुपोदकीन्नातिलघूनिचापि २
अत्युग्रशब्दोद्भुतदर्शनंचगीतानिवाद्यान्यपिचोत्कटानि श्रमश्रुतिश्चिंतनमात्मबोधोधैर्यंचमूर्छास्थितिपथ्यवर्गः २तांबूलपत्र
शाकानिदंतघर्षणमातपं विरुद्धान्यन्नपानानिव्यवायंस्वेदनंकटु ४विण्मूत्रवेगरोधंचतक्रंमूर्छामयीत्यजेत् ५ इतिमूर्छाचिकि
त्सासमाप्तः अथपानात्ययपरमदापानाजीर्णपानविभ्रमाचिकित्सा अथवातपानात्ययं मद्यंसौवर्चलव्योषयुक्तंकिंचिज्जला
न्वितं जीर्णमाद्यायदातव्यंवातपानात्ययापहं १सुतंसौवर्चलंश्रृंगीव्यूषणार्द्रकदीपकैः मद्यंपीत्वाजयत्युग्रंपवनोत्थंमदात्ययं
अथपित्तपानात्ययं पित्तपानात्ययेपेयंवटश्रृंगहिमांबुना सशर्करंपुनर्मद्यंपिबेत्किंचिज्जलान्वितं १क्षुद्रामलकखर्जूरपरू
षकहिमंपिबेत् सिताविमिश्रितंपीतंपानात्ययविकारनुत् १अथकफपानात्ययं पानात्ययेकफोत्थेतुतत्सीलीलेखनंचरेत् य
थावल्लंघनंचदीपनीयौषधानिच अथाष्टांगलवणं सौवर्चलमजाजीचवृक्षाम्लंसाम्लवेतसं त्वगेलामरिचार्धांशंशर्कराभा
गयोजितं एतल्लवणमष्टांगमग्निसंदीपनंपरं मदात्ययेकफोत्थेतुदद्यात्स्रोतोविशोधनं २अत्रैकोद्रव्यभागत्वगेलामरि
चादित्रयेकमर्धभागातिशर्करासौवर्चलादिभिस्तुल्या इत्यष्टांगलवणं इतिकफपानात्ययं सर्वजेसर्वमेवेदंप्रयोक्तव्यंचि
कित्सितं आभिःक्रियाभिःसिद्धाभिःशांतियातिमदात्ययः १अथसामान्यप्रतीकारः मधुनाहंत्युपयुक्तात्रिफलारात्रौगु

दार्द्रकंप्रातः सप्ताहात्सथ्यभुक्तोमदमूर्छाकामिलोन्मदान् दुस्पर्शोनसमुस्तेनमुस्तपर्पटकेनवा जलंमुस्तैश्चतंवापिदद्यौद्दोषविनाश
नं १ एतन्देवचपानीयंसर्वत्रापिमहात्यये निरत्ययंपीयमानंपिपासाज्वरनाशनं १ इतिवृंदात् चव्यंसौवर्चलंहिंगुपूरकंविश्वभे
षजं चूर्णयेनपानव्यंपानात्ययरुजापहं १ इतिचिकित्सासारात् मंथः खर्जूरमृद्वीकावृक्षाम्लाम्लीकदाडिमैः परूषकैःसामलकै
र्युक्तोमद्यविकारनुत् इतिवृंदात् मंथितंगोदधिसहितंतैलकर्पूरसंमिश्रं आस्वाद्यपीतमाशुक्षपयतिपानात्ययरोगं १ लघुयोगत
अथघृतं शतावरीरसक्षीरमष्टीकल्कैःश्रृतंघृतं पुनर्नवाक्वाथपयोपानात्ययमपोहति १ इतिशतावरीपुनर्नवासर्पिः अथमाषघृ
तं कद्लंमुस्तगुडूचीमाषैः क्रमवार्धितैश्चनत्सर्वं घृतमर्दितमाषघृतंहन्याद्धंसुराभवंसपदि १ इतिघृतं मद्यंपीत्वायदिवात
तत्क्षणमेवलेह्याशर्करासघृता मदयतिनजातुमद्यंनागापिप्रथितवीर्यमपि १ इतिसामान्यप्रकारः अहानिसप्तचाष्टौवात्ययपा
नात्ययःस्मृतः पानंहिमद्यजंजीर्णमतऊर्ध्वंविमार्गगं पानाजीर्णविनाशायकुर्यात्कफहरंविधिं अथप्रगमदप्र० पूगमदः प्र
शमयात्याचिरेणशंतोराघायशंखरजसः प्रबलस्यगंधं पानेनवाशिशिरपुष्करणीजलस्यसंसेव्यतेरातिहितैर्व्यजनानिलैश्च
१ इतिवृंदात् अथकोद्रवधत्तुरौ कूष्मांडरसः सगुडः शमयतिमदमाशुकोद्रवजं धत्तूरजंचदुग्धंसशर्करंपानयोगेन अ
थकज्जलिः धात्रीस्वरसंनिपीतासैरंगंधककज्जलीसितासहिता हरतिमदात्ययरोगानुग्रत्माविरोगानाहसा १ अथपथ्यं
गोधूमयवमुद्गाश्चमाषषष्टिकशालयः तंदुलीयंपटोलंचदक्षवर्हीशशामिषं शीतांबुचंदनस्नानंसेव्यमेतन्मदात्यये १
गुडस्यचतुलांपचेत १ तसिद्धंव्योषपत्रेलात्वक्पत्रैःकर्षिकैःपृथक्॥ चूर्णिकृतैर्लिहेच्छीतेमधुतःकुडवंक्षिपेत २ लेहःपोनर्नवानां
मश्लेष्मशोफनिषूदनं॥ श्वासकासारुचिहरोबलपुष्ट्यग्निवर्धनः ३ ३ इतिपुनर्नवादिलेहः॥ अथअरावधादितैलं॥ कफोत्थे
त्रबिबेतैलंसिद्धमारग्वधादिना॥ मंदेग्नौस्तिमितेकोष्टस्रोतरोधेरुचावपि १ क्षारमूत्रासवारिष्टचूर्णतक्राणियोजयेत॥ इति
कफचि॥ अथत्रिदोषजचि॥ मिश्रमिश्रक्रमंकुर्यात्सर्वजेसर्वमेवतु॥ अथपिप्पल्यादिचूर्णं॥ पिप्पल्यजाजीगजपिप्पलीचनिद
ग्धिकानागरचित्रकेश्च॥ रजन्ययोपिप्पलीमूलपाठामुस्तंचचूर्णंसुखतोयपीतं १ कल्कश्चभूनिंबमहौषधाभ्यांहन्यात्रिदोषं
चिरजंचशोफं॥ २ अथार्द्रकरसादियोगः॥ रसस्तथैवार्द्रकनागरस्यपयोथजीर्णेपृयसातमद्यात॥ त्रिलाहयंवात्रिफलार
सेनहन्यात्त्रिदोषंश्वयथुंप्रसह्य १ इतित्रिदोषजामिश्रचि०॥ अथागंतुजेविषेच॥ शोफंचागंतुजोकुर्याच्छेकलेपादिशीतलं॥
भल्लातकभवेच्छोफेसतिलाकृष्णामृतिका १ नवनीतंतिलालेपादथदुग्धंतिलान्वितं॥ यष्टीदुग्धतिलैर्लेपोनवनीतेनसंयुतः ५८
२ शोफमारुष्करंहंतिचूर्णशालदलस्यवा॥ इत्यागंतुकविषचि०॥ अथसामान्यविधिः॥ अथबिल्वपत्रस्यरसः॥ बिल्वपत्रर
सःपीतःशोषणाश्वयथोरुजां॥ विड्भंगेचैवदुर्नाम्निविषूच्यांकामलास्वपि १ अथभूनिंबादिकल्कः॥ भूनिंबविश्वकल्कंज

319/1936

श्चापीतःपुनर्नवाक्वाथः॥ अपहरतिनियतमाशुश्वयथुंसर्वांगजंनृणां १ अथपथ्यादि॥ पथ्यामृताभार्गीपुनर्नवाग्नि दार्वीनिशा
दारुमहौषधानां॥ क्वाथोपीनियादरपाणिपादवक्त्राश्रितंहंत्यचिरेणशोफं १ अथत्रिफलादि॥ त्रिफलाक्वाथपानंहिमहिषीसर्पि
षासह॥ हंतिशोफंप्रमेहंचनाडीव्रणभगंदरं॥ अथसिंह्यास्यादि॥ सिंह्यास्यामृतभांटाकीक्वाथंकृत्वासमाक्षिकं॥ कृछ्रशोथजयेज्जं
तुःकासश्वासंज्वरंवमीं १ इतिक्वाथः॥ ॥ अथचूर्णानि॥ अपथपिप्पल्यादिचूर्णं॥ कृत्वाग्निविश्वघनजीरककंटकारीपाठानिशा
करिकणामगधाजटानां॥ चूर्णंकवोष्णसलिलेनविलोड्यपीतंनातःपरंश्वयथुलोगहरंनराणां १ अथगुडार्द्रचूर्णं॥ गुडपिप्पलिशुं
ठीनांचूर्णंश्वयथुनाशनं॥ आमाजीर्णप्रशमनंशूलघ्नंवस्तिशोधनं १ अन्यच्च॥ गुडात्पलत्रयंग्राह्यंचूर्णं॥ पुनर्नवादार्व्यमृता
पाठाविश्वश्वदंष्ट्रिका॥ रजन्यौद्वौरहस्तौचपिप्पल्यश्चित्रकंवृषः १ समभागानिसंचूर्ण्यगवामूत्रेणवापिबेत॥ बहुप्रकारंश्वयथुं
सर्वगात्रावसारिणं १ हंतिवाश्रुदराण्यर्शोव्रणांश्चैवोत्थितानपि २ अथविडंगादि विडंगदंतीकटुकात्रिरश्चित्रकदारवःव्योषः
सकृष्यात्रिफलासमादेयात्स्ययोरजः १ द्विगुणंतत्सितेचूर्णंपयसाशोफशातये २ अथगुडार्द्रकादियोगः॥ गुडार्द्रकंवागुडना
गरंवागुडाभयावागुडपिप्पलीवाकर्षाभिवृध्यात्रिफलाप्रमाणंस्यादेन्तरःपथ्यमथापिमासं १ शोफप्रतिश्यागलास्यरोगा
न्सश्वकासारुचिपीनसादीनं॥ जीर्णज्वरार्शोग्रहणीविकारानहन्यातथान्यानपिवातरोगान २ अथपुनर्नवादियोगः
॥ पुनर्नवामूलकदेवदारुछिन्नोद्भवाचित्रकमूलसिद्धाः॥ रसायवागूश्चपयांसियूषाःशोफेप्रदेयादशमूलगर्भाः १ अथक्षी
रं॥ क्षीरंशोफहरंदारुवर्षाभूनागरैःश्टतं॥ पेयंषाचित्रकंव्योषंत्रिवृद्दारुप्रसाधितं १ अथार्द्रकरसः आर्द्रकस्यरसःपीतःपुरा
णगुडमिश्रितः॥ अजाक्षीराशिनांशीघ्रंसर्वशोथहरोभवेत १ अथगोमूत्रमंडूरं॥ गोमूत्रसिद्धमंडूरंसुरभिरसभावितं॥ माण
कार्द्रकंदशबांरसेघपिचभावयेत १ त्रिफलाकटुचव्यानांचूर्ण्यपाणितलद्वयं॥ क्षिपेत्सुसिद्धंपाकेतुमधुनश्चपलद्वयं २ निहं
तिसर्वजंशोफंकसर्वांगंचविशेषतः॥ अत्रगोत्रेर्मूसिद्धंलोहमलंसंचूर्ण्यगोमूत्रबरादिना॥ आतपपरिभाव्यत्रिफलादिचूर्णं
द्विगुणमूत्रेणपक्तव्यं॥ इतिगोमूत्रमंडूरं॥ अथकंसहरीतकीपंचमूलस्यपचेत्कषायकंसेभयानांचशतंगुडाच्च॥ लेहेस्मसिद्धेचवि

नीयचूर्णं व्योषत्रिसौगंध्यमुपथितं च॥ १ प्रस्थार्धमात्रं मधुनः सुशीतं किंचिच्च चूर्णादपियावशक्तान्॥ येकाभयाप्राश्यततश्चले
ह्यशुक्तिर्निहंतिश्वयथुंप्रवृद्धं २ कासज्वरारोचकमेहगुल्मप्लीहत्रिदोषोदरपांडुरोगान्॥ कार्श्यमवातानसृगम्लपित्तवैवर्ण्य
मूत्रानिलशुक्रदोषान् ३ दशमूलस्यापि कंसः किंचिच्च कर्षपर्ययः॥ शर्करार्धपलंमात्रासान्निध्यान्मधुवापानं व्योषादर्भि
लितस्य च ४ दशमूलहरीतक्यनुल्यां कंसहरीतकी॥ मानं तेनात्र तत्रस्थां चरकेप्राह जेघठः ५ इति कंसहरीतकी॥ अथ दश
मूलहरीतकी॥ दशमूलकषायस्य कंसे पथ्याशतं गुडात्॥ तुलां पचेत्‌ लेन तत्र व्योषक्षारचतुःपलं १ त्रिजातं तु सुवर्णांशं प्रस्था
नू र्धं मधुनो हिमे॥ दशमूलहरीतक्याः शोफान्घ्नंति सुदुस्तरान् २ अथ पुनर्नवासवः पुनर्नवे द्वे तु पले सपाठा दंति गुडूचि सह
चित्रकेण॥ निदग्धिका च त्रिफला विपक्वाद्रोणावशेषे सलिले ततस्तं १ पूतार से द्वे च शतं पुराणं गुडं मधु प्रस्थयुतं सुशीतं॥
मासं निदध्याद्घृतभाजनस्थं पक्षेथवा नां परमश्वमासं २ चूर्णीकृतेरर्द्धपलांशकैस्तैर्हेमत्वगेलामरिचांबुपत्रैः॥ गंधान्वितं क्षौद्र
युतं प्रदिग्धं जीर्णे पिबेत्‌ व्याधिबलं समीक्ष्य॥ ३ हृत्पांडुरोगं श्वयथुं प्रवृद्धं प्लीहज्वरारोचकमेहगुल्मान्॥ भगंदराशीं जठरा
णि कासश्वासग्रहण्यामयकुष्ठकंडूः ४ शाखानिलं बद्धपुरीषतां च हिक्कां तु कासं च हलीमकं च॥ क्षिप्रं जयेद्वर्णबलायुरोजस्ते
जोन्वितो मांसरसाश्च भुक्ता ५ इति गदनिग्रहात् पुनर्नवासवः॥ अथ सर्वशोफे वासकासवः॥ वासकस्य तुले द्वे तु द्विद्रोणे तं
विपाचयेत्॥ द्रोणार्धशेषं तं ज्ञात्वा पूतं शीतं प्रदापयेत् १ गुडस्यैकां तुलां तत्र धातक्याश्च पलाष्टकं॥ क्षिप्त्वा चूर्णीकृतं तस्मि
न्त्वगेलापत्रकेसरं॥ कंकोलव्योषतोयानि पिप्पलिका न्युपकल्पयेत्॥ निदध्याद्घृतभांडे तु पक्षादूर्ध्वं ततः पिबेत् २ वासकास
वश्लेष्मसर्वश्वयथुनाशनः ४ इति वासासवः॥ अथ दार्व्यादियोगः॥ पिबेदुष्णांबुना दारु पथ्या शुंठी पुनर्नवा॥ विडंगातिविषा
वासा विश्वदारु षणानि च॥ वर्षाभूशृंगबेराभ्यां कल्कं वा सर्वशोफनुत्॥ १ अथ तक्रादियोगः॥ तक्रं पिबेद्वा गुरुभिन्नवर्चाः सव्यो ५२
षसौवर्चलमाक्षिकं च॥ विड्वातसंगे पयसा रसो वा प्रायुष्णमद्याद्गुरु बुलतैलं १ अथ पुनर्नवादिघृतं॥ पुनर्नवापत्रसमूलमूलं
संक्षुद्य तोयार्मणशेषसिद्धं॥ चतुर्थभागेन घृते विपक्वं प्रस्थं तु तत्कपलाष्टकेन १ संसेवितं वातबलासरोगान्सर्वांश्च शोफान्

321/1938

तिदुरांश्च॥ गुल्मोदरप्लीहगुदेद्भवांश्च निहंति वह्निं कुरुते पिपुसां २ अथ पंचमूलाद्यं तैलं॥ पंचमूलं सलवणं सरलं देवदारु च॥ हस्ति
कर्णिपलाशस्य फलानि निचुलस्य च १ पलाशं काकनासा च गुडूची देवपुष्पकं॥ अहिंस्राश्रेयसी हिंस्रा वसा गंधा पुनर्नवा २
कायस्था च वयस्था च दारु कोजटिला जटा॥ अलंबुषोरुबुकं च प्रपुन्नाटस्तनागरं ३ शिग्रु गोधाववनी भार्गितर्कारीपोष्करीजटा
॥ एतैः सिद्धं यथालाभं तैलमभ्यंजतैस्त्रिभिः ४ निहंत्युदीर्णश्वयथुं जंतोर्वातकफात्मकं ५ अथ शुष्कमूलकाद्यं तैलं॥ शुष्क
मूलकवर्षाभूदारुरास्नामहौषधैः॥ पक्वमभ्यंजनं तैलं समूलं शोफनाशनं॥ अथ सेकलेपस्वेदतानि॥ अथ पुनर्नवादिलेपः
॥ पुनर्नवा दारु शुंठी सिद्धार्थं शिग्रुमेव च॥ पिष्ट्वा चैवारनालेन प्रलेपः सर्वशोथजित्॥ अथ कृष्णादिलेपः कृष्णापुराण
पिण्याकशिग्रुकल्केः सिकतातसी॥ प्रलोपोमर्दने युंज्यात्सखोष्णो मूत्रकल्कितः॥ अथ दार्व्यादि॥ दारुगुग्गुलुशुंठीनाकल्कौ
मूत्रेण शोफजित्॥ गोमूत्रस्य च योगो वा क्षिप्रं श्वयथुनाशनं १ अथार्कादि॥ सेकस्तथार्कवर्षाभूनिंबक्वाथेन शोफजित्॥
गोमूत्रेणापि कुर्वीत सुखोष्णेनाव सेचनं १ सौवर्चलसमं घृष्टं सर्षपैश्च प्रलेपनं २ अथ न्यग्रोधादिलेपः॥ न्यग्रोधोदुंबरा
श्वत्थप्लक्षवेतसवल्कलैः॥ ससर्पिष्कैः प्रलेपः स्याच्छोफनिर्वारणः परः १ अथ गोधूमपोलिका॥ गोधूमकणिकायुक्ता निर्गुंडीप
त्रचार्णकः॥ पोलिका तिवलतैलेन युक्ता शोफविनाशनी १ अथ पुनर्नवादिस्वेदः॥ पुनर्नवाग्निनिर्गुंडीपलितैरंडजैर्दलैः
॥ सहाचरैजलं तप्तं तत्स्वेदः शोफहा मता १ अथ कुटजादिस्वेदः॥ कुरंटार्कशिरीषाणां विदलैरेरंडनिंबजैः॥ पत्रैर्युक्तं जलं त
प्तं न स्वेदो दुष्टशोफहृत् १ अथ विभीतकादिलेपः॥ विभीतकानां फलमध्यलेपः सर्वेषु दाहातिहरः प्रशस्तः॥ यष्ट्याह्वमुस्तैः
सकपित्थपत्रैः सचंदनैस्तत्सिटिकास्तुलेयः १ इति सेकलेपस्वेदनानि॥ अथ रसः॥ अथ शोफारिः॥ हिंगुलं जयपालं च मरी
चं टंकणं कणा॥ संमर्द्य वल्लः सघृतः सर्वशोफहरः परः १ अथ श्वयथुद्यातिरसः॥ रसगंधकलोहकणा त्रिवृता मरिचामर
दारु निशा त्रिफला॥ दलितं मृदुगोसलिलेन पिबेदनुरूपममुं श्वयथुदरघ्नं १ इति श्वयथुरसः॥ दयोस्तूदयमार्तंडो त्रैलोक्यं
दुंबरोथवा॥ अग्निकुमारको चात्र देयः शोफविनाशनः १ इति रसः॥ अथ पथ्यापथ्यविधिः॥ संशोधनं मस्त्रमोक्षः स्वेदः प्रलेपः प

विसेचनं ॥ पुरातनाः शालियवाः कुलित्थामुद्गाश्च गोधाश्चिराल्यकोपि ॥ भुजंगभुक्तित्तिरितांम्रचूडलावाह्वयोलं जांगलविष्किराश्च
॥ कर्मोपिश्टंगीश्चपुराणसर्पिस्तक्रं सुरामाक्षिकमासवश्च निष्पावकाठिल्लकरक्तशिग्रुरसोनकर्कोटकबालामूलं ॥ पुनर्नवंरुजन
कं पटोलं वेत्रामधात्रीफलमूलकानि ३ पुनर्नवाचित्रकपारिभद्रश्रीपर्णीनिंबेक्षुरपल्लवानि ॥ एरंडतैलंकटुकाहरिद्राऽहरीतकी
क्षारविषेवणाच ४ भल्लातकंगुग्गुलुपायसंचकटूनितिक्तानिचदीपनानि ॥ सूत्राणिगोमाहिषिसंभवानीकस्तूरिकाचापिशि
लाजतूनि ५ यत्पांडुरोगेष्वपिवह्निकर्मपुराप्रदिष्टंचतदेवचापि ॥ यथामलंपथ्यमिदंनिरुक्तंशोथामयान्सत्वरमुछिनत्ति ६ ग्रा
म्यानूपंपिशितलवणंशुष्कशाकंनवान्नंगोडंपिष्टंदधिसकृशरंनिम्ररंमधमम्लं ॥ धानावल्लूरमासंबहुनशनमथवाप्युर्वसासं
विदाहोस्वप्नंरात्रौश्वयथुगदरुन्वर्जयेन्मैथुनंच ७ अथदृदात्पथ्यापथ्यं ॥ पुराणयवशाल्यन्नंदशामूलोपसाधितं ॥ अल्पम
ल्पंकटुस्नेहंभोजनंशोफिनांहितं १ पिताम्नमुल्लंलवणानिमद्यंमृदंदिवास्वप्नमजांगलंच ॥ पयोगुडंतैलमथोगुरूणिशोफाजि
घांसुपरिवर्जयीत २ इतिशोफामयचिकित्सासमाप्तः ॥ ॥ ॥ अथवृद्धिनिदानं ॥ तस्यसंप्राप्तिमाह ॥ क्रुद्धस्वूर्ध्वगतिर्वायुः
शोथःशूलकरश्चरन् ॥ मुष्कौवंक्षणतःप्राप्यफलकोशाभिवाहिनीः १ प्रपीड्यधमनीर्वृद्धिंकरोतिफलकोशयोः २ वृद्धेःसंख्या
माह ॥ दोषास्रमेदोमूत्रांत्रैःसवृद्धिःसप्तधागदाः ॥ मूत्रांत्रजावप्यनिलाद्धेतुभेदस्तुकेवलः ३ वातजमाह ॥ वातपूर्णदृतिस्प
र्शोरूक्षोवातदरुतरुक् ॥ पित्तजमाह ॥ पक्वोदुंबरसंकाशःपित्तादाहोष्मपाकवान् ॥ ४ श्लेष्मजमाह ॥ कफच्छीतोगुरुःस्निग्धः
कंडूमान्कठिनोऽल्परुक् ॥ रक्तजमाह ॥ कृष्णःस्फोटकृतःपीतःवृद्धिर्लिंगश्चरक्तजः ५ मेदोजमाह ॥ कफवन्मेदमावृद्धुर्मृदुस्ता
लफलोपमः ॥ मूत्रजमाह ॥ मूत्रधारणशीलस्यमूत्रजःसंतुगच्छतः ६ अभोभिःपूर्णदृतिवत्क्षोभंयातिसरुङ्मृदुः ॥ मूत्ररुद्ध
मधःस्याद्वबलवत्फलकोशयोः ७ अंत्रजमाह ॥ वातकोपिभिराहारैःशीततोयावगाहनैः ॥ धारणेरणभाराध्वविषमांगप्र
वर्तनैः ८ क्षोभणैःक्षुभितोऽन्यैश्चक्षुद्रांत्रावयवंयदा ॥ पवनोविगुणीकृत्यस्वनिवेशादधोनयेत् ९ कुर्याद्वंक्षणसंधिस्थोग्रं
थ्याभंश्वयथुंतदा ॥ अथउपेक्षमाणांडवृद्धिः ॥ उपेक्ष्यमाणस्यमुष्कवृद्धिमाध्मानरुक्स्तंभयतीववायुः ॥ प्रपीडितोतःस्वनवा

न्प्रयातिप्रध्मापयन्नेतिपुनश्चयुक्तः १० असाध्यमाह ॥ यस्यांत्रावयवाश्लेष्मान्मुष्कयोर्वातसंचयात् ॥ अंत्रवृद्धिरसाध्योयंवातवि
द्धिसमागतिः ॥ रूक्षकृष्णारुणःसितस्तनुजालसमावृतः ११ प्रध्मानिदानंतुपाठांतरेपश्यति ॥ अत्यभिष्यंदिगुर्वामसेवनान्निचयंग
तः ॥ करोतिग्रंथिःवच्छोफंदोषोवंक्षणसंधिषु १२ ज्वरःशूलांगसादाढ्यंतंब्रध्ममितिनिर्दिशेत् १३ इतिवृद्धिनिदानं ॥ अथैतच
चिकित्सामाह ॥ अथवातवृद्धिचि० ॥ सक्षीरंवापिबेत्तैलंमासमेरंडसंभवं ॥ गुग्गुलुरुबुतैलंवागोमूत्रेणपिबेन्नरः ॥ वातवृद्धिंनि
हंत्याशुचिरकालानुबंधिनी १ अथपित्तवृद्धिमाह ॥ चंदनंमधुकंपद्ममुशीरंनीलमुत्पलं ॥ क्षीरपिष्टैःप्रदेहःस्यात्पित्तवृद्धिरुजापह
ः १ पंचवल्कलकल्केनसघृतेनप्रलेपनं ॥ पानंवापिकषायस्यपित्तवृद्धौप्रशस्यते २ अथकफवृद्धिचि० ॥ कफवृद्धौमूत्रपिष्टैरुष्ण
वीर्यप्रलेपनं ॥ पातव्योमूत्रसंयुक्तःकषायःपीतदारुणः १ त्रिकटुत्रिफलाक्वाथंसक्षारलवणांपिबेत् ॥ कफवातात्मकोपघ्नंविरे
कान्कफवृद्धिजित् २ अथरक्तवृद्धिचि० ॥ अविदाहिचभैषज्यंकर्तव्यंरक्तपैत्तिकैः ॥ सर्वपित्तहरंकार्यंरक्तजेरक्तमोक्षणं १ मुहुर्मु
हुर्जलौकभिःशोणितंरक्ततेहरेत् ॥ शीतमालेपनंसर्वंपाकेरक्ष्यःप्रयत्नतः २ त्रिवृतंप्रपिबेत्क्षौद्रंद्राक्षारसंसहितंमुहुः ॥ पित्तग्रंथि
क्रमंकुर्यादामेपक्वेचरक्तजे ३ अथमेदवृद्धिचि० ॥ स्विन्नमेदसमुत्थानलेपयेत्सुरसादिना ॥ शिरोविरेचयद्रव्यैःसुखोष्णैःमू
त्रसंयुतैः १ अथषट्पणगुग्गुलुः ॥ षट्पणंक्षौद्रसमंगुग्गुलुंगव्यसर्पिषा ॥ प्रयुक्तंकुप्यभुंजीतयथाग्निदिवसाननने १ कटुतिक्त
कषायाशीमेदोवृद्धिप्रणाशनं २ इतिमेदोवृद्धिः ॥ अथमूत्रजेंत्रवृद्धेच ॥ संस्वेद्यमूत्रप्रभावांवस्त्रखंडनवेष्टयेत् ॥ सीवन्याप
श्चतोधस्तात्विध्येद्व्रीहिमुखेनवै १ मुष्ककेशमगलंस्यामंत्रवृद्धौविचक्षणं ॥ वातवृद्धिक्रमंकुर्याद्दाहस्तत्राग्निनाहितः २ शंखो
परिचकर्णांतेत्यक्त्वासेवनिमादरात् ॥ व्यत्यासाद्वाशिरांविध्येदंत्रवृद्धिनिवृत्तये १ तेरमेरंडजंपीतंबलासिद्धंपयोन्वितं ॥ अध्मा
नश्लोपचितमंत्रवृद्धिंजयेन्नरः १ रास्नायष्ट्यमृतैरंडबलागोक्षुरसाधितः ॥ क्वाथोंत्रवृद्धिंहंत्याशुरुबुतैलेनमिश्रितः ॥ पिप्पली
जीरकंकुष्ठंबदरंशुष्कगोमयं ॥ कांजिकेनप्रलेपोयमंत्रवृद्धिविनाशनः १ देवदारुभिःशीवासायकलीमूलमेधवैःक्षौद्रयुक्तैश्चते
लैपावृद्धिमंत्रभवांजयेत् १ अथांडवृद्धिचि० ॥ तैलंनारायणंयोज्यंपानाभ्यंजनवस्तिषु ॥ गोमूत्रैरंडतैलाभ्यांरसवांधककज्जली ॥

323/1936

यो॰र॰ ।पीत्वा निहंति सहसा वृद्धिं वृषणसंभवां ॥ फलत्रिकोड्डंबंक्वाथं गोमूत्रेणैव पाचयेत् २ वातश्लेष्मकृतं हंति शोथं वृषणसंभवं ॥ पू
श्लाक्ष्वीजश्शुंठीनां निर्गुंडीनां मिथः समैश्चूर्णैः ॥ घृतमधुसहिता पिंडी नक्षमेते मुष्कवृद्धिमकथा १ वचासर्षपकल्केन प्रलेपः शोफ
नाशनः ॥ दार्वीचूर्णं गवांमूत्रैर्निपीतं मुष्कवृद्धिजित् १ अद्रकस्यरसः क्षौद्रयुक्तो वृषणवातजित् ॥ अथ सामान्यविधिः ॥ अथ
१५६१ मांस्यादिघृतं ॥ मांसीकुष्टं पत्रकैलारास्नाश्रृंगीच चित्रकं ॥ कृमिघ्नमश्वगंधा च शैलेयं कुटुरोहिणी १ सैंधवं तगरं चैव कुटजाति
विषैः समैः ॥ येतैश्च कर्षिकैः कल्कैर्घृतप्रस्थं विपाचयेत् १ वृषमुंडितकैरंडनिंबपत्रभवं रसं कंटकार्याश्चापि दुग्धं प्रस्थात्प्रस्थं
विनिक्षिपेत् १ सिद्धमेतद्घृतं पीतं मंत्रवृद्धिंव्यपोहति ॥ वातवृद्धिपित्तवृद्धिमेदोवृद्धिस्तथापि वा १ मूत्रवृद्धिं च हंत्येतत्सर्पिरस्य
नसंशयः ॥ इति मांस्यादिघृतं ॥ अथ पुनर्नवादितैलं ॥ पुनर्नवामृता दारु सक्षारलवणात्रयं ॥ कुष्टं सठी वचा मुस्तं रास्ना कड्डल
पुष्करं १ यवानी हपुषा हिंगु शताह्वा चाजमोदका ॥ विडंगातिविषायष्टी पंचकोलकसंयुतैः २ येतैः कल्कसमैरक्षैस्तैलप्रस्थं विपा
चयेत् ॥ गोमूत्रं द्विगुणं देयं कांजिकं च तथैव च ३ पुनर्नवाद्यमेतत्तु वस्तौ पाने तथोत्तमं ॥ कद्रूरुस्थमेंद्रमुकुक्षौ च वृषणाश्रितं ॥
४ कफवातोद्भवं ॥ शूलं मंत्रवृद्धिविनाशनं ५ इत्यांत्रवृद्धिचि॰ ॥ अथ वर्ध्मरोगचि॰ ॥ मूलं बिल्वकपित्थयोररलुकस्याथ बृहत्यो
र्द्वयोः ॥ श्यामापूतिकरंजशिग्रुकतरोर्विश्वौषधारुष्करं ॥ कृष्णाग्रंथिकवेल्लपंचलवणं क्षाराजमोदान्वितं पीतं कांजिककोष्णतो
यमथितैश्चूर्णीकृतं वर्ध्मजित् १ इति बिल्वादिचूर्णं ॥ भयश्चैरंडतैलेन कल्कः पथ्या समुद्भवः ॥ कृष्णासैंधवसंयुक्तो वर्ध्मरोगहरः
परः १ श्वदंष्ट्रासिंधुविश्वान्ददारुकृमिहरासमभित् ॥ लोध्रचूर्णं घृते मध्वा द्वात वर्ध्महरं परं ॥ सैंधवं मदनं कुष्टं शताह्वा निचूलं वचा
॥ ह्रीबेरं मधुकं भार्गीं देवदारु सनागरं १ कट्फलं पौष्करं मेदा चविका चित्रकं सटी ॥ विडंगातिविषाश्यामा हरेणु नीलिनी स्थिरा २
बिल्वाजमोदा रास्ना च दंती कृष्णा च तैः समैः ॥ साध्यमैरंडजं तैलं वा कफवातनुत् ३ वर्ध्मोदावर्तगुल्मार्शः प्लीहमेहाढ्यमारुता ५६१
न् ॥ आनाहमश्मरीं चैव हन्यात्तदनुवासनात् ४ इति सैंधवादितैलं ॥ अजाजी हपुषा कुष्टं गोमयं बदरान्वितं ॥ कांजिकेन तु संपि
ष्टं कुर्याद्वर्ध्मप्रलेपनं १ सद्योमृतस्य काकस्य मलेन परिलेपनात् ॥ वर्ध्मयोग प्रयात्याशु रविणा तिमिरं यथा १ पक्वे त्वदारुणं कृत्वा

325/1936

कर्तव्या व्रणक्रिया ॥ इति मुष्कवृद्धिवर्ध्मचि॰ ॥ अथ कुरंडचि॰ ॥ यः पित्तदोषेण कुरंडरोगो भवेच्छिरोर्दक्षिणमुष्कभागे ॥ तस्योर्ध्वभा
गश्च व्रणस्य विद्धे ह्यामस्य नाम प्रभवे परस्य १ अथैरंडतैलाद्यौ दि॰ ग॰ ॥ येरंडतैलसंमिश्रं कांसिसं सैंधवं पिबेत् ॥ वस्त्रेण वृषणं
बद्धं कुरंडज्वरनाशनं १ अथेंद्रवारुण्यादि ॥ इंद्रवारुणिकामूलं तैलं पुष्करजं तथा ॥ संमर्द्य च सगोदुग्धं पिबेज्जंतुकुरंडजे १
अथ सैंधवादिप्रलेपः ॥ संचूर्णितं सैंधवमाज्ययुक्तं समर्द्य तोयस्थितमेव सोष्णं ॥ मुहुर्मुहुर्यः कुरुते प्रलेपं विलीयते तस्य
कुरंडरोगः १ इति सैंधवादि ॥ गवां घृतेन संयुक्तं क्षिपेत्सैंधवचूर्णकं ॥ पिबेत्सप्तदिनं यावत्तावल्लेपः कुरंडजे १ तंदुलवारिवि
मिश्रं घृतपुरसंज्ञं कुर्याद्दुच्यते लोके ॥ तन्मूलपिष्टं लेपं कुरंडगलगंडयोः कुर्यात् १ इश्वरीमूलमेरंडमूलं मूषककर्म वा ॥ प्रले
पस्या कुरंडानां रोगविच्छेदकारकः १ रूपेपिष्टं ब्राह्मणयष्टिकायाः मूलं समं तंदुलधावनेन ॥ निहंति लेपाद्गलगंडमालां कुरं
डमुख्यानखिलान्विकारान् १ वातारितैलमर्दितं स्फुरवाणिजं मूलं नरः पिबति यो मसृणाविचूर्णं पिगव्ये निधायमसी त्रिदिना
वसाने ॥ तस्य प्रणश्यति कुरंडकृतो विकारः ॥ गोमूत्रं सिद्धं रुबुतैलभृष्टं ॥ हरीतकी सैंधवचूर्णयुक्तां खादेन्नरः कोष्णजलानुपा
नान्निहंति हरंडमतिप्रवृद्धं १ शंबुकोदरनिहितं गव्यं सप्ताहमातपे सर्पिः ॥ स्थितमपहरति कुरंडं सैंधवचूर्णान्वितं लेपात्
१ इति कुरंडचिकित्सा ॥ अथ पथ्यापथ्यं ॥ संशोधनं वस्तिमसृग्विमोक्षः स्वेदप्रलेपारुणशालयश्च ॥ येरंडतैलं सुरभिजलं
च धन्वामिषं शिग्रुफलं पटोलं ॥ पुनर्नवा गोक्षुरकाग्निमंथ तांबूलपथ्यारसनारसोनं ॥ बालं च पूगं गंजनं मधूनि कौंभं घृतं तप्त
जलं च तक्रं २ अधं दुवद्धक्षणयोश्च दाहो व्यत्यासतो बाहुशिराव्यधश्च ॥ यथामयं शास्त्रविधिश्च वर्गः स्याद्वर्ध्मवृद्ध्यामयिना
मभिवाः ३ अथ वर्ज्यं दात ॥ वेगाहतं तुरगयानं व्यायामं मैथुनं तथा ॥ अत्याशनमथाध्वानमुपवासं परित्यजेत् १ इति मुष्कांत्रवृद्धि
कुरंडचिकित्सा समाप्तः ॥ ॥ अथ गलगंडगंडमालापचीग्रंथ्यर्बुदानां निदानं ॥ ॥ अथ गलगंडनिदानं ॥ ॥ तस्य सा
मान्यलक्षणमाह ॥ निबद्धः श्वयथुर्यस्य मुष्कवल्लंबते गले ॥ महान्वयादिवा ह्रस्वो गलगंड समादिशेत् १ उक्तं भोजे ॥ महांतं
शोथमल्पं वा हनुमन्यागलाश्रयं ॥ लंबंतं मुष्कवत्दृष्ट्वा गलगंडं विनिर्दिशेत् १ तस्य संप्राप्तिमाह ॥ वातः कफश्चापि गले प्रदु

श्रेमन्ये तु संश्रित्य तथैव मेदः ॥ कुर्वंति गंडकमशः स्वलिंगैः समन्वितं तं गलगंडमाहुः ॥ २ तत्र वातिकमाह ॥ तोदान्वितः कृष्णशिरावन
द्धः श्यावारुणो वापि वातात्मकस्तु ॥ पारुष्ययुक्तश्चिरवृद्धिपाकी यदृच्छया पाकमियात्कदाचित् ॥ वैरस्यमास्यस्य च तस्य जंतोर्भवेत् तथा
तालुगलातिशोषः ३ श्लेष्मिकमाह ॥ स्थिरः सवर्णोऽल्परुगुग्रकंडूः शीतो महांश्चापि कफात्मकस्तु ॥ चिराभिवृद्धिं भजते चिराद्वा
प्रपच्यते मन्दरुजः कदाचित् ४ माधुर्यमास्यस्य च तस्य जंतोः भवेत्तथा तालुगलप्रलेपः ५ मेदोजमाह ॥ स्निग्धो गुरुः पांडुर
निष्टगंधो मेदःकृतः कंडुयुतोऽल्परुक् च ॥ प्रलंबतेऽलाबुवदल्पमूलो देहानुरूपः क्षयवृद्धियुक्तः ६ स्निग्धास्यता तस्य भवेच्च
जंतोर्गलेनुशब्दं कुरुते च नित्यं ॥ तद्असाध्यत्वमाह ॥ कृच्छ्राच्छ्वसंतं मृदुसर्वगात्रं संवत्सरातीतमरोचकार्तं ॥ क्षीणं च वैद्यो गलगंडयुक्तं
भिन्नस्वरं चापि विवर्जयेच्च ७ स्थानतुल्यतया गलगंडमालमिहैवाह ॥ कर्कंधुकोलामलकप्रमाणैः १ कक्षांसमन्यागलवंक्षणेषु
॥ मेदःकफाभ्यां चिरमंदपाकैः स्याद्गंडमाला बहुभिश्च गंडैः १ यदाह भोजः ॥ वातपित्तकफास्तद्वन्मेदश्चापि समन्वितं ॥ जंघयोः कं
डरां प्राप्य मांस्यांऽसदृशान्बहून् १ कुर्वंति ग्रंथितां तेभ्यः पुनः प्रकुपितोऽनिलः ॥ तान् दोषानूर्ध्वगो वक्षः कक्षामन्यागलाश्रितः
२ नानाप्रकारान्कुरुते ग्रंथींस्तास्त्वपचीइव ॥ अपचीं कंठमन्यासु कक्षावंक्षणसंधिषु ३ गंडमालां विजानीयादपचीतुल्यलक्ष
णं ४ गंडमालातुल्यतया अपचीमाह ॥ ते ग्रंथयः केचिदवाप्तपाकाः स्रवंति नश्यंति भवंति चान्ये ॥ कालानुबंधं चिरमादधाति
सैनपचीति प्रवदंति केचित् १ तस्याः साध्यासाध्यत्वमाह ॥ साध्याः स्मृताः पीनसपार्श्वशूलकासज्वरच्छर्दियुतास्त्वसाध्या २
अपचीरूपगुणतया ग्रंथिकामाह ॥ वातादयो मांसमसृक् प्रदुष्टाः संदूष्य मेदश्च तथा सिराश्च ॥ वृत्तोन्नतं विग्रथितं तु शोथं कुर्वं
त्यतो ग्रंथिरिति प्रदिष्टः १ वातिकमाह ॥ आयम्यते वृश्च्यति तुद्यते च प्रत्यस्यते मथ्यति भिद्यते च ॥ कृष्णो मृदुर्वस्तिरिवाततश्च
भिन्नः स्रवेच्चानिलजोऽस्रमच्छं २ पैत्तिकमाह ॥ दंदह्यते धूप्यति चूष्यते च पापच्यते प्रज्वलतीव चापि ॥ रक्तः सपीतोऽप्यथवापि
पित्ताद्भिन्नः स्रवेदुष्णमतीव चास्रं ३ श्लेष्मिकमाह ॥ शीतो विवर्णोऽल्परुजोऽतिकंडुः पाषाणवत्संहननोपपन्नः ॥ चिराभि
वृद्धिश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनं च पूयं ४ मेदोजमाह ॥ शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महान्कंडुयुतोऽल्परुक् च

327/1936

॥ मेदः कृते गच्छति चात्र भिन्ने पिण्याकसर्पिःप्रतिमं च मेदः ५ उक्तं च भोजे ॥ मेदो वायुर्यदा मांसे तितिक्षिपेद्व्यवायिचि ॥ तत्र मेदो
भवो ग्रंथिः स्याद्वा भवति पांडुरः १ कृष्णः कृष्णो महान् स्थूले ग्रंथिश्छिन्नश्च पीडितः ॥ तिलकल्कनिभः स्रावो घृतवच्चास्य जायते
२ शिराजो ग्रंथेः संप्राप्तिमाह ॥ व्यायामजातैरबलस्य तैस्तैराक्षिप्य वायुस्तु शिराप्रतानं ॥ संकोच्य संपीड्य विशोष्य चापि ग्रंथिं
करोत्युन्नतमाशु वृत्तं १ ग्रंथिः शिराजः स तु कृच्छ्रसाध्यो भवेद्यदि स्याच्च रुजश्चलश्च ॥ तस्याः साध्यत्वमाह ॥ सचारुजश्चाप्यबलो
महांश्च मर्मोत्थितश्चापि विवर्जनीयः २ उक्तं भोजेन ॥ पंचैतान्रुजो ग्रंथीन्मर्मजानबलांस्त्यजेत् ॥ कपोलगलमन्यासु दुश्चि
कित्स्याश्च संधिषु १ अथार्बुदान्याह ॥ तस्य संप्राप्तिमाह ॥ गात्रप्रदेशे क्वचिदेव दोषाः समूर्छिता मांसमसृक्प्रदूष्याः वृत्तं स्थिरं मं
दरुजं महांतमनल्पमूलं चिरवृद्ध्यपाकं ॥ कुर्वंति मांसोछ्रयमत्यगाधं तदर्बुदं शास्त्रविदो वदंति २ तस्य संख्यामाह ॥ वातेन पि
त्तेन कफेन चापि रक्तेन मांसेन च मेदसा च ॥ तज्जायते तस्य च लक्षणानि ग्रंथेः समानानि सदा भवंति ३ रक्तार्बुदमाह ॥ दोषाः प्र
दुष्टाः रुधिरं शिराश्च संकुच्य संपीड्य ततस्त्वपाकं ॥ सास्रावमुन्नह्यति मांसपिंडं मांसांकुरैराचितमाशुवृद्धिं ४ कुर्वंत्यजस्रं रुधिर
प्रवृत्तिमसाध्यमेतद्रुधिरात्मकं तु ॥ रक्तक्षयोपद्रवपीडितत्वात्पांडुर्भवेदर्बुदपीडितस्तु ५ मांसजस्य संप्राप्तिमाह ॥ मुष्टिप्रहा
रादिभिरर्दितेंगे मांसं प्रदुष्टं जनयेत्तु शोथं ॥ अवेदनं स्निग्धमनन्यवर्णमपाकमश्मोपममप्रचाल्यं ६ प्रदुष्टमांसस्य नरस्य गा
ढमेतद्भवेन्मांसपरायणस्य ७ अस्य असाध्यत्वमाह ॥ मांसार्बुदं त्वेतदसाध्यमुक्तं ॥ अस्य साध्येष्वपि असाध्यप्रकारानाह ॥
साध्येष्वपीमानि विवर्जयेत्तु ॥ संप्रस्रुतं मर्मणि यच्च जातं स्रोतःसु वा यच्च भवेदचाल्यं ८ अध्यर्बुदलक्षणमाह ॥ यज्जायतेन्यत्ख
लु पूर्वजाते ज्ञेयं तदध्यर्बुदमर्बुदज्ञैः ॥ यद् द्वंद्वजातं युगपत्क्रमाद्वा द्विरर्बुदं तच्च भवेदसाध्यं ९ उक्तं भोजेन ॥ अर्बुदे त्वर्बुदं जातं
द्वंद्वजं चानुजं च यत् ॥ द्विरर्बुदमिति ज्ञेयं तच्चाऽसाध्यं विनिर्दिशेत् १ अर्बुदानामपाकमाविष्कर्तुमाह ॥ न पाकमायांति कफाधिक
त्वान्मेदोबहुत्वाच्च विशेषतस्तु ॥ दोषास्थिरत्वाद्ग्रथनाच्च तेषां सर्वार्बुदान्येव निसर्गतस्तु १० इति गलगंडमालाग्रंथ्यर्बुदा
निदानं ॥ अथ क्रमे चिकित्सामाह ॥ अथ गलगंडचिकित्सा ॥ स्वेदोऽनिलोत्थे गलगंडमादौ नाड्यानिलघ्नौषधपत्रपिंडैः । स्वेदैः प

यो०र०
१५६३

नाहोकफसंभवेपिरुत्वाकमंश्लेष्महरंविदध्यात् १ अथवातगंडे॥ निचुलंशिग्रुमूलानिदशमूलमथापिच॥ आलेपनंवा
तगंडेस्तस्वोष्णंसंप्रशस्यते १ अथकफगंडे॥ देवदारुविशालांचकफगंडप्रलेपनं॥ छर्दनंशीर्षरेकश्वसर्वरेचनिकोहितः १
अथमेदगंडे। मेदःसमुत्थेत्रयथोपदिष्टंविधेछिरांस्निग्धतनोनरस्य॥ श्यामामृधालोहपुरीषदंतीरसांजनैश्चापिहितंः
प्रलेपः १ अथसामान्ययोगः॥ तंदुलोकदपिष्टेनमूलेनपरिलेपितः १ महिषीमूत्रविमिश्रंलोहमलंसंस्थितंघटमासं॥
अंतधूमविदग्धंमधुनागलगंडनाशनंलीढं १ स्वर्णावतसेनाभ्यांगलगंडोपनाशनं॥ स्फोटास्रावैःशमंयातिगलगंडोन
संशयः सर्षपाःशिग्रुबीजानीशणबीजातसीयवाः॥ मूलकस्यचबीजानितक्रेणाऽम्लेनपेषयेत् १ गंडानिग्रथयश्चैवगं
५ डमालास्तथैवच॥ लेपनात्तेनशाम्यंतिविलयंयतिवाचिरात् १ जीर्णकर्कारुकरसोबिडसैंधवसंयुतः॥ तस्यनस्येनतरुणंहंतिगलं
गंडंनसंशयः १ श्वेतापराजितामूलंप्रातःपिष्टापिबेन्नरः॥ सर्पिषाबियताहारोगलगंडप्रशांतये॥ १ तिक्तालांबुफलेपक्वेस
प्ताहमुषितंजलं॥ गलगंडंविहंत्याशुपानात्पथ्यानुशीलिनः १ अथाऽमृतादितैलं॥ तैलंपिबेच्चामृतवल्लिनिंबहिंस्राभ
याश्वक्षकपिप्पलीभिः॥ सिद्धंबलाभ्यांसचदेवदारुहिताय नित्यंगलगंडरोगे १ अथतुंबीतैलं॥ विडंगक्षारसिंधूत्थरा
स्नाग्निव्योषदारुभिः॥ कटुतुंबीफलरसेकटुतैलंविपाचितं १ चिरोत्थमपिनस्येनगलगंडंविनाशयेत् २ अथवेधविधिः
॥ जिह्वाधापार्श्वयोमूलाछिराद्वादशताकीर्तिताः तासांस्थूलशिरेद्वेचछिंद्यात्तेनशनैः॥ विडिशेनैवसंगृह्यकुशपत्रे
णबुद्धिमान्॥ कृतेरक्तेच्छ्रयोतस्मिन्दद्यात्सगुडमार्द्रकं २ भोजनंचामभिष्यंदियूषंकौलित्थमिष्यते॥ यवमुद्गपटोलादिक
टुरुक्षंतुभोजनं॥ ३ छर्दिस्वरक्तमुक्तिंचगलगंडेप्रयोजयेत्॥ इतिगलगंडचिकित्सा॥ अथगंडमालाऽपचिचिकित्सा॥ ब्रह्म १५६३
दंडीयमूलंतुपिष्टंतंदुलवारिणा॥ स्फुटितांहंतिलेपेनगंडमालांनसंशयः १ निजद्रवेणसंपिष्टंमंडीमूलंप्रलेपयेत्॥ गंडमा
लाक्षयंयातितद्रवंचपिबेत्पलं १ कांचनारत्वचःक्वाथःशुंठीचूर्णेननाशयेत्॥ गंडमालांतथाक्वाथःक्षौद्रेणवरुणत्वचः
१ जलेनपेषयेत्तुल्यंकांचनीचित्रकंविषं॥ समाहृत्लेपयद्यस्ययादिस्याद्गंडमालिका १ स्फुटंतिनात्रसंदेहोस्फोटलेपमिदं

329
1936

कुरु॥ अश्वघ्नशिफपिष्ट्वासम्यक्तंदुलवारिणा॥ तेननस्यप्रलेपाभ्यांगंडमालांसमुद्धरेत् २ फलत्रिकाद्योगुग्गुलुर्गुटिका॥ पटप
लंत्रिकटुंकत्रिफलाचफलत्रयं॥ कांचनारत्वचाचूर्णंयोजयेद्द्वादशाफलं १ गुग्गुलुंसर्वतुल्यंसर्पमेकत्रकुट्टयेत्॥ क्षौद्रंपलशतंदेयंगु
टिकांकर्षसंमितां २ भक्षयेद्गंडमालार्तोगलग्रंथिंचनाशयेत् ३ अथकांचनारगुग्गुलु॥ पलानांदशकंग्राह्यंकांचनारत्वचोबुधैः
षट्कलात्रिफलाग्राह्याव्योषंग्राह्यंपलत्रयं १ पलैकंवरुणस्यापित्वगेलापत्रकंतथा॥ कर्षकर्षमितंग्राह्यंसर्वाण्येकत्रचूर्णयेत् २
सर्वचूर्णमिदंयावत्तावन्मात्रस्तुगुग्गुलुः॥ संमर्द्यगुटिकाकार्याशाणमात्रास्ततोबुधः ३ एकैकंभक्षयेत्प्रातःबुधिमांश्चसदा
नरः॥ गंडमालांजयेदुग्रामपचीमर्बुदानिच॥ ग्रंथीन्व्रणांसगुल्मांश्चकुष्ठानिचभगंदरं॥ अनुपानेप्रयोक्तव्यःक्वाथोमुंडीसमुद्भ
वः ५ क्वाथोवाखदिरस्याथपथ्याक्वाथोथवोत्पकः॥ अथाऽजमोदादितैलं॥ अजमोदाचसिंदूरंहरितालंनिशाद्वयं॥ क्षारद्व
यंफेनपुतंसार्धंकंसरलोद्भवं १ इंद्रवारुण्यपामार्गकदलिकंदकैःसमैः॥ एभिःसार्षपकं तैलंमजामूत्रास्ययोजितं॥ मृद्वग्नौ
पाचयेदेतत्स्नुगर्कक्षीरमुत्तमं॥ अजमोदादिकंतैलंगंडमालांव्यपोहति २ आमांविदग्धांतुपक्वांचैवविशोधयेत्॥ रोपयं
मृदुभावंचतैलेनानेनकारयेत् ३ अथनिर्गुंडीतैलं॥ निर्गुंडीस्वरसेनाथलांगलीमूलकल्कितं॥ तैलंनस्येनहंत्याशुगंडमा
लांसुदुस्तरां १ अथछुछुंदरीतैलं॥ छुछुंदर्याविपक्वंतुक्षणातैलंवरंध्रुवं॥ अभ्यंगान्नाशयेन्नृणांगंडमालांसुदारुणं १ अथ
गुंजातैलं॥ गुंजामूलफलैस्तैलंतोयंद्विगुणितंपचेत्॥ तस्याभ्यंगेवनशमयेद्गंडमालांसुदारुणं १ अथगंधकादियोगः॥ गंधकंटं
कणांसिंधुकांचनीनवसारकं॥ सौवर्चलंयवक्षारंकाचंरक्तंसुवर्चलं १ शीतरक्तंचपाषाणंमुषकोत्थंनियोजयेत्॥ जेपालबीजम
त्राचसमंजंबीरपीडीतं २ शलाकिस्त्वाप्रदातव्यंवेष्टमेरुडपत्रकैः॥ एवंग्रहात्स्फुटंसेतदध्यंत्वंबधयेत्ततः ३ गंडमालापचीग्रं
थिबहिर्निर्यातिनान्यथा॥ अभिमंत्र्यसितंसायंरवौप्रातःसमाहरेत् ४ पटारीमूलकंधूपयित्वाथखंडयेत्॥ चतुर्दशगुणैःसूत्रै
र्बध्वाग्रंथिंगलेस्थितां ५ मंत्रः॥ ॐ गुडग्रसाहितिरितिरीचित्रपुटकुभुंगनांगतेपापटगालापरद्गाम्रूलवासुकालदेपालदेरंगु
रुप्रसादात्॥ अथगंधकादिलेपः॥ गंधकंसूतकंतुल्यंअर्कक्षीरंससैंधवं॥ पिष्ट्वाचकांचनीमूलेलेपोयंगंडमालिके १ अथजेपा

लपत्रवटी॥ पिष्टा जेपालपत्राणि स्वरसेन ततो वटी॥ छायाशुष्कां ततो लेपाद्गंडमाला विनश्यति १ अथ भल्लातकासीसकुताग्निदंती
मूलं गुडं स्नुकरवि दुग्धदिग्धैः॥ लेपाच्चितैर्गलतिगंडमाला समीरवेगादिव मेघमाला १ अथ गंडमालाकंडनो रसः॥ कर्षसूतं
शुद्धमस्य गंधकं स्वर्धमुनमं॥ सार्धकर्षताम्रभस्म मृतं किट्टं त्रिकर्षकं १ व्योषं षट्कर्षतुलितमक्षार्धं सैंधवं सितं॥ कांचनारी
त्वचश्चूर्णं पलत्रयमितं क्षिपेत् २ पलत्रयं गुग्गुलोश्च शुद्धस्य प्रमुपाहरेत्॥ एतद्युक्त्या तु समेल्य सुरभीसर्पिषा दृढं ३ गंडमा
लाकंडनो यं रसो माषत्रयात्मकः॥ भुक्तो निहंति गंडानि गंडमालां च दारुणां ४ इति गंडमालाचिकित्सा॥ अथापची॥ अलंबु
षायाः स्वरसः पीतो द्विपलमात्रया॥ अपचीगंडमालानां कामलाश्वासनाशनः १ वनकार्पासिका मूलं तंडुलैः सह योजितं॥
पक्वा च पोलिकां खादेदपचीनाशनाय च १ सोभांजनं देवदारु कांजिकेन तु पेषितं॥ कोष्णं प्रलेपतो हन्यादपचीमतिदुस्तरां १
सर्षपारिष्टपत्राणि दग्ध्वा भल्लातकैः सह॥ छागमूत्रेण संपिष्टमपचिघ्नं विलेपनं १ अश्वत्थकाष्ठानि चुलंगवां दंतं वदाहयेत्
वराहमज्जसंयुक्तं भस्म हंत्यपचीव्रणात् १ मणिबंधोपरिष्टाद्वा कुर्याद्रेखात्रयं भिषक्॥ अंगुलांतरितं सम्यगपचीविनिवृ
त्तये १ अथ चंदनादितैलं॥ चंदनं साभया लाक्षा वचा कटुकरोहिणी॥ एत तैलं शृतं पीतं समूलामपचीं जयेत्॥ अथ व्योषाद्यं
तैलं॥ व्योषं विडंगं मधुकं सैंधवं देवदारु च॥ तैलमेभिः शृतं नस्यात्कृच्छ्रामप्यपचीं जयेत् १ अत्यपची चि०॥ इति गंडमालापची
चिकित्सा॥ अथ ग्रंथिचिकित्सामाह॥ ग्रंथिष्वामेषु कुर्वीत भिषक् शोथप्रतिक्रियां॥ पक्वानापद्य संशोध्य रोपयेद्व्रणभेषजैः
१ हिंस्रा सरोहिण्यमृता थ भार्गीश्योनाकबिल्वागरु कृष्णगंधा॥ गोमूत्रपिष्टा सहता लपत्र्या ग्रंथौ विधेयो निलजप्रलेपः
१ जलायुकाः पित्तकृते हिताः स्युः क्षीरोदकाभ्यां परिषेचनं च॥ द्राक्षारसेनेक्षुरसेन वापि चूर्णं पिबेद्वापि हरीतकीनां १ मधूकं
जंब्वार्जुनवेतसानां त्वग्भिः प्रदेहानवचारयेच्च॥ हृतेषु दोषेषु यथानुपूर्व्यं ग्रंथौ भिषक् श्लेष्मसमुत्थितेषु १ असम्यजातं शम
मप्रयातं ततः कामेनापहेत् द्विचार्यः॥ देहस्थितेवास सिसिस्य कर्म सद्यः क्षतेक्तं चविधिं विदध्यात्॥ शस्त्रेण वोत्पाद्य रूपकं
माश्रु प्रक्षालयेत्स्वथ्यतमैः कषायैः॥ संशोधनैस्तं च विशोधमेतु क्षारोत्तरैः क्षौद्रघृतप्रगाढैः १ सिचेच्च तैलं त्वपवारणीयं

331/1936

विडंगपाठारतनीविपक्वं॥ मेदःसमुत्थे तिलकल्कदिग्धैः कृत्वोपरिष्टाद्द्विगुणं पटांतं १ हृतात तेन मुहुः प्रमृज्याल्लेहेन धीमान्
नववह्निताप॥ प्रलिप्तदर्व्यात्वथ लाक्षया वा प्रतप्तया स्त्रोतनमस्य कार्यं १ निपात्य वा शस्त्रमपोह्य मेदो देहस्य कां वा विदा
र्य॥ प्रक्षाल्य मूत्रेण तिलैः सुपिष्टैः स्रुवर्चला श्यैर्हरितालमिश्रैः १ ससैंधवैः क्षारघृतप्रगाढैः क्षारोत्तरैरेनमभिप्रशोध्य॥ तैलं वि
दध्याद्धिकरंजगुंजावंशावलेपि गुदमूत्रसिद्धं १ इति राजमार्तंडात्॥ वृश्चिकांता चपेटारी कांजिकेन संपीषता॥ कालस्फो
टं हरल्लेपादुष्टग्रंथिषु का कथा १ पुत्रजीवस्य मज्जा या जले पिष्ट्वा प्रलेपयेत्॥ कालस्फोटं सद्यो हन्यात्सवेदनं १ कक्षाग्रंथिं
कर्णग्रंथिं गलग्रंथिं च नाशयेत्॥ राजिका लशुनं पथ्यलेपो हृद्गलग्रंथिकाः॥ गंधार्क दुग्धता लेनजेपालेन च नाशयेत्॥ इति
ग्रंथिचिकित्सा॥ अथार्बुदचिकित्सामाह॥ ग्रंथ्यर्बुदानां च यतो विशेषः प्रदेशहेत्वाकृतिदोषदूष्यैः॥ ततश्चिकित्सेद्भिषगर्
बुदानी विधानविद् ग्रंथिचिकित्सितेन १ वातार्बुदं क्षीरघृताम्लसिद्धैः रुष्णोसतैलैरुपनाहयेत्तु॥ कुर्यात्तु मुख्यान्युपनाहनानि
सिधेश्च मांसैरथ वसवा... ः २ स्वेदं विदध्यात्कुशलस्य नाड्या शृंगेण रक्तं बहुशो हरेच्च॥ वातघ्नि निर्यूहपयोम्लभागैः सि
द्धं शतं क्रांत्रिवृतां पिबेद्वा ३ स्नेहोपनाहो मृदवस्तु पथ्याः पित्तार्बुदे काथविरेचनं च॥ विकृष्य सोदुंबरशाकगोजीपत्रैर्भृ
शं क्षौद्रयुतैः प्रलिंपेत् ४ शुद्धस्य जंतोः कफजेऽर्बुदे च रक्तेऽवसिक्ते स्त्रवतोऽर्बुदं यत्॥ मेदः कृतेमांस हते पिकार्यं व्रणादितं
सर्वचिकित्सितं च ५ इति राजमार्तंडात्॥ लिप्तं यवक्षारविडंगबीजं गधोपलैः स्यान्मसृणी कृतेर्यत्॥ रक्तेन मिश्रैः सरट
स्य सद्यस्तदर्बुदं शाम्यति नान्यथेतत् १ उपोदकरसाभ्यक्तानतस्तत्र परिवेष्टिता॥ प्रणश्यत्यसचिराल्लवणां पिटिकार्बुदजात
या १ उपोदकां कांजिकतक्रपिष्टां तयोपनाहो लवणेन सार्धं॥ दृष्टोऽर्बुदानां प्रशमाय केचिद्दिने दिने रात्रिषु भर्जितानां १
गंधः शिलाविश्वोषधविडंगनागभस्मभिः समैश्चूर्णं॥ कृकलासरक्तयुक्तं लेपात्सद्योऽर्बुदं ध्वंसि १ स्नुही गंडीरका स्वेदो नाश
येदर्बुदानि च॥ लवणेनाथ वा स्वेदः सीमकेन तथैव च १ हरिद्रा लोध्रपत्तंगगृहधूमो मनःशिला॥ मधुप्रगाढो लेपोऽयं मे
दोऽर्बुदहरः परः॥ एतामेव क्रियां कुर्याद्शेषां शर्करार्बुदे १ इत्यर्बुदचिकित्सा॥ अथ पथ्यापथ्यविधिः॥ पुराण घृतपानं च

यो०र० जीर्णोलोहितशाल्यः॥ यवमुद्गपटोलंचरक्तशिग्रुकटिल्लकं १ शालिंचशाकंवेत्राग्रंरूक्षाणिचकटूनिच॥ दीपनानिचसर्वा
१६५ णिगुग्गुलुश्चशिलाजतु २ गलगंडगंडमालापचीग्रंथ्यर्बुदांतरे॥ यथादोषंयथावस्थंपथ्यमेतत्प्रकीर्तितं ३ दुग्धेक्षुविक
तीःसर्वाःमांसंचानूपसंभवं॥ पिष्टान्नमम्लमधुरंगुर्वभिष्यंदिकास्विच ४ गलगंडगंडमालापचीग्रंथ्यर्बुदामयान्॥ चिकि
त्सान्वगदंकोरोयश्चार्थिपरिवर्जयेत् ५ इतिपथ्यापथ्यं॥ ॥इतिगंडगडमालापचीग्रंथ्यर्बुदाचिकित्सासमाप्तः॥ ॥अथ
श्लीपदनीदानं॥ मेदोमांसाश्रयंश्रोफंपादयोःश्लीपदंवदेत्॥ स्वलिंगदर्शिभिर्दोषैरूर्ध्वंस्याज्जकफोत्तरे १ तस्यसंप्राप्तिमाह
॥यःसज्वरोवंक्षणजोभृशार्तिःशाथोन्वयांपादगतःक्रमेण॥ ततश्लीपदंस्यात्करकर्णनेत्रशिश्नोष्ठनासास्वपिकेचिदाहुः
२ वातजमाह॥ वातजंरूक्षारूक्षंचस्फुटतेतीव्रवेदनं॥ अनमित्तरुजातस्यबहुशोज्वरएवच ३ पित्तजमाह॥ पित्तजंपीत
संकाशंदाहज्वरयुतंमृदुः॥ श्लेष्मजमाह॥ श्लैष्मिकंस्निग्धवर्णंतुश्वेतपांडुगुरुस्थिरं ४ अस्याःसाध्यत्वमाह॥ वल्मी
कमिवसंजातंकंटकैरुपचीयते॥ सर्वात्मकंमहत्तंचवर्जनीयंविशेषतः ५ श्लीपदेकफलस्यऽव्यभिचारेणप्राधान्यमाह
॥त्रीण्येतानिविजानीयात्श्लीपदानिकफाच्छ्रयात्॥ गुरुत्वंचमहत्वंचयस्मान्नास्तिविनाकफात् ६ श्लीपदसंभवेहेतु
विदेषःशामाह॥ पुराणोदकभूयिष्ठाःसर्वर्तुषुचशीतलाः॥ येदेशास्तेषुजायंतेश्लीपदानिविशेषतः ७ पुनःअसाध्यत्वमा
ह॥ यःश्लेष्मलाहारविहारजातंपुंसःप्रकृत्याचकफात्मकस्य॥ साश्रावमत्युन्नतसर्वलिंगंसकंडुरश्लेष्मयुतंविवर्ज्यं ८
इतिनिदानं॥ ॥अथश्लीपदचिकित्सामाह॥ लंघनाःलेपनंस्वेदरेचनैःरक्तसेचनैः॥ प्रायःश्लेष्महरैरुष्णैःश्लीपदंसमु
पाचरेत् १ स्निग्धस्विन्नेदोपनाहंश्चश्लीपदेऽनिलजेभिषक्॥ कृत्वाल्फोपरिशिरांविध्येतुचतुरंगुले २ गुल्फस्याधःशिरांविध्ये
श्लीपदेपित्तसंभवे॥ पित्तघ्नींचक्रियांकुर्यात्पित्तार्बुदविसर्पवत् ३ मंजिष्ठामधुकंरास्नामहींसासपुनर्नवा॥ पिष्टारनालेर्ले
पायंपित्तश्लीपदशांतये १ शिरांसुविदितांविध्येदंगुष्ठेश्लेष्मश्लीपदे॥ सिद्धार्थशोभांजनदेवदारुविश्वौषधैर्मूत्रयुतैःप्र १६५
लिंपेत्॥ पुनर्नवानागरसर्षपाणांकल्केनवाकांजिकमिश्रितेन १ धत्तूरैरंडनिर्गुंडीवर्षाभूशिग्रुसर्षपैः॥ प्रलेपःश्लीपदंहंति

333/1936

चिरोत्थमपिदारुणं २ हितश्चलेपनेनित्यंचित्रकोदेवदारुच॥ सिद्धार्थशिग्रुकल्कोवासुखोष्णोमूत्रपेषितः १ प्रपिबेद्वाभयाकल्क
मूत्रेणान्यमेववा॥ पिबेद्वंगुडूचिंचनागरंभद्रदारुवा १ पिबेत्सर्षपतैलंनश्लीपदानांनिवृत्तये २ पूतिकरंजकदलंरसंवापि
यथाबलं॥ अनेनैवविधानेनपुत्रजीवकजंरसं १ प्रयुंजीतभिषक्प्राज्ञःकालसात्म्यविभागतः॥ पलाशमूलंस्वरसंपिबेद्वाते
लेनतुल्यंसितसर्षपानां॥ मूत्रेणपथ्यामरदारुविश्वंसगुग्गुलंश्लीपदभिन्निषेव्यं १ रक्तदारुकचूर्णंवामूत्रसौवीरकादिभिः
॥शीलितंश्लीपदंहंतिरूद्धंसंवत्सरोषितं॥ अथपिप्पल्यादिचूर्णं॥ पिप्पलीत्रिफलादार्वीनागरंसपुनर्नवां॥ भागैर्द्विपलि
कैस्तेषांतत्समंरक्तदारुकं॥ कांजिकेनतुतच्चूर्णंपिबेत्कर्षप्रमाणतः॥ जीर्णेचापरिहीनस्याद्भोजनंसर्वकामिकं॥ श्लीपदंवा
तरोगांश्चप्लीहगुल्ममरोचकं॥ अग्निंचकुरुतेघोरंभस्मकंचप्रयच्छति ३ कृष्णाचित्रकदंतीनांकर्षमर्धपलंपलं॥ विंशतिश्च
हृतःकायागुडस्यचपलद्वयं १ मधुनासहसंयुक्तंश्लीपदंहंतिदारुणं २ अथविडंगादितैलं॥ विडंगमारिचार्केषुनागरेचि
त्रकेतथा॥ भद्रदार्वेलकाख्याश्चसर्वेषुलवणेषुच १ तैलंपक्वंपिबेद्वापिश्लीपदानांनिवृत्तये॥ अथसौरेश्वरघृतं॥ सुरसा
देवकाष्ठंचित्रफलात्रिकटुजोंगे॥ लवणानिसर्वाणिविडंगान्यथचित्रकं॥ चविकापिप्पलीमूलंगुग्गुलुंहुषाव्चा॥ यवाग्रजंम
पाठश्चसकोलंरक्तदारुके २ कल्कैश्चकार्षिकैरेभिःघृतंप्रस्थंविपाचयेत्॥ दशमूलकषायेनधान्ययूषाद्रवेणश्च ३ द
धिमंडसमायुक्तंप्रस्थंप्रस्थंपृथक्पृथक्॥ पक्वंस्यादुध्दृतंकल्कंपिबेत्कर्षत्रयंहवि ४ श्लीपदंकफवातोत्थंमांसरक्ताश्रितंच
यत्॥ मेदोश्रिताभिघातोत्थंहन्यादेवनसंशयः ५ अपचीगलगंडानिअन्त्रवृद्धिंतथार्बुदं॥ नाशयेत्ग्रहणीदोषंश्वयथुंगु
दजान्यपि ६ परमग्निकरंहृद्यंकोष्ठकृमिविनाशनं॥ घृतंसौरेश्वरंनामश्लीपदंहंतिसेवितं ७ जीवकेनघृतंस्वेतत्रोगानीक
विनाशनं॥ यवान्वंकर्ममांसंचकटुतैलेचयोजयेत् ८ श्रीपदानांप्रशांत्यर्थंमासीतेदारुमग्निना ९ गंधर्वतैलभृष्टांहरीत
कींगोजलेनयःपिबंति॥ श्लीपदबंधनमुक्तोभवत्यसौसप्तरात्रेण १ अथगुडूच्यादिलेपः॥ गुडूचीकटुकीशुंठीदेवदारुविडंग
कं॥ पिष्टागोमूत्रसंयुक्तंलेपात्श्लीपदनाशनं १ अथधान्याम्लादि॥ धान्याम्लंतैलसंयुक्तंकफवातविनाशनं॥ चीपनंचासदोषं

चमंदः श्लीपदनाशनं १ पिंडारकतरुसंभवबंधूकशिफा जयति सर्षपापीतं ॥ श्लीपदमुग्रं निश्चलं बंधासत्रे यजंघायां २ सपिष्ट
मारनाले नरुथिकामूलकल्कं ॥ प्रलेपाच्छ्लीपदं हंति वल्मूलमपि दृढं १ यवान्नकटुतैलं च कुमेमां सं च योजयेत् ॥ श्लीपदानां
प्रशांत्यर्थं मासं तेदाहमिना १ पादकंडुहरं कुर्यान्नवनीतेन माक्षिकं ॥ पाददाहं हरेत्स्वादेति लाद्धिगुणं वा कुचि १ चूर्णितं मधुसर्पि
भ्यां कर्षमर्तिप्रशांतये ॥ २ अथ पथ्यापथ्यविधिः ॥ पुरातनाः षष्टिकशालयश्च यवाः कुलित्थाः लशुनं पटोलं ॥ वार्ताकुसोभांजनक
रवेलं ॥ पुनर्नवामूलमुपोदकी च १ एरंडतैलं सुरभीजलं च कटूनि तिक्तानि च दीपनानि ॥ एतानि पथ्यानि भवंति पुंसां रोगे सति श्ली नि
पदनामधेयं २ विशीन्नदुग्धविकृतिगुडमानूपमामिषं स्वादम्लं पास्यात्रं च सिंधुविध्यनदीजलं ॥ पिच्छलं गुर्वभिष्यंदि श्लीपदी प
रिवर्जयेत् ॥ इति पथ्यापथ्यं ॥ इति श्लीपदरोगचिकित्सा समाप्तः ॥ ॥ अथ विद्रधिनिदानं ॥ ॥ तस्य संप्राप्तिमाह ॥ त्वग्रक्तमांसमे
दांसि प्रदुष्यास्थिसमाश्रिताः ॥ दोषाः शोथं शनैर्घोरं जनयंत्युच्छ्रितो भृशं १ महामूलं रुजावंतं वृत्तं वाप्यथवायतं ॥ स विद्रधिरि
ति ख्यातो विज्ञेयः षड्विधश्च सः २ तस्य संख्यामाह ॥ पृथक् दोषैः समस्तैश्च क्षतेनाप्यसृजा तथा ॥ षण्णामपि च तेषां हि लक्षणं सं
प्रवक्ष्यते ३ वातिकमाह ॥ कृष्णोऽरुणो वा विषमो भृशमत्यर्थवेदनः ॥ चिरोत्थानविपाकश्च विद्रधिर्वातसंभवः ४ पैत्तिकमाह ॥ पक्वो
दुंबरसंकाशः पीतो वा ज्वरदाहवान् ॥ क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसंभवः ५ श्लेष्मजमाह ॥ शरावसदृशः पांडुः शीतः
स्निग्धोऽल्पवेदनः ॥ चिरोत्थानप्रपाकश्च विद्रधिः कफसंभवः ६ सान्निपातिकमाह ॥ तनुपीतासिताश्चैषां स्रावाः क्रमशः स्मृताः
॥ नानावर्णरुजास्रावो घाटालो विषमो महान् ॥ विषमं पच्यते तापि विद्रधिः सान्निपातिकः ७ अभिघातजस्य संप्राप्तिमाह ॥ तैस्तै
र्भावैरभिहते वाऽपथ्यकारिणः ॥ क्षतोष्मा वायुविक्षिप्तः सरक्तं पित्तमीरयेत् ८ ज्वरस्तृष्णातिदाहश्च जायते तस्य देहिनः ॥ आगं
तुर्विद्रधिस्त्वेषः पित्तविद्रधिलक्षणो ९ रक्तजमाह ॥ कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाज्वरैः ॥ पित्तविद्रधिलिंगैश्च रक्तविद्रधि
रुच्यते ॥ अभ्यंतरविद्रधेः कारणमाह ॥ अभ्यंतरानतः पूर्वविद्रधीन्संप्रवक्ष्यते ॥ गुर्वसात्म्यविरुद्धान्नशुष्कसंसृष्टभोजनात् ११
अतिव्याधिर्व्यवायामवेगघातविदाहिभिः ॥ पृथक्संभूय वा दोषाः कुपिता गुल्मरूपिणं १२ वल्मीकवत्समुन्नद्धमंतः कुर्वंति

335/1936

विद्रधीन् ॥ संस्थानमाह ॥ गुदे बस्तिमुखे नाभ्यां कुक्षौ वंक्षणयोस्तथा ॥ वृक्कयोः प्लीह्नि यकृति क्लोम्नि वाप्यथवा हृदि १३ एषां लक्षणं
॥ एषामुक्तानि लिंगानि बाह्यविद्रधिलक्षणैः ॥ अधिष्ठानविशेषेण लक्षणानि निबोधत १४ गुदे वातनिरोधस्तु बस्तौ कृच्छ्राल्पमू
त्रता ॥ नाभ्यां हिध्मा तु साटोपः कुक्षौ मारुतकोपनं ५ कटीपृष्ठग्रहस्तीव्रो वंक्षणोत्थे तु विद्रधौ ॥ वृक्कयोः पार्श्वसंकोचः प्लीह्निः श्वा
साः वरोधनं १६ सर्वांगप्रग्रहस्तीव्रो हृदि कासश्च जायते ॥ श्वासो यकृति हिक्का च पिपासा क्लोमजेऽधिका १७ स्राव निर्गममाह ॥
नाभेरुपरिजाः पक्वा यांत्यूर्ध्वमितरे त्वधः ॥ अधःस्रुतेषु जीवेच्च स्रुतेषूर्ध्वं न जीवति १८ उक्तं हारीते ॥ ऊर्ध्वं प्रपन्नेषु मुखेन राणां प्र
वर्तते सकसहिता हि पूर्वः ॥ अधः प्रपन्नेषु च पायुमार्गात् द्वाभ्यां प्रवृत्तिस्त्वरुनाभिजे च १ स्राव विषयं साध्यासाध्यमाह ॥ हृ
न्नाभिबस्तिवर्ज्या ये तेषु भिन्नेषु बाह्यतः ॥ जीवेत्कदाचित्पुरुषो नेतरेषु कदाचन १९ उक्तं भोजे ॥ असाध्यो मर्मजो ज्ञेयः पक्वोऽयकं
श्च विद्रधिः सन्निपातोत्थितोप्येवं पक्व एव तु वस्तिजः १ त्वग्जो नाभेरघोयश्च साध्यो मर्मसमीपजः ॥ अपक्वश्चैव पक्वश्च साध्यो नो
परिनाभिजः २ पुनः साध्यासाध्यत्वमाह ॥ साध्या विद्रधयः पंच विवर्ज्यः सान्निपातिकः ॥ तेषां विषयमाह ॥ आमपक्वविदग्धत्वं
तेषां शोथवेदादिशेत् तेषां अभ्यंतरेऽसाध्यत्वमाह ॥ आध्मानं बद्धनिष्यंदं छर्दिहिक्का तृषान्वितं ॥ रुजा श्वाससमायुक्तं विद्रधि
र्नाशयेन्नरः २१ मुष्टिप्रमाणो गुल्मस्तु विद्रधिस्तु ततः परं ॥ गुल्मास्तिष्ठंति कोष्ठेषु विद्रधिर्मांसशोणिते ॥ विद्रधिः पच्यते यस्मात्
गुल्मश्चापि न पच्यते २२ इति विद्रधिनिदानं ॥ ॥ अथ केचित्तं व्रांतरोक्तं स्तनविद्रधिं पठंति तमाह ॥ पवनेस्तनशिराः संवृताः प्र
प्ययोषितां ॥ सूतानां गर्भिणीनां तु संभवेत् श्वयथुर्घनः ॥ स्तने सदुग्धे वा सासके बाह्यविद्रधिलक्षणं ॥ नाडीनां सूक्ष्मवक्त्रत्वात्कन्या
नां न च जायते २ इति स्तनविद्रधिः ॥ अथातो विद्रधिचिकित्सां व्याख्यास्यामः ॥ रसालफलतुल्यो यः शोफो बाह्योथवांतरः ॥ पृथक्
दाहोरुजानाहकारको विद्रधिः स्मृतः १ जलौकापातं नं शस्तं सर्वस्मिन्नेव विद्रधौ ॥ मृदुर्विरेको लघ्वन्नं स्वेदः शुद्धो पित्तोत्तरं विना
२ अथ वातविद्रधौ ॥ व्याघ्रमूलककल्केस्तु वसातैलघृतायुतैः ॥ सुखोष्णो बहुलो लेपः प्रयोज्यो वातविद्रधौ १ स्वेदोपनाहाः क
र्तव्याः शिग्रुमूलसमन्विताः पुनर्नवादारुविश्वदशमूलाभयांभसा ॥ गुग्गुलुमेरंडतैलं वापि बेन्मारुतविद्रधौ ॥ पिबेद्धात्रिफलाक्का

थंत्रिवृत्कल्कसंयुतं॥ पंचवल्कलकल्केन घृतमिश्रेण लेपनं २ अथ पित्तविद्रधौ॥ पैत्तं घृतेन सिद्धेन मंजिष्ठा क्षीरपन्नकैः॥ पय
स्याद्विनिशाश्रेष्ठा यष्टिदुग्धैश्च रोपयेत् १ न्यग्रोधादिप्रवालत्वक्फलैर्वा लेपनं हितं २ अथ श्लेष्मविद्रधौ॥ त्रिफलाशिग्रुवरुणादश
मूलांभसा पिबेत्॥ गुग्गुलुं मूत्रसंयुक्तं विद्रधौ कफसंभवे १ इष्टिकाशिकता लोहाश्वशकृत्तुषपांसुभिः॥ मूत्रैरुष्णैश्च सततं स्वे
दयेच्छ्लेष्मविद्रधौ २ अथ रक्तागंतुजयोः॥ विद्रधौ कुशलः कुर्याद्रक्तागंतुनिमित्तजे॥ पित्तविद्रधिवत्सर्वाः क्रिया निरवशेषतः
१ अथ सामान्यविद्रधिः शिग्रुदीप्यवरुणद्वियामिनीकुंजराशनकृतः कषायकः॥ बोलचूर्णसहितोंतरास्थितां विद्रधिं प्रशमयेद
शेषतः १ इति शोभांजनादिक्वाथः॥ अथ वरुणादिक्वाथः॥ कासीससैंधवशिलाजतुहिंगुचूर्णमिश्रीकृतो वरुणवल्कलजः क
षायः॥ अभ्यंतरोत्थितमपक्वमतिप्रमाणं नृणामथं जयति विद्रधिमुग्रशोफं १ अथ श्वेतपुनर्नवादि॥ श्वेतवर्षाभूवामूलं मू
लं वरुणकस्य च॥ जलेन क्वथितं पीतमपक्वं विद्रधिं जयेत् १ यवादिलेपः॥ यवगोधूममुद्गैश्च सिद्धपिष्टैः प्रलेपयेत्॥ विलियंते
क्षणेनैवमपक्वश्चैव विद्रधिः १ अथ दशमूलादि॥ दशमूलोछिन्नरुहापथ्यादारुपुनर्नवा॥ ज्वरविद्रधिशोफेषु शिग्रुविश्वयु
तो हितः १ अथ वरुणगणादि॥ वरुणादिगणः क्वाथमपक्वेभ्यंतरोत्थिते॥ ऊषकादिप्रतीवापं पिबेत्संशमनाय वै १ अथ मान
वकमूलादि॥ शमयति मानकमूलं क्षौद्रयुतं तंडुलांभसा पीतं॥ अंतर्भूतं विद्रधिं विमुक्ततमाश्चैव मनुजस्य॥ अथ हरीतकी चूर्णं
॥ हरीतकीसैंधवधातकीनां रजो घृतं क्षौद्रयुतं प्रयुक्तं॥ निहंति लेहं ध्रुवमेव पुंसामंतर्भवं विद्रधिमुग्ररूपं १ अथ शोभांजनादि॥
शोभांजनकनिर्यूहो हिंगुसैंधवसंयुतः॥ अचिराद्विद्रधिं हंति प्रातःप्रातर्निषेवितः १ शिग्रुमूलं जले धौतं दरपिष्टं प्रलेपयेत्॥ त
द्रसं मधुना पीत्वा हंत्यंतर्विद्रधिं नरः २ अथ त्रिफलागुग्गुलुः॥ त्रीणि पलानि फलत्रितयस्य हि तु पलेतुलितामगधायाः॥ पंच
पलानि भवंति पुरस्य स्यात्स फलत्रिकगुग्गुलुयोगः॥ पक्वेषु विद्रधिषु पूयमतिस्रवत्सु नाडीषु च व्रणगणेषु भगंदरेषु॥ स्याद्दंतमा १६०
लिषु फलत्रिकगुग्गुलुः स्यात्सथ्यां फलत्रिकघृतभोजनं च २ इति त्रिफलागुग्गुलुः॥ अथ वरणकादिघृतं॥ सिद्धं वरणादिग
णो विधिना तत्कल्कपाचितं सर्पिः अंतर्विद्रधिमुग्रं मस्तकशूलं कृतान् शमायेच्च १ गुल्मानपि पंचविधान्नाशयति दंयथांबुवायुसखं॥

337/1936

रतलातः॥ प्रपिबेद्वोजनसमेयीनिशास्येपि २ इति वारणकादिघृतं॥ अथ रसगंधकयोगः॥ वरुणादिकषायेण रसगंधककज्जलि
॥ भुक्ता निहंति माषैकाबाह्यमंतश्च विद्रधिं १ अपक्वेत्वेतदुद्दिष्टं पक्वे तु व्रणवत्क्रिया २ अथ पथ्यापथ्यविधिः॥ आमस्येरेचनं चैव ले
पः स्वेदोस्रमोक्षणं॥ जीर्णश्यामाककलमानि कुलित्थालशुनानि च १ रक्तशिग्रुश्च निष्पावकारवेल्लं पुनर्नवा॥ श्रीपर्णी चित्रकं क्षौद्रं
शोथोक्तानि च सर्वशः २ पक्वावस्थे शस्त्रकर्म पुराणा रक्तशालयः॥ घृततैलं मुद्गरसो विलेपी धन्वजारसाः ३ शालीशाकं चकद
लीपटोलं हिमवालुका॥ चदनं तप्तशीतांबु सर्वं चापि व्रणोदितं ४ नराणां विद्रधौ व्याधौ यथावस्थं यथामलं॥ पथ्यान्येतानि सर्वा
णि निर्दिष्टानि महर्षिभिः ५ शोफिनां यान्यपथ्यानि व्रणानामपथ्यानि च॥ क्रमादामे च पक्वे च विद्रधौ वर्जयेन्नरः॥ इति पथ्यापथ्य
विधिः॥ इति विद्रधिचिकित्सा समाप्ता॥ ॥ अथ व्रणशोथनिदानं॥ तस्य प्राग्रूपमाह॥ एकदेशोत्थितः शोथो व्रणानां पूर्वलक्षणं
॥ तस्यस्य संख्यामाह॥ षड्विधः स्यात्पृथक्सर्वरक्तश्चागंतुकस्तथा १ तेषां लक्षणनिर्देशमाह॥ शोथाः षडेते विज्ञेयाः प्रागुक्तैः शोथ
लक्षणैः॥ विशेषः कथ्यते चैषां पक्वापक्वविनिश्चयः २ विषमं पच्यते वाताच्चितोत्थश्चाऽचिरं चिरं॥ कफजः पित्तवच्छोथो रक्तागंतुस
मुद्भवः ३ मंदोष्मताल्पशोथत्वं काठिन्यं त्वक्सवर्णता॥ मंदवेदनता चैव शोथानामामलक्षणं ४ दह्यते दहनेनेव क्षारेणेव च प
च्यते॥ पिपीलिकागणेनेव दश्यते छिद्यते तथा ५ भिद्यते चैव शस्त्रेण दंडेनेव च ताड्यते॥ पीड्यते पाणिनेवांतः सूचिभिरिव तुद्य
ते ६ ऊषचोषो विवर्णः स्यादंगुल्येवावपद्यते॥ आसनेशयने स्थाने शांतिं वृश्चिकविद्धवत् ७ न गच्छेदाततः शोथो भवेदाध्मात
वस्तिवत्॥ ज्वरस्तृष्णाऽरुचिश्चैव पच्यमानस्य लक्षणं ८ वेदनोपशमः शोथो लोहितो वाऽल्पवेदनः॥ प्रादुर्भावो वलीनां च तोदः
कंडुर्मुहुर्मुहुः ९ उपद्रवाणां प्रशमो निम्नता स्फुटनं त्वचं॥ वस्ताविवांबुसंचारः स्याच्छोथेंऽगुलिपीडिते १ पूयस्य पीडयत्येकमंतमंते स
पीडिते॥ भक्ताकांक्षा भवेच्चैतच्छोथानां पक्वलक्षणं १ नर्ते निलाद्रुग्विना च पित्तं दाहः कफाच्चापि विना न पूयः॥ तस्माद्धि सर्वेपरिपा
ककाले पचंति शोथास्त्रिभिरेव दोषैः॥ १२ कक्षं समासाद्य यथैव वह्निर्वाय्वीरितः संदहति प्रसह्य॥ तथैव पूयोप्यविनिस्सृतो हि मांसं सशिरा
स्नायुचखादतीह १४ आमं विदह्यमानं च सम्यक्पक्वं च यो भिषक्॥ जानीयात्स भवेद्वैद्यः शेषास्तस्करवृत्तयः १५ यश्छिन्नत्यामम

नाद्यश्चपक्वमुपेक्षते॥श्वयथावविमंतव्ये।विनिश्चितकारिणो १९ इतिशोथव्रणनिदानं॥ ॥अथव्रणनिदानं॥द्विधाव्रणःपरिज्ञे
यःशारीरागंतुभेदतः॥दोषैराद्यस्तयोरन्यःशस्त्रादिक्षतसंभवः १ वातिकमाह॥स्तब्धःकठिनसंस्पर्शोमंदस्रावोमहारुजः॥तुद्यति
स्फुरतिश्यावोव्रणोमारुतसंभवः २ पैत्तिकमाह॥तृष्णामोहज्वरक्लेददाहदुष्ट्यवदारणैः॥व्रणपित्तकृतंविद्याद्गंधैःस्रावैश्चपूतिकैः
३ कफजमाह॥बहुपिच्छोगुरुःस्निग्धःस्तिमितोमंदवेदनः॥पांडुवर्णोऽल्पसंक्लेदश्चीरपाकीकफव्रणः ४ रक्तेनाह॥रक्तेरक्तःश्रवेत्तीव्र
रक्तद्वंद्वेसर्वेचद्वित्रिजःस्यात्तदन्वयैः ५ त्वङ्मांसजःसुखोदेशेतरुणस्याऽनुपद्रवः धीमतोभिनवःकालेसुखसाध्यःसुखव्रणः
६ गुणैरन्यतमैर्हीनःकृच्छ्रसाध्यतमोव्रणः ६ सर्वैर्विहीनोविज्ञेयःस्त्वसाध्योनिरुपक्रमः ७ पूतिपूयातिदुष्टासृक्स्रुत्युत्संगीति
संस्थितिः॥दुष्टव्रणोतिगंधादिःशुद्धलिंगविपर्ययः ८ जिह्वातलाभोतिमृदुश्लक्ष्णःस्निग्धोल्पवेदनः॥शुद्धोव्रणस्तोनिरास्रवःशु
द्धोव्रणइतिस्मृतः॥९ कपोतवर्णप्रतिमाःयस्यांतःक्लेदवर्जिताः॥स्थिराश्चपिडकावंतोरोहतीतितमादिशेत् १० रूढवर्त्मानमग्रंथि
मशूनमरुजंव्रणं॥त्वक्सवर्णसमतलंसम्यग्रूढंविनिर्दिशेत् ११ कुष्ठानांविषजुष्टानांशोषिणांमधुमेहिनां॥व्रणाःकृच्छ्रेणसिध्यं
तियेषांचापिव्रणेव्रणाः १२ वसामेदोस्थिमज्जानांमस्तुलिंगंचयस्रवेत्॥आगंतुकोव्रणःसिद्ध्येन्नसिध्येद्दोषसंभवः १३ मद्यागुर्वा
ज्यसुमनापद्मचंदनचंपकैः॥सगंधादिविगंधाश्चमुमूर्षाणांव्रणाःस्मृताः १४ येचमर्मसुसंभूताभवंत्यत्यर्थवेदनाः॥दह्यतेचांतर
त्यर्थंबहिःशीताश्चयेव्रणाः १५ दह्यतेबहिरत्यर्थंभवत्यंतश्चशीतलाः॥प्राणमांसक्षयश्वासकासारोचकपीडिताः॥प्रवृद्धपूयरु
धिराव्रणायेषांचमर्मसु १६ क्रियाभिःसम्यगारब्धाःनसिध्यंतिचयेव्रणाः॥वर्जयेत्तानपितान्वैद्यःसंरक्षन्नात्मनोयशः १७ इतिशा
रीरव्रणनिदानं॥ ॥अथागंतुव्रणनिदानं॥ ॥नानाधारमुखैःशस्त्रैर्नानास्थाननिपातितैः॥भवंतिनानाकृतयोव्रणास्तां
स्तानिबोधमे १ तेषांषड्विधत्वमाह॥छिन्नंभिन्नंतथाविद्धंक्षतंपिच्चितमेवच॥घृष्टमाहुस्तथाशल्यंतेषांवक्ष्यामिलक्षणं २ तिर्य
क्छिन्नऋजुर्वापियोव्रणस्त्वायतोभवेत्॥गात्रस्यपातनंतद्धिछिन्नमित्यभिधीयते ३ शकुंतेषुखड्गाग्रविषाणोराशयोहतः॥य
त्किंचित्स्रवेतद्धिभिन्नलक्षणमुच्यते ४ स्थानान्यामाग्निपक्वानांमूत्रस्यरुधिरस्यच॥हृदुंडुकःफुफ्फुसश्चकोष्ठमित्यभिधीयते ५

339
1936

तस्मिन्भिन्नेरक्तपूर्णेज्वरदाहश्चजायते॥मूत्रमार्गगुदास्येभ्योरक्तंघ्राणाच्चगच्छति ६ मूर्छाश्वासतृषाध्मानमभक्तच्छंदएव
च॥विण्मूत्रवातसंगश्चस्वेदास्रावोऽक्षिरक्तता ७ लोहगंधित्वमास्यस्यगात्रदौर्गंध्यमेवच॥हृच्छूलंपार्श्वयोश्चापिविशेषंचात्रमे
शृणु ८ आमाशयस्थेरुधिरेरुधिरंछर्दयत्यपि॥आध्मानमतिमात्रंचशूलंचभृशदारुणं ९ पक्वाशयगतेचापिरुजागौरवमेवच॥
अधःकायेविशेषेणशीततावोपजायते १० सूक्ष्मास्यशल्याभिहतंयदंगंत्वाशयंविना॥उत्तुंडितंनिर्गतंवातद्विद्धमितिनिर्दिशेत् ११
नातिछिन्नंनातिभिन्नंउभयोर्लक्षणान्वितं॥विषमंव्रणमंगंयत्तत्क्षतंत्वभिनिर्दिशेत् १२ प्रहारपीडनाभ्यांतुयदंगंपृथुतांगतं॥सा
स्थितंपिच्चितंविद्यान्मज्जारक्तपरिप्लुतं १३ घर्षणादभिघाताद्वायदंगंविगतत्वचं॥उष्माश्रवान्वितंततुघृष्टमित्यभिधीयते १४ श्यावं
सशोथंपिडकान्वितंचमुहुर्मुहुःशोणितवाहिनंच॥मृदूद्गतंबुद्बुदतुल्यमांसंव्रणंसशल्यंसरुजंवदंति १५ त्वग्घातीत्यसिरासंधीनि
नित्वास्यपरिहृत्यवा॥कोष्ठप्रतिष्ठितंशल्यंकुर्यादुक्तानुपद्रवान् १६ तत्रांतर्लोहितंपांडुशीतपादकराननं॥शीतोच्छ्वासंरक्तनेत्रमान
द्धंपरिवर्जयेत् १७ भ्रमःप्रलापःपतनंप्रमोहोविचेष्टनंग्लानिरथोष्णतावा॥स्रस्तांगतामूर्छनमूर्ध्ववाततीव्ररुजोवातकृताश्चता
स्ताः १८ मांसोदकाभंरुधिरंचगच्छेत्सर्वेंद्रियार्थोपरमस्तथैव॥दशार्धसंख्येष्वपिविक्षितेषुसामान्यतोमर्मसुलिंगमुक्तं १९ सुरेंद्रगो
पप्रतिमंप्रभूतंरक्तंस्रवेत्तत्क्षयजस्तत्वतश्च॥दशार्धसंख्येश्चवायुः॥करोतिरोगान्विविधान्यथोक्तान्मशिरासुविद्धासुविविक्षिता
सु २० कौब्जंशरीरावयवावसादःक्रियास्वशक्तिस्तुमहारुजश्च॥चिराद्व्रणोरोहतियस्यचापितंस्नायुविद्धंपुरुषंव्यवस्येत् २ शोथा
भिवृद्धस्तुमुलारुजश्चबलक्षयःपर्वसुभेदशोफौ॥क्षतेषुसंधिषुचलाचलेषुस्यात्संधिकर्मोपरितिश्चलिंगं २२ घोरारुजोयस्यनिशा
दिनेषुसर्वास्ववस्थास्वपिनैवशांतिः॥भिषग्विपश्चिद्विदितार्थसूत्रस्तमस्थिविद्धंपुरुषंव्यवस्येत् २३ यथास्वमेतानिविभाव्यचिह्नलिं
गानिमर्मस्वभिताडितेषु २४ पांडुर्विवर्णोऽपिशितंनवेत्तियोमांसमर्मण्यभिताडितःस्यात् २५ विसर्पःपक्षघातश्चशिरस्तंभोपतान
कः॥मोहोन्मादव्रणरुजोज्वरस्तृष्णाहनुग्रहः २६ कासश्छर्दिरतीसारोहिक्काश्वासश्चवेपथुः॥षोडशोपद्रवाःप्रोक्ताव्रणानांव्रणचिंत
कैः २७ इतिसर्वव्रणानिदानं॥ ॥अथव्रणशोथद्विव्रणचिकित्सामाह॥ ॥आदौविम्लापपनंद्वितीयमवसेचनं॥तृतीयमुपना

हं च चतुर्थी पाटनक्रिया १ पंचमं शोधनं कार्यं षष्ठे रोपणमिष्यते॥ एते क्रमा व्रणस्योक्ताः सप्तमं वैण तापरं २ अथ विस्रापनं॥ अ
भ्यंज्य स्वेदयित्वा तु वेणुनाड्या शनैः शनैः॥ विस्रापनार्थं ग्रथितं तैलेनांगुष्ठकेन च १ अथ आवसेचनं॥ रक्तावसेचनं कुर्यादा
दावेव विचक्षणः॥ शोफे महति संरुद्धे वेदनावति वा व्रणे १ यो न याति शमं लेपात्स्वेदसेकापतर्पणैः॥ सोपि नाशं व्रजत्याशु शो
थः शोणितमोक्षणात् २ एकतश्च क्रियाः सर्वा रक्तमोक्षणमेकतः॥ रक्तं हि विक्रियां याति तन्मे याति वि क्रिया ३ अथ लेपो
पनाहं च॥ मातुलुंगाग्निमंथौ च सुरदारु महौषधं॥ अहिंस्रा चैव रास्ना च प्रलेपो वातशोफहा १ कल्कः कंजिकसंपिष्टः स्नि
ग्धः साखोटकल्कवः॥ रूपर्यां दूर्व नागानां वातशोथविनाशनः १ दूर्वा च नलमूलं च मधूकं चंदनं तथा॥ शीतलेश्च गणैः सर्वैः
प्रलेपः पित्तशोपजित् १ अजगंधाश्वगंधा च काला सरलया सह॥ कंपिल्लुका च शृंगी च प्रलेपः श्लेष्मशोथहा॥ १ कृष्णा पुराण
पिण्याकं शिग्रुत्वक् शिकता शिवा॥ मूत्रपिष्टः सुखोष्णोयं प्रलेपः श्लेष्मशोथहा १ न्यग्रोधोदुंबराश्वत्थप्लक्षवेतससेलुभिः
॥ चंदनद्वयमंजिष्ठायष्टीसूरणगोरिकैः २ शतधौतघृतोन्मिश्रै लेपो रक्तप्रसादनः॥ दाहपाकरुजास्रावशोफनिर्वापणः परः
॥ आगंतुजे रक्तजे च एष लेपोतिपूतिजः ७ कटुतैलान्वितैर्लेपः सर्पनिर्मोकभस्मभिः॥ चयः शाम्यति गंडस्य प्रकोपः स्फुरति
द्रुतं १ न रात्रौ लेपनं दद्याद्धूतं च पतितं तथा॥ न च पर्युषितं शुष्यमाणं नैव च धारयेत् १ शुष्यमाणमुपेक्षेत प्रदेहं पीडनं प्रति॥
न चापि मुखमालिंपेते दोषः प्रसिस्यते १ न प्रशाम्यति यः शोथः प्रलेपादिविधानतः॥ द्रव्याणि पाचनियानि दद्यात्तत्रोपनाह
ने २ अथोपनाहं॥ सतिला सातसी बीजा दध्यम्लसक्तुपिंडिका॥ सकिण्वकुष्ठलवणाः शस्ता स्यादुपनाहने १ तैलेन सर्पिषा
वापि द्वाभ्यां सक्तुकपिंडिका॥ सुखोष्णा शोफपाकार्थमुपनाहः प्रशस्यते १ इति लेपोनाहं च॥ अथ पाटनं॥ अंतःपूयेष्ववक्त्रे
षु तथैवोत्संगवत्स्वपि॥ गतिमत्सु च रोगेषु भेदनं शस्तमुच्यते १ बालवृद्धासहक्षीणभीरूणां योषितामपि॥ मर्मोपरि च जाते
षु पक्वे शोफे च दारुणो १ चिरविल्वकोदंती चित्रको हयमारकः॥ कपोतकंकगृध्राणां मललेपन दारुणं १ स्वर्जिका यावशूकाद्या
क्षारलेपन दारुणः॥ हेमकार्यो लथालेपो व्रणपरमदारुणः १ शणमूलकशिग्रूणां फलानि तिलसर्षपाः॥ सक्तवः किण्व १६९

341/1136

मतसी प्रदेहः पाचनः स्मृतः १ दंतीमूलकचित्रत्वकस्नुक्स्वर्कपयसा गुडैः भल्लातकास्थिकासीससैंधवैर्दारुणः स्मृतः॥ हस्तिदंत
जले घृष्टं बिंदुमात्रं प्रलेपनं॥ अत्यंतकठिणे चापि शोफे पाचनभेदनं॥ यवगोधूमचूर्णं च सक्षारं दारुणं प्रकेथं॥ हरिद्राभस्मचू
र्णाभ्यां प्रलेपो दारणः परः १ अजाविट्मज्यं च प्रलेपो व्रणदारुणः॥ इति पाटनं॥ ततः प्रक्षालने काथः पटोलीनिंबपत्रजः॥ अ
विशुद्धे विशुद्धे तु न्यग्रोधादित्वगुद्भवः १ पंचमूलिद्वयं वाते न्यग्रोधादिश्च पैत्तिके॥ आरग्वधादिकं योज्यं कफे जसर्वकर्मसु १ अ
थ शोधनरोपणविधिः॥ तिलसैंधवयष्ट्याह्विनिंबपत्रनिशायुतैः॥ त्रिवृन्मधुयुतैः पिष्टैः प्रलेपो व्रणशोधनः १ तिलकल्कोस
लवणो द्वे हरिद्रे त्रिवृद्घृतं॥ मधुकं निंबपत्राणि लेपः स्याद्व्रणशोधनः १ निंबकोलकपत्राणि लेपः स्याद्व्रणशोधनः॥ निंबपत्र
तिलैः कल्को मधुना कृतशोधनः १ निंबपत्रं तिलो दंति॰ त्रिवृत्सैंधवमाक्षिकं॥ दुष्टव्रणप्रशमनो लेपः शोधनकेशरी १ अभया
त्रिवृता दंती लांगली मधु सैंधवैः॥ स्वर्जीपत्र धत्तूरकर्ममोटकुठेरिका १ पृथगेतैः प्रलेपेन गंभीरव्रणशोधनः १ निंबपत्रं मधुभ्यां
तु युक्तः संशोधनः स्मृतः॥ एवं वा सारिवामूलं सर्वव्रणविशोधनं १ न्यग्रोधोदुंबराश्वत्थकदंबप्लक्षवेतसाः॥ करवीरार्ककटुकाः कष्टा
रोपणा हिताः १ सप्तदलदुग्धकल्कः शमयति दुष्टव्रणं प्रलेपेन॥ मधुयुक्ता शरपुंखा सर्वव्रणरोपणी॰ कथिता १ पंचवल्कलचू
र्णो वा शुक्तिचूर्णसमायुतः धातकीलोध्रचूर्णैर्वा निःसारा हंति ते व्रणाः १ निंबपत्रघृतक्षौद्रदार्वीमधुकसंयुता॥ वर्तिस्तिलानां क
ल्कं वा शोधयेद्रोपयेद्व्रणं॥ निंबशम्याकजात्यर्कसप्तवर्णाश्वमारकः॥ कृमिघ्ना मूत्रसंयुक्ताः सेकलेपनधावनैः १ करंजारिष्ट
निर्गुंडिरसो हन्याद्व्रणः कृमीन्॥ लशुनेनाथ वा दद्याल्लेपनं कृमिनाशनं १ निंबपत्रवचाहिंगुसर्पिर्लवणसैंधवैः॥ धूपनं कृमि
रक्षोघ्नं व्रणकंडूरुजापहं १ क्लेदपाकस्रुतिगंधवंतो व्रणा महांतः सरुजाः सशाथाः॥ प्रयांति ते गुग्गुलुमिश्रितेन पीतेन शांतिं
त्रिफलाजलेन १ अथ गुग्गुलुवटकः॥ त्रिफलाचूर्णसंयुक्तो गुग्गुलुर्वटकीकृतः॥ निषेवितो विबंधघ्नो व्रणशोधनरोपणं १
अथ विडंगादिगुग्गुलुः॥ विडंगत्रिफलाव्योषचूर्णं गुग्गुना समं॥ सर्पिषा वटकान्कुर्यात्खादेद्वा हितभोजनः १ दुष्टव्रणापचीमेह
कुष्टनाडीविशोधनः २ अथामृतादिगुग्गुलुः॥ अमृतापटोलमूलं त्रिकटुत्रिफला कृमिघ्नानां॥ कृत्वा समभागचूर्णं ततुल्यागुग्गु

लुर्योज्यः १२ प्रतिवासरमेकैकां गुटिकां खादेदक्षपरिमाणां॥ जेतुं व्रणवाताश्रं गुल्मोदरपांडुशोथादीन् २ अथ ज्यात्यादिघृतं॥
जातीपत्रपटोलनिंबकटुका दार्विनिशा सारिवा मंजिष्ठाभयतुत्थसिक्थमधुकैर्नक्ताह्वबीजैः समैः॥ सर्पिः सिद्धमनेन सूक्ष्मवदनाम
र्माश्रिताः स्राविणो गंभीराः सरुजो व्रणाः सगतिकाः सिध्यंति रोहंति च १ अथ स्वर्जिकाघृतं॥ स्वर्जिका चयवक्षारकपिल्लं च हरेणुका
॥ टंकणं श्वेतखदिरं तुल्यचूर्णं चगोघृतेः १ सर्वसमांशं संचूर्ण्य मर्दयेल्लरु रंद्रं॥ स्वर्जिकाद्यमिदं सर्पिः सर्वव्रणहरं परं १ सपर्णकु
मिकंडुघ्नं सवर्णकरणं परं॥ अथ मनःशिलादिलेपः॥ मनःशिला समंजिष्ठा सक्षारा रजनीद्वयं॥ प्रलेपः सघृतक्षौद्रस्त्वग्विशुद्धि
करस्मृतः १ अथ पारदादि मलहरः॥ रसगंधकयोश्चूर्णं तत्समं मुर्दाशंखकं॥ सर्वतुल्यं तुकं पिल्लकिंचितुत्थसमन्वितं १ सर्वसंम
लयेद्दत्त्वा घृतं सर्वाच्चतुर्गुणं॥ पिचुप्लुतं प्रदातव्यं दुव्रणविशोधनं॥ नाडीव्रणहरं चैव सर्वव्रणनिषूदनं॥ येव्रणा नप्ररूहंत्यंतिभ
षजानां शतेन च १ अनेन ते प्रशाम्यंति सर्पिषा स्वल्पकालतः २ अथ द्वितीयपारदादिर्मलहरः॥ स रसगंधकसिंदूरतालकं
पिल्लुमूर्दकं॥ तुल्यं खदिरकं चूर्णं सर्वघृतं चतुर्गुणं॥ यत्तयासमेल्पपिशुनाव्रणे देयं विजानता॥ सर्वव्रणप्रशमनं घृतमेतन्न संश
यः १ अथायोरजादिलेपः॥ अयोरजः सकासीसं त्रिफलाकुसुमानि च॥ प्रलेपः प्रलेपः कुरुते दार्व्या सद्य एव नवा त्वचि १ इति व्र
णशोथद्विव्रणचिकित्सा समाप्ता॥ अथ सद्योव्रणचिकित्सामाह॥ बुध्याङ्गं तु व्रणं वैद्यो घृतक्षौद्रसमन्वितां॥ शीतां क्रीयां च
रेद्दाश्रुरक्तपित्तोष्मनाशिनी १ रूढे सद्योव्रणे युक्त्या दूर्ध्वं वा धश्च शोधनं॥ लंघनं च बलं ज्ञात्वा भोजनं वा स्रमोक्षणं २ पृष्टे
विदलिते चैव स्रुतरामिष्यते विधिः॥ तयोरल्पं स्रवस्य संपाकस्ते नाशु जायते ३ छिन्ने भिन्ने तथा विद्धे क्षते वा स्यातिस्रवेत॥
रक्तक्षयात्तत्र रुजः करोति पवनो भृशं ४ स्नेहपानपरीषेक लेपस्वेदोपनाहनं॥ कुर्वीत स्नेहबस्तिं च मातंत्र औषधैः स्मृतैः ५ उ
क्तं यग्रंथांतरे॥ छिन्ने भिन्ने तथा विद्धे क्षते सद्यो भिषग्वरैः॥ पट्टस्तत्रेण संस्वेदं व्रणकुर्याद्व्रणविशारदः ६ मुहुर्मुहुर्यः खादुःखंन
प्राप्नोति व्रणं नरः॥ अथ वादीय्य लवणपोटल्या स्वेदयेन्मुहुः ७ संतप्तया तप्तलोहपात्रसंयोगतः क्रमात्॥ दुष्टरक्तस्थितं चापि
शृंग्यालाबुवादिभिर्हरेत् ८ सद्यः क्षतव्रणे वैद्यः सशूलं परिषेचयेत्॥ यष्टीमधुकमिश्रेण नातिशीतेन सर्पिषा ९ कषायमधु

342/1936

राः शीताः क्रियाः सर्वास्तु योजयेत्॥ सद्योव्रणानां सप्ताहात्पश्चात्पूर्वोक्तमाचरेत् १० चिकित्सितं तु तत्सर्वं सामान्यव्रणनाशनं॥ आ
माशयस्थे रुधिरे वमनं पथ्यमुच्यते ११ पक्वाशयस्थे देयं च विरेचनमसंशयं १२ अथ वज्रलुगादिक्वाथः॥ क्वाथीवंशलगेरंड
श्वदंष्ट्राश्मभिदारुतः हिंगुसैंधवसंयुक्तः कोष्ठस्थं स्रावयेदसृक् १३ अथ यवादि॥ यवकोलकुलित्थानां निःस्नेहेन रसेन च॥
भुंजीतान्नं यवागुं वा पिबेत्सैंधवसंयुतां १४ अथ गौराद्यं घृतं॥ गौरा हरिद्रा मंजिष्ठा मांसी मधुकमेव च॥ प्रपौंडरीकं ह्रीवेरं नतं
मुस्तं सचंदनं १५ जातीनिंबपटोलं च करंजं कटुरोहिणी॥ मधुच्छिष्टं मधूकं च महामेदा तथैव च १६ पंचवल्कलतोयेन घृत
प्रस्थं विपाचयेत्॥ एतद्गौरादिकं सर्पिः सर्वव्रणविशोधनं १७ आगंतुकाश्च सहजाः सविरोत्थाश्च येव्रणाः॥ नाडीव्रणश्च विषमो न
श्यत्येव न संशयः १८ अथ तिक्तादिघृतं॥ तिक्ता सिक्थनिशायष्टीनक्ताह्वफलपल्लवैः॥ पटोलमालतीनिंबपत्रैर्व्रण्यं स्नेहघृतं
१९ अथ जात्यादितैलं॥ जातीनिंबपटोलानां नक्तमालस्य पल्लवाः॥ सिक्थकं मधुकं कुष्ठं निशा कटुरोहिणी २० मंजीष्ठपद्मकं लो
ध्रमभया। नीलमुसलं॥ तुत्थकं सारिवा बीजं नक्तमालस्य चक्षिपेत् २१ एतानि सम भागानि पिष्ट्वा तैलं विपाचयेत्॥ विषव्रणस
मुत्पन्ने स्फोटेषु च सकच्छुपु २२ कंडुवीसर्परोगेषु कीटदष्टेषु सर्वथा॥ सद्यः प्रहारेषु च दग्धविद्धक्षतेषु च २३ नखदंतक्षते देहदुष्ट
मांसावघर्षणे॥ भक्षणार्थमिदं तैलं हितं शोधनरोपणं २४ अथ विपरीतमल्लतैलं चक्रदत्तात्॥ सिंदूरकुष्ठविषहिंगुरसोनम
चित्रबाणाभिलांगलिकक्लविपक्वतैलं॥ भासादमंत्रयुतकुंकुमतुल्यफेनः॥ क्लिन्नव्रणप्रशमनो विपरीतमल्लः २५ खड्गभिघा
तगुरुगंडमहोपदंशनाडीव्रणविचर्चिककुष्ठपामा॥ नाल्विरूंति विपरीतकमल्लनाम तैलं यथेष्टं चैंशयनाश्च न भोजनस्य २६
अथ दुर्वादितैलं॥ दूर्वास्वरससंसिद्धं तैलं कंपिल्लकेन वा॥ दार्वीत्वचश्च कल्केन प्रधानं व्रणरोपणं २७ अथ सप्तविंशतिको गु
ग्गुलुः॥ त्रिकटुत्रिफलामुस्तविडंगामृतचित्रकं॥ पटोलं पिप्पलीमूलं हपुषा सुरदारु च २८ तुंबरुपुष्करं चव्यं विशाला रजनीद्व
यं॥ विडसौवर्चलं क्षारं सैंधवं गजपिप्पली २९ यावंत्येतानि सर्वाणि तावद्द्विगुणो गुग्गुलुः॥ कोलप्रमाणां वटिकां भक्षयेन्मधुना सह
३० अश्मरी मूत्रकृच्छ्रं च अंत्रवृद्धिं तथारुचीं च॥ चिरं ज्वरोपसृष्टानां क्षतोपहतं कासश्वासं तथा शोफमर्शांसि च भगंदरं॥ हृ

पो०र०
१६१ ष्टुलं पार्श्वशूलं च कुक्षिवस्तिगुदेरुजं ३१ अश्मरीं मूत्रकृच्छ्रं च अंत्रवृद्धिं तथा कृमीन्॥ चिरज्वरोपसृष्टानां क्षतोपहतचेतसां॥
३२ अनाहं च तथोन्मादं कुष्टान्यर्शोदराणि च॥ नाडीदुष्टव्रणान्सर्वान्प्रमेहान्श्लीपदं तथा॥ धन्वंतरिकृतो ह्येष सर्वरोगनिषूद
नः॥ सप्तविंशतिको नाम गुग्गुलुः प्रथितो महान् ३४ इति सप्तविंशतिको गुग्गुलुः॥ व्रणश्वयथुरायासात्स च रागश्च जागरात्
॥ तौ च रुक् च दिवास्वापात्ते च मत्स्यश्च मैथुनात् ३५ अम्लं दधि च शाकं च मांसमाषं पवारिजं॥ क्षिरं गुरूणि चान्नानि व्रणीनः
परिवर्जयेत् ३६॥ ॥इति सद्योव्रणचिकित्सा॥ ॥अथाऽग्निदग्धव्रणानिदानं॥ तत्र स्निग्धं रूक्षं वाश्रित्य द्रव्यमग्निर्दह
ति॥ अग्निः स्वतप्तो हि स्नेहसूक्ष्ममार्गानुसारित्वात्॥ त्वगादावनुप्रविश्याभुदहति तस्मात्स्नेहादग्धेऽधिका रुजो भवंति॥ तत्र
प्लुष्टं दुर्दग्धं सम्यक्दग्धं अतिदग्धमिति चतुर्विधं भवत्यग्निदग्धं २ तत्र विवर्णमात्रं प्लुष्यते तत्प्लुष्टं यत्रातिशंतिस्फोटास्तीव्र
दाहवेदना चिराच्चोपशाम्यति दुर्दग्धं॥ सम्यग्दग्धं भवगाढं तालफलवर्णं सुस्थितं पूर्वलक्षणयुक्तं च॥ अतिदग्धं तु त्वग्मांस
लंबनगात्रविश्लेषणं शिरास्नायुसंध्यस्थिव्यापदेनमतिमात्रवेदना ज्वरदाहपिपासामूर्छाश्वासोपद्रवा भवति॥ इति प्लुष्टा
दिभेदेन वन्हिदग्धश्चतुर्विधो व्रणो भवति॥ इति निदानं चंद्रसेनग्रंथात्॥ ॥अथोतच्चिकित्सा॥ प्लुष्टस्याग्निप्रतपनं कार्यमुष्णं
तथौषधं॥ शीतामुष्णां च दुर्दग्धे क्रियां कुर्यात्ततः पुनः॥ घृतालेपनसेकांस्तु शीतान्येवास्य कारयेत्॥ सम्यक्दग्धे तु गाक्षी
रीप्लक्षचंदनगैरिकैः॥ सामृतैः सर्पिषा युक्तैरालेपं कारयेद्भिषक् १ अतिदग्धे विशीर्णानि मांसानि उध्दृत्य शीतलां॥ क्रियां कुर्या
चूर्णकाले शालीतंदुलकंडनैः॥ तिंदुक्यास्त्वक्कषायैर्वा घृतमिश्रैः प्रलेपयेत् १ अथ पथ्यादिलेपः॥ पथ्या कर्दम जीकर मधुसि
क्थक सर्जमिश्रितं लेपः॥ गव्यं घृतमपहरति च पावकजनितं व्रणं सद्यः॥ अंतर्धूमकुबेरकोदरुन जो लेपो निहंति व्रणं अश्वत्थ १०१
स्य विशुष्कवल्कलभवं चूर्णं तथा गुंठनात्॥ अभ्यंगाद्विनिहंति तैलमखिलं गंडूपदैः साधितं पिष्ट्वा शाल्मलितूलकैर्जलगतां ले
पात्तथा वालुकां दग्धयवभस्मचूर्णं तैललतिलोक्तं प्रलेपाद्विरात्॥ हरति शिखिदाहदग्धं भूयोऽभ्यंगा द्रूर्णा चाशु॥ अथ मधुच्छि
ष्टाद्यं तैलं॥ मधुच्छिष्टं समधुकं लोध्रं सर्जरसं तथा॥ मूर्वा चंदनमंपिष्टापिष्टा सर्पिर्विपाचयेत्॥ सर्वेषामपि दग्धानां व्रणरोप

345/1936

णमुत्तमं १ अथ पटोलीतैलं॥ सिद्धं कषायकल्काभ्यां पटोल्याः कटुतैलकं॥ दग्धव्रणरुजास्रावदाहविस्फोटनाशनं १ अथ
चंदनाद्यं यमकं॥ चंदनं वटशृंगाश्च मंजिष्ठा मधुकं तथा॥ प्रपौंडरीकं दूर्वा च पतंगं धातुकी तथा॥ एतैस्तैलं विपक्वं स्यात् गोक्षीरेण
समायुतं॥ अग्निदग्धव्रणेश्रेष्ठं तत्क्षणाद्रोपणं परं १ अथ लांगलीघृतं॥ उभे हरिद्रे मंजिष्ठा मधुकं लोध्रकद्रूलं॥ कपिल्लक
सुभेभेदे लांगली मूलमेव च॥ पिप्पलीत्रिफला चैव निंबपत्रं च कार्षिकं॥ कपिलाया घृतं प्रस्थं पचेद्द्विगुणं पयः॥ पलद्वयं
च सिक्थस्य सिद्धपूते च दापयेत्॥ लांगलीकं घृतं नाम व्रणानां रोपणं परं॥ अग्निदग्धे विसर्पे च कीटलूतानां व्रणेषु च॥ अग्नि
दग्धव्रणे देयं धातकी चूर्णमुत्तमं॥ अतसीतैलसंमिश्रं वह्निदग्धव्रणापहं॥ अंतर्धूमविदग्धं तु त्रिफलाचूर्णविमिश्रितं तैलैः
॥ क्षौमैः शीघ्रं शमयत्यग्निव्रणमाशु लेपेन॥ पितविद्रधिविसर्पशमनं लेपनादिकं॥ अग्निदग्धे व्रणे सम्यक्प्रयुंजीत विच
क्षणः॥ कृधांपुरातनी ७ दग्धो वारिणापरिपेषितं॥ लेपनं तैलदग्धस्याद्विस्फोटव्याधिनाशनं॥ अक्षिक्षेपु च कर्तव्यमिदमाश्च्यो
तनं हितं॥ शोलुस्वक त्रिफला दार्वी काथो रोचनयायुतः॥ स्नुक्सर्कक्षीरसिक्तक्षिणि गव्यसर्पिर्निषेचयेत्॥ इति दग्धव्रणचिकित्सा
समाप्ता॥ ॥अथ भग्ननिदानमाह॥ भग्नं समासाद्द्विविधं वदंति कांडे च संधौ च हि तत्र संधौ॥ उत्पिष्ट विश्लिष्ट विवर्तितं च तिर्यक्
च विक्षिप्तमधश्च षट्कं॥ १ प्रसारणाकुंचनवर्तनो ग्ररुक्पार्श्वविद्वेषणमेतदुक्तं॥ सामान्यतः संधिगतस्य लिंगं॥ उत्पिष्टसंधि
श्वयथुः समंतात् २ विशेषतो रात्रिभवा रुजा च॥ विश्लिष्टजे तौ च रुजा च नित्यं॥ विवर्तिते पार्श्वरुजश्च तीव्राः तिर्यग्गते तीव्ररु
जो भवंति ३ क्षिप्तेति शूलं विषमं च सक्थ्याः क्षिप्तेत्वधोरुग्विघटश्च संधेः ४ कांडे त्वतः कर्कटकाश्वकर्णविचूर्णितं पिच्चितमस्थि
छिन्नं॥ कांडेषु भग्नं ह्यतिपातितं च मज्जागतं च स्फुटितं च वक्रं ५ छिन्नं द्विधा द्वादशधा च कांडे॥ स्रस्तांगता शोथरुजातिवृ
द्धिः संपीड्यमाने भवतीह शब्दः स्पर्शासहा स्पंदनतोदशूलाः ६ सर्वास्ववस्थासु न शर्मलाभो भग्नस्य कांडे खलु चिन्हमेतत्
॥ भग्नं तु कांडे बहुधाप्रयाति समासतो नामभिरेव तुल्यं ७ अल्पाशिनो नात्मवतो जंतोर्वातात्मकस्य च॥ उपद्रवैर्वा जुष्टस्य भग्नं
कृच्छ्रेण सिध्यति ८ भग्नं कपालं कट्यां तु संधिमुक्तं तथा च्युतं॥ जघनं प्रतिपिष्टं च वर्जयेत्तु विचक्षणः ९ असंश्लिष्टकपालं च ल

लादि चूर्णितं चयत॥ भग्नं स्तनमुदेशं वेदष्टेमूर्छितुवर्जयेत् १० सम्यक्संहितमप्यस्थि दुर्निक्षेपनिबंधनात्॥ संक्षोभाद्वापि यद्गच्छेत् क्रियातश्च विवर्जयेत् ११ तरुणास्थीनि नम्यंते भिद्यंते नलकानि च॥ कपालानि विभज्यंते स्फुटितं रुचकाणि च १२ इति भग्ननिदानं॥ ॥अथैतच्चिकित्सा॥ भग्नमुपचरेद्धिमान्सेकलेपनबंधनैः शीतलैरेव विविधैः प्रयोगैश्च समीरितैः॥ तत्रातिशिथिले बंधे संधिः स्थैर्यं न जायते॥ गाढेनापि त्वगादीनां शोफो रुक् पाक एव च॥ तस्मात्साधारणं बंधं भग्ने शंसंति तद्विदः॥ आदौ भग्नं विदित्वा तु सेचयेच्छीतलांबुना॥ पंकेनालेपनं कुर्याद्बंधनं च कुशान्वितं॥ अवनामितमुन्नम्येदुन्नतं चावपीडयेत्॥ क्षिप्तं विधापि च स्थाने संस्थाप्य विधिमाचरेत्॥ आलेपनार्थं मंजिष्ठं मधुकं चाम्लपेषितं॥ शतधौतघृतोन्मिश्रं शालिपिष्टं च लेपनं ॥ न्यग्रोधादिकषायं तु शीतलं परिषेचने॥ पंचमूलीविपक्वं तु क्षीरं दद्यात्सवेदने॥ मूलं शृंगाल छिन्नायाः पीत्वा मांसरसेन तु॥ ॥चूर्णीकृत्वा तु सप्ताहाद् अस्थिभंगमपोहति॥ आभाचूर्णं मधुयुतमस्थिभंगे त्र्यहं पिबेत्॥ पीत्वा चास्थिभवत्संध्यक् वज्रसारनिभं दृढं॥ यष्टी क्षीरं ससर्पिष्कं मधुरौषधसाधितं॥ शीतलं लाक्षया युक्तं प्रतिभग्ने पिबेन्नरः॥ संधत्ते चास्थिसंधानं लाक्षा गोधूम मर्जुनं॥ संधिमुक्तेऽस्थिभग्ने च पिबेत्क्षीरेण मानवः॥ रसेन मधुलाक्षाज्यसिताकल्कं समिश्रितं॥ छिन्नभिन्नच्युतास्थीनां संधानमचिराद्भवेत्॥ अथ लाक्षागुग्गुलुः॥ लाक्षास्थिसंहृत्ककुभाश्वगंधाश्चूर्णीकृता नागबला पुरश्च॥ संभग्नमुक्तास्थिरुजं निहन्याद् अंगानि कुर्यात्कुलिशोपमानि १ अथाभाद्यो गुग्गुलुः॥ आभाफलत्रिकव्योषैः सर्वैरेतैः समांशकैः॥ तुल्यं गुग्गुलुना योज्यं भग्नसंधिप्रसाधकं॥ सव्रणस्य तु भग्नस्य व्रणं सर्पिर्मधूत्तरैः॥ प्रतिसार्यं कषायैस्तु शेषं भग्नवदाचरेत्॥ वातव्याधिविनिर्दिष्टं स्नेहं तत्रापि योजयेत् १ अथ वह्निभस्मादि॥ वह्निजभस्म मधुना पातव्यं हतभोजिना॥ संधिभग्नस्थिभंगे च विशेषेण प्रशस्यते १ अथ गोधूमप्रयोगः॥ द्रा १ द्विदग्धगोधूमचूर्णं पीतं समाक्षिकं॥ कटिसंधिषु भग्नेषु मग्नेष्वस्थिषु पूजितं॥ अविदाहिभिरन्नैश्च पिष्टकैः समुपाचरेत्॥ मांसं मांसरसं सरसं क्षीरं सर्पिर्यूषं च मुद्गजं॥ बृंहणं चान्नपानं च संधिभग्नाय दापयेत्॥ लवणं कटुकं क्षारं साम्लं मैथुनमातपं॥ व्यायामं च न सेवेत भग्नो रूक्षान्नमेव च॥ बालानां तरुणानां च भग्नान्याशु॥ भावंति वै॥ समीचीनं तु वृद्धानां भग्नानां च विशेषतः

इति भग्ननिदानचिकित्सा समाप्तः॥ ॥अथ नाडीव्रणनिदानं॥ यः शोथमाममिति पक्वमुपेक्षितो यो यो वा व्रणं प्रचुरपूयमसाधुवृत्तः॥ अभ्यंतरं प्रविशति प्रविदार्य तस्य स्थानानि पूर्वविहितानि ततः स पूयः॥१॥ तस्यातिमात्रगमनाद्गतिरिष्यते तु नाडीव यद्वहति तेन मता तु नाडी २ संख्यामाह॥ दोषैस्त्रिभिर्भवति सा पृथगेकशश्च संमूर्छितैरपि च शल्यनिमित्ततोऽन्या ३ तत्र वातजमाह॥ तत्रानिलात्परुषसूक्ष्ममुखी सशूलां फेनानुविद्धमधिकं स्रवति क्षपासु ४ पित्तजमाह॥ पित्तात्तृषाज्वरकरी परिदाहयुक्ता पीतं स्रवत्यधिकमुष्णमहः सु चापि॥ श्लेष्मजमाह॥ ज्ञेयः कफाद्बहुघनार्जुनपिच्छिलास्रा स्तब्धा सकंडुररुजा रजनीप्रवृद्धा ५ त्रिदोषजमाह॥ दाहज्वरश्वसनमूर्छनवक्त्रशोषा यस्यां भवंत्यभिहितानि च लक्षणानि॥ तामादिशेत्पवनपित्तकफप्रकोपाद्घोरामसूक्षयकरीमिव कालरात्रिं ६ शल्यनिमित्तामाह॥ नष्टं कथंचिदनुमार्गमुदीरितेषु स्थानेषु शल्यमचिरेण गतिं करोति॥ सा फेनिलं मथितमुष्णमसृग्विमिश्रं स्रावं करोति सहसा सरुजा च नित्यं ७ असाध्यमाह॥ नाडी त्रिदोषप्रभवा न सिध्यत्॥ साध्यमाह॥ शेषाश्चतस्रः खलु यत्नसाध्याः ८ इति नाडीव्रणनिदानं॥ ॥अथैतच्चिकित्सामाह॥ नाडीनां गतयो विक्ष्य शस्त्रेणोपाध्यकर्मवित्॥ सर्वं व्रणक्रमं कुर्याच्छोधनारोपणादिकं १ कृशदुर्बलभीरूणां नाडी मर्माश्रिता तु या॥ क्षारसूत्रेण संछिंद्यान्न तु शस्त्रेण कदाचन॥ २ नाडीं वा तरुतां साधु पाटितां लेपयेद्भिषक्॥ भल्लातकपुथ्वीफलयुतैस्तिलैः पिष्टैः प्रलेपयेत् ३ पैत्तिकीं तिलमंजिष्ठा नागदंती निशाह्वयैः ४ श्लैष्मिकीं तिलयष्ट्याह्वनिकुंभारिष्टसैंधवैः ५ शल्यजां तिलमंजिष्ठामध्वाज्यैः लेपयेन्मुहुः ६ आरग्वधनिशाकालचूर्णाज्यक्षौद्रसंयुता॥ सूत्रवर्तिर्व्रणे योज्या शोधनी गतिनाशिनी ७ जात्यर्कशम्याककरंजदंतीसिंधुत्थसौवर्चलयावशूकैः॥ वर्तीकृता हंत्यचिरेण नाडीं स्नुक्क्षीरपिष्टा सह सैंधवेन ८ समूलपत्रां निर्गुंडीं पीडयित्वा रसं हरेत्॥ तेन सिद्धं समं तैलं नाडीदुष्टव्रणापहं ९ गुग्गुलुः त्रिफलाव्योषैः समांशैश्चाज्ययोजितं॥ नाडीं दुष्टव्रणं चापि जयेदपि भगंदरं १० इति नाडीव्रणचिकित्सा॥ ॥अथ सर्वव्रणरोगाणां पथ्यापथ्यविधिः॥ ॥यवषष्टिकगोधूमपुराणाः शितशालयः॥ मसूरतुवरीमुद्गयूषश्च व्रणकशर्करा १ विलेपी लाजमंडश्च यं श्च जांगला मृगपक्षिणः॥ घृतं तैलं पटोलं च वेत्राग्रं बालमूलकं २ वार्ताकं कारवेल्लं च कर्कोटं तंदुलीयकं॥ एतस

347/1936

यो०र० १०३

थ्यंनरैः सेव्यंयथावस्थंयथामलं ३ व्रणशोथेव्रणेसद्योव्रणेनाडीपिच॥ रुक्षाम्लशीतंलवणंव्यवायरमायासमुच्चैः परिभाषणंच॥४
प्रियासमालोकनमन्हिनिद्रांप्रजागरंचंक्रमणंनितांतं॥ शोकंविरुद्धाशनमंबुपानंतांबूलशाकानिचपत्रवंती॥ आजांगलंमांसम
सात्समन्तंविवर्जयेत्संततमप्रमत्तः॥ इतिपथ्यापथ्यं॥ इतिसर्वव्रणचिकित्सासमाप्तः॥ ॥इतिभगंदरनिदानं॥ ॥गुदस्यद्व्यंगुले॰
क्षेत्रे॥ पार्श्वतः पिटिकार्तिकृत्॥ भिन्नोभगंदरोज्ञेयः सचपंचविधोमतः १ संख्यामाह॥ वातपित्तकफैस्त्रेधाचतुर्थसन्निपाततः॥
उन्मार्गगः पंचमंस्यादेवंपंचविधोमतः॥२ तस्यापूर्वरूपमाह॥ कटिकपोलेविस्तोददाहकंडूरुजादयः॥ भवंतिपूर्वरूपाणिभविष्य
तिभगंदरे ३ वातिकमाह॥ कषायरूक्षैरपिकोपितोऽनिलस्त्वपानदेशेपिटिकांकरोति॥ उपेक्षणात्पाकमुपैतिदारुणंरुजंचभि
न्नारुणफेनवाहिनीं ४ तत्रागमोमूत्रपुरीषरेतसांव्रणैरनेकैः शतपोनकंवदेत् ५ पित्तजमाह॥ प्रकोपनैः पित्तमतिप्रकोपितंकरो
तिरक्तांपिडिकांगुदेगतं॥ तदाशुपाकिंकोमपूतिवाहिनीभगंदरंतुष्ट्रशिरोधरंवदेत् ६ श्लेष्मजमाह॥ कंडूयनोघनस्रावीकठिनो
मंदवेदनः॥ श्वेतावभासकफजः परिस्रावीभगंदरं ७ सन्निपातजमाह॥ बहुवर्णारुजोस्रावापिटिकागोस्तनोपमाः॥ शंबुकाव
र्तवन्नाडीशंबुकावर्तकोमतः ८ शल्यजमाह॥ क्षताद्गति॥ पायुगताविवर्धतेस्रुपेक्षणात्स्युः क्रिमिभिर्विदार्यते १ प्रकुर्वते
मार्गमनेकधामुखैव्रणैस्तदुन्मार्गभगंदरंवदेत् ९ असाध्यलक्षणमाह॥ घोराः साधयितुंदुःखाः सर्वएवभगंदराः॥ तेष्वसा
ध्यास्त्रिदोषोत्थाः क्षतजश्चविशेषतः १० वातमूत्रपुरीषाणिकृमयः शुक्रमेवच॥ भगंदरात्स्रवंतोनाशयंतितमातुरं ११
इतिभगंदरनिदानं॥ ॥इतिभगंदरचिकित्सा॥ ॥गुदपिटिकायामादौकुर्याद्रक्तावसेचनंमतिमान्॥ जलसदनाभिरशोषं
सापाकंनप्रयातियथा॥ अपानमार्गेपिटिकादहेत्स्वर्णशलाकया॥ पक्वानांपाटनक्षारवन्हिदाहादिकंक्रमं॥ विधायव्रणा॰
वत्कार्यंयथादोषंयथाक्रमं॥१ अथवटपत्रादिलेपः॥ वटपत्रेष्टिकाशुंठीगुडूचीसपुनर्नवा॥ सुपिष्टाः पिटिकावस्तेलेपः
शस्तोभगंदरे१ खदिरत्रिफलाक्वाथोमहिषीघृतसंयुतः॥ विडंगचूर्णयुक्तश्चभगंदरविनाशनः १ त्रिफलारससं १०३
युक्तंविडालास्थिप्रलेपनं॥ भगंदरनिहंत्याशुदुष्टव्रणहरंपरं १ शुनोस्थिमूलतातक्रपेषितास्वरसक्रयुक्॥ लेपोभगंद

349/1936

रंहन्यान्नरास्तातैलमेवच १ कुष्ठंत्रिवृत्तिलदंतिमागधिसैंधवंमधुगरजनीत्रिफलातुत्थोहितंस्याद्व्रणरोपणं १ तिलंत्रिवृत्ता
गदंतीमंतिष्टाज्यःसंधवः सक्षौद्रोश्चप्रलेपोयंभगंदरकुलांतकृत् १ रसांजनंरुरिद्रेद्वेमंजिष्टानिंबपल्लवाः॥ त्रिवृत्तेजोवती
दंतीकल्कोनाडीव्रणापहः १ तिलाभयालोध्रमरिष्टपत्रंनिशावचाकुष्ठमगारधूमः॥ भगंदरेनाड्युपदंशयोश्चदुष्टव्रणेशो
धनरोपणोयं १ अथनवकार्षिकोगुग्गुलुः॥ त्रिफलापुष्पोकणांत्रिपंचककर्षयाजितागुटिका॥ कुष्ठभगंदरनाडीदु
ष्टव्रणशोधनीकथिता १ अथजंबूकप्रकारः॥ अबूकस्यामिषंभुक्त्वाप्रकारैर्व्यंजनादिभिः॥ आजीर्णवर्जमांसेनमुच्यते
तुभगंदरात्॥ १ अथसप्तविंशतिगुग्गुलुः॥ त्रिकटुत्रिफलामुस्तविडंगामृतचित्रकं॥ चव्येलेपिप्पलीमूलंरुपुषास्करदारु
॥ तुंबरंपुष्करंचव्यंविशालाकरजनीद्वयं॥ विडंसौवर्चलंक्षारंसैंधवंगजपिप्पली॥ यावंत्येतानिद्रव्याणितावद्विगुणगुग्गुलुः
कोलप्रमाणगुटिकांभक्षयेन्मधुनासह॥ कासंश्वासंतथाशोफमशांसिचभगंदरं॥ हृच्छूलंपार्श्वशूलंचकुक्षिवस्तिगुदरुजौ॥ अश्मी
रीमूत्रकृच्छ्रंचअंत्रवृद्धिंतथाकृमीन्॥ चरज्वरोपसृष्टानांक्षयोपहतचेतसां॥ आनाहंचतथोन्मादंसकुष्ठान्युदराणिच॥ नाडी॰
दुष्टव्रणान्सर्वान्प्रमेहंश्लीपदंतथा॥ सप्तविंशतिकोह्येषसर्वरोगनिषूदनः॥ अथकरवीराद्यंतैलं॥ करवीरनिशादंतीलांगली
लवणादिभिः॥ मातुलिंगार्कपयसापचेत्तैलंभगंदरे १ अथविस्यंदनतैलं॥ चित्रकार्कौत्रिवृत्पाठेमलयूरुसमारकौ॥ स्नुधांवचां
लांगलिकांहरितालंसुवर्चिकां॥ ज्योतिष्मतींचसंहत्यतैलंधीराविपाचयेत्॥ एतद्विस्यंदनंनामतैलंदद्याद्भगंदरे॥ शोध
नंरोपणंचैवसवर्णकारणंतथा १ अथनिशादितैलं॥ निशार्कक्षीरसिंधाग्निपुनपुरोलांगलिवत्सकैः॥ सिद्धमभ्यंजने
तैलंभगंदरविनाशनं १ अथपथ्यापथ्यविधिः॥ आमसंशोधनंलेपोलंघनंरक्तमोक्षणं॥ पक्वेपुनःशस्त्रविधिस्
था क्षाराग्निकर्मच १ सर्वत्रशालयोमुद्गाविलेपिजांगलोरसः॥ पटोलंशिग्रुवेत्राग्रंधत्तूबालमूलकं २ तिलं
सर्षपयोस्तैलंतिक्तवर्गोघृतंमधु॥ एतत्पथ्यंनरैसेव्यंयथादोषंभगंदरे॥ ३॥ व्यायामंमैथुनंयुद्धंपृष्ठयानं
गुरूणिच॥ संवत्सरंपरिहृत्यवदरूव्रणोनरः॥ इतिपथ्यापथ्यं॥ ॥इतिभगंदरचिकित्सासमाप्त॥ कुष्ठंफलत्रितियपुष्करकां

चनत्वक्मुस्तातथात्रिकटुकातिविषागजाह्वः॥ गोमूत्रेणमिश्रितमिदंसकलंगुडेनकुर्याद्भगंदरविकारयुतःप्रलेपः॥
१ त्रिवृत्तिलदंतीकणकुष्ठदार्वीसैंधुकतुत्थकैः॥ फलत्रययुतैर्लेपोमधुनायंभगंदरे १ अथोपदंशनिदानं॥तस्यहे
तुमाह॥ हस्ताभिघातान्नखदंतघातद्धावनादत्युपसेवनाच्च॥ योनिप्रदोषाच्चभवंतिशिश्नेपंचोपदंशाः विविधोपचारैः
:वातजमाह॥ सतोदभेदःस्फुरणैःसकृष्णैःस्फोटैर्व्यवस्येत्सवनोपदंशं॥ पित्तजमाह॥ पित्तेनपक्वोदयुतैःसदाहैःपित्ते
न॥रक्तजमाह॥रक्तात्सितासितांवभासैः २ कफजमाह॥सकंडुरैःशोथयुतैर्महद्भिःशुक्लैर्घनैःस्रावयुतैःकफेन॥
संनिपातजमाह॥ नानाविधस्रावयुतोरुजोपपन्नमसाध्यमाहुस्त्रिमलोपदंशं ३ असाध्यत्वमाह॥विशीर्ण
मांसंकृमिःप्रजग्धंमुष्कावशेषंपरिवर्जयेत्॥प्रजातमात्रेणकरोतिमूढःशिश्नंनरोयोविषयप्रसक्तः ४
कालेनशोथःकृमिदाहपाकेप्रशीर्यतेशिश्नमपायतेस्ततेन ५ एकस्थानत्वेनाऽत्रलिंगार्शसमाह॥ अंकुरै
रिवसंघातैरुपर्युपरिसंस्थितैः॥ क्रमेणजायतेवर्तिस्ताम्रचूडशिखोपमा ६ कोशस्याभ्यंतरेसंधौपर्यसंधि
गतापिवा॥ लिंगवर्तिरितिख्यातालिंगार्शइतिचापरे ७ एतत्त्रिदोषजं॥ सवेदनापिच्छिलाचदुश्
चिकित्सात्रिदोषजा ८ मेढ्रसंधौव्रणाःकेचित्केचित्सर्वाश्रयातथा॥कुलित्थाकृतयःकेचित्केचित्सर्ष
पदलोपमाः ९ रुजादाहार्तिबहुलात्पाकतोदसमन्विताः॥स्त्रीणांपुंसांचजायंतेउपदंशाःसुदारुणाः १०
इत्युपदंशनिदानं अथोपदंशचिकित्सामाह॥ स्निग्धस्विन्नस्यतेषांदोषजमध्येशिराव्यधः॥ जलौकापतनंवास्या
दूर्ध्वाधोशोधनंतथा १ सद्योपहृतदोषस्यरुक्शोफावुपशाम्यतः॥पाकोरक्ष्यःप्रयत्नेनशिश्नक्षयकरस्त्वसौ
२ अथक्वाथः॥ पटोलनिंबत्रिफलाकिराततैः॥क्वाथंपिबेद्वाखदिरासनाभ्यां॥सगुग्गुलुंवात्रिफलायुतंवा
सर्वोपदंशापहरःप्रयोगः १ गैरिकांजनमंजिष्ठामधुकोशीरपद्मकैः॥ सचंदनोत्पलैःस्निग्धैःपयपितोपदं

शहा १ बब्बूलदलचूर्णेनदाडिमत्वग्जोथवा॥गुंडनंलिंगेदशस्थेलेपःपूगफलेनवा १ पटोलीरोहार्जुनजं
बूपथ्यालोध्रहरिद्रासहितःप्रलेपः॥सर्वोपदंशाश्ववरोहणार्थेचूर्णंचलंजंबुविमलांजलैनेन १ दहेत्कटाहेत्रिफ
लांतांमषीमधुसंयुतां॥कृत्वोपदंशलेपोयंसद्योरोपयतिव्रणं १ त्वचोदारुहरिद्रायाःशंखनाभिरसांजनं॥लाक्षागो
मयनिर्यासतैलंक्षौद्रघृतंपयः॥एभिःसुपिष्टैर्द्रव्यैश्चउपदंशंप्रलेपयेत्॥व्रणास्तेतेनशाम्यंतिश्वयथुर्दाहएव
च २ नीलोत्पलानिकुमुदंपद्मसौगंधिकानिच॥उपदंशेषुचूर्णानिप्रदेहोयंप्रशस्यते १ रसांजनंशिरीषेणपथ्
यापाचसमन्वितं॥ सक्षौद्रंलेपनंयोज्यंसद्योरोपयतिव्रणं॥ गोपीचंदनतुत्थंचसमभागेनमर्दयेत्॥कज्जलोजल
संयुक्तोव्रणानांलेपनेहिता १ अथपारदादिलेपः॥पारदंगंधकंतालंदरदंचमनःशिलां॥एथकर्षद्विकर्षंचमु
द्दारंसंगजीकेरं १ विधायकज्जलीश्लक्ष्णांमर्दयेत्सुरसारसैः॥छायाशुष्कांततःकृत्वापुनरुन्मत्तजद्रवैः २ विमर्द्य
थवटिंकार्यमुपदंशेप्रयोजयेत्॥गोघृतेनप्रलेपोयंव्रणानांरोपणेहितः ३ इतिलेपः॥अथस्वरसः॥अम्लत्वचंवि
निष्पीड्यनिर्गत्यस्वरसंपलं॥चतुःपलंत्वजाक्षीरंसंयुक्तंप्रपिबेत्प्रगे १ एवंमुनिदिनंकुर्यादुपदंशेव्रणेहितं २ आजा
क्षीरंतथाजूर्णंगोधूमंपथ्यमाचरेत्॥जतीप्रवालस्वरसंपलार्धंधेनोर्घृतंतत्सशालंकिंचित्।पिबेत्प्रगेयंचहरोपदंशं
क्षारादतेगोधूममर्पिपथ्यं॥इतिस्वरसाः॥ अथप्रक्षालनं॥ निंबार्जुनाश्वत्थकदंबशालजंबूपटोदुंबरवेतसाहिः॥
प्रक्षालनालेपघृतानिकुर्याच्चूर्णंचपित्तास्रभवोपदंशे १ त्रिफलायाःकषायेनभृंगराजरसेनवा॥व्रणप्रक्षालनं
कुर्यादुपदंशप्रशांतये १ अश्वत्थोदुंबरोप्लक्षवटवेतसजःस्मृतः॥व्रणशोथोपदंशानांशयेक्षालनात्स्मृतः १
जयाजात्याश्वमारार्कशम्याकानांदलैःपृथक्॥कृतंप्रक्षालनेक्वाथंमेढ्रपाकेप्रयोजयेत् १ अथघृतानि॥भू
निंबनिंबत्रिफलापटोलकरंजजातिखदिरासनानां॥सतोयकल्कैर्घृतमाशुपक्वंसर्वोपदंशापहरंप्रदिष्टं १

351/1736

यो॰र॰

१०८

संहन्त्यांन्नं रास्नातैलमेवं वा १ कुष्ठं त्रिदंति लरदंति॥ करंजनिंबत्रिफला पटोल करजजातिखदिरासनानां॥ सतोयकल्के करंजनिंबार्जुनशाल जंबूवटादिभिः कल्ककषायसिद्धं॥ सर्पिर्निहन्यादुपदंशदोषं सदारुपाकं स्मृतिरामयुक्तं॥ अ
थांगारधूमतैलं॥ अंगारधूमो रजनी सुराकिण्वं च तैस्त्रिभिः॥ भागोत्तरैः पचेत्तैलं कंडुशोथरुजापहं॥ शोधनं रोपणं चैव सवर्णीकरणं तथा १ अथ चोपचिन्याश्चूर्णं॥ कुडवं चोपचिन्याश्च शर्करायाः पलं तथा॥ पिप्पलीपिप्पलीमूलं मरीचं
देवपुष्पकं॥ आकल्लकं स्वर्जकं शुंठी जंतुघ्नं नववारां गकं॥ दश चक्रा कोलमितं याह्यं एतच्चूर्णीकृतं शुभं॥ सर्वमेकत्र संयोज्यं कर्षार्धं प्रतिवा
सरे॥ भक्षयेन्मधुसर्पिर्भ्यां युक्तं पथ्यं समाचरेत॥ आस्वादनं तथा सक्तुं पंतुवल्टीणां घृतं मधु॥ गोधूमं सैंधवं शिग्रुं बिंबीको शातकीफलं
॥ आर्द्रकं जलमं शोष्णं हि मान्यत्र प्रकीर्तितं॥ पंचोदंशो दैपदंशरोगाणां प्रमेहाणां तथैव च॥ व्रणानां वातरोगाणां कुष्ठानपि विनाशयेत्
॥ इति चोपचिन्याश्चूर्णं॥ अथ चोपचिनिपाकः॥ चोपचिन्या भवं चूर्णं पलं द्वादशमेव च॥ पिप्पलीपिप्पलीमूलं मरीचं नागरं त्वचं॥ आ
कल्लकं लवंगं च प्रत्येकं कर्षसंमितं॥ शर्करासम चूर्णं च पाचयेत्सर्वमेकतः॥ मोदकं कारयेत्तु सर्वकर्षप्रमाणतः॥ सायं प्रा
तर्निषेव्यस्तत्पथ्यं पूर्वोक्तं चूर्णवत॥ उपदंशो व्रणा कुष्ठं वातरोगं भगंदरं॥ धातुक्षयेकृते कासे प्रतिश्यये च यक्ष्मणि॥ सर्वान्रोगा
न्निहन्त्याशु ततः पुष्टिकरो भवेत १ इति चोपचिनीपाकः॥ इति बोले अथेहरीतकीयोगः॥ बालपथ्या पलेकं स्यात्तुल्यं शाणनितं न
था॥ निंबद्रवेण संमर्द्य दंसप्त दिनानि वै॥ गुटिकाश्चणकप्राया छायाशुष्कास्तु कारयेत॥ शीतोदकानुपानेन नित्यमेकं प्रदापयेत
॥ घस्त्राणामेकविंशत्या मुच्यते नृपदंशतः॥ शालीगोधूममुद्गश्च गोसर्पिः पथ्यमिरितं १ अथ रसगंधककज्जली॥ कर्षमात्रं प्रतिदिनं दद्या
द्दिवं निसमकं॥ गोधूमान्नं घृतं पथ्यं कारयेल्लवणं विना॥ उपदंशापहं श्रेष्ठं योगोयं मुनिभिषितः १ अथ सर्वोपदंशे रसघृतमुच्यते॥ शुद्धं रसपि
मितं द्विवल्लिप्रमर्द्य सर्वाद्विभागनवनीतमपि प्रमर्द्य॥ भैवस्त्वप्रलिप्य पिचुमंदविपर्णशाखां॥ संवेष्ट्य तन्मुखीपरि दीप्यवर्तिं॥ तस्माद्घृतं स्रवति भूं
चयेच पात्रे पचाद्विवल्लि दलसाकमिदं प्रदेयं॥ सर्वोपदंशाकरिके सरिणं व्रणाघ्नं पङ्गादिकं सघृतेचवि वाजनीयं १ अथ पथ्यापथ्यविधिः॥ छंदीर्भि
रेको ध्वजमध्यमानाडी। वे धौतलोकाः परिपाटनं च॥ सेकः प्रलेपोथव आलयश्च धन्वामिषं मुद्गरसो घृतानि १ कटिल्लकं शिग्रुफलं पयोलं आलि वक्ष्म
कं नवमूलकं च॥ तिक्तं कषायं मधु कूपवारि तैलं च हन्यादुपदंशरोगे २ दिवानिद्रां मूत्रवेगं गुर्वन्नं मैथुनं गुडं॥ आयासमम्लतक्रं च वर्जयेदुपदंश ३

१६८

353/1936

अथ शूकदोषनिदानं तस्य संप्राप्तिमाह अक्रमाल्लेपमोरश्चिंयो भिवांछति मूढधीः व्याधयस्तस्य जायन्ते संख्यामाह दश चाष्टौ च शूकजाः १
शर्षपिकामाह गौरसर्षपसंस्थाना शूकदुर्भग्नहेतुका पिडिका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका तु सा १ अष्टीलिकामाह कठिना विषमैर्भुग्नैर्वायु
नाष्टीलिका भवेत २ ग्रथितमाह शूकैर्यत्पूरितं शश्वत् ग्रथितं नाम तत्कफात् कुंभिकामाह कुंभिका रक्तपित्तोत्था जांबवास्थिनिभाशुभा
४ अलजीमाह लक्षणं त्वलजीं विद्यात् यथा प्रोक्तं विचक्षणैः ५ मृदितमाह मृदितं पीडितं यत्तु संरब्धं वातकोपतः ६ संमूढपीडिका
माह पाणिभ्यां भृशसंरूढे संमूढपिडिका भवेत ७ अवमंथमाह दीर्घा बह्व्यश्च पीडिका दीर्यंते मध्यतस्तु याः सोवमंथः कफासृग्भ्यां वे
दनारोमहर्षकृत ८ पुष्करिकामाह पिडिकाभिश्चिता या तु पित्तशोणितसंभवा पद्मकर्णिकसंस्थाना ज्ञेया पुष्करिकेति सा ९ स्पर्शहानिमा
ह करोति स्पर्शहानिं तु शोणितं शूकदूषितं १० उत्तमामाह मुद्गमाषोपमा रक्ता रक्तपित्तोद्भवा च सा व्याधिरेषोत्तमा नाम शूकाजीर्णनिमित्त
जा ११ शतपोनकमाह छिद्रैरणुमुखैर्लिंगं चितं यस्य समंततः वातशोणितजो व्याधिः संज्ञेयः शतपोनकः १२ त्वक्पाकमाह वातपित्तकृ
तो ज्ञेयस्त्वक्पाको ज्वरदाहकृत १३ शोणितार्बुदमाह मांसदोषेण जानीयादर्बुदं मांससंभवं १४ मांसपाकमाह शीर्यंते यस्य मांसानि य
स्य सर्वाश्च वेदनाः विद्यात्तं मांसपाकं तु सर्वदोषकृतं भिषक् १६ विद्रधिमाह विद्रधिं संनिपातेन यथोक्तमपि निर्दिशेत १७ तिलकाल
कमाह कृष्णानि चित्राण्यथवा शूकानि सविषाणि च पातितानि पचंत्याशु मेढ्रं निरवशेषतः कालानि भूत्वा मांसानि शीर्यंते यस्य देहिनः
संनिपातसमुत्थांस्तु तान्विद्यात्तिलकालकान् १८ शूकदोषे ऽसाध्यत्वमाह तत्र मांसार्बुदं यस्तु मांसपाकश्च यः स्मृतः विद्रधिश्च न सिध्यं
ति ये च स्युः तिलकालकाः १९ इति शूकनिदानं अथैतच्चिकित्सा हितं च सर्पिषः पानं पथ्यं चापि विरेचनं हितः शोणितमोक्षश्च शूक
रोगेषु देहिनां १ उल्लिख्य सर्षपिं तालपत्रेणाथ प्रलेपयेत तिंदुकत्रिफलालोध्रैर्गोमूत्रपरिपेषितैः क्रियेयमवमंथेपि रक्तं शोध्यं तथो
भयोः १ अष्टीलायां हृते रक्ते श्लेष्मग्रंथिक्रियां चरेत १ कुंभिकायां हरेद्रक्तं पक्वां शोधितं व्रणे १ तिंदुकत्रिफलालोध्रैर्लेपस्तैलं च रो
पणं २ अलज्यां हृतरक्तायां एवं एव क्रियाक्रमः स्वेदयेद्ग्रथितं पश्चनाडीस्वेदेन बुद्धिमान् सुखोष्णैरुपनाहैश्च व्रणोक्तैरुपनाहयेत
उत्तमाख्यं तु पिटिकां संस्वेदाबडिशोद्धृतां कल्कचूर्णैः कषायाणां क्षौद्रयुक्तैरुपाचरेत क्रमः पित्तविसर्पोक्तः पुष्करीमूढयोर्हितः

यो०८०

त्वक्पाके सर्वशो ह्यानो च सेचयेन्मरिचं पुनः बलातैलेन कोष्णेन मधुनेचोपनाहरेत् रसक्रियाविधातव्या लिखिते चानपीनके पृथक् पर्ण्यादि
भिः सिद्धतैलं दद्यादनंतरं रक्तविद्रधिवत्सा पिक्रिया शोणितजेऽर्बुदे मांसार्बुदे प्रकुर्वीत क्रियां सद्योव्रणोदितां त्रिफलागुग्गुलं चापि विशो
षणाय चारयेत् मांसपाके वटाद्यस्य गणस्य विधिवत् क्लेदेः कषायचूर्णकल्कैश्च सकोधूलनलेपनं विद्रधौ विधिवत्कार्यं रक्तविद्रधिभेषजं
व्रणादि कषायस्य पानप्रक्षालने हिते तिलकालं समुल्लिख्य क्षारेण लघुपाणिना भिषजा चात्र कर्तव्या सद्योव्रणविधिर्मता मांसार्बुदं मांस
पाकं विद्रधिं तिलकालकं प्रत्याख्याय प्रकुर्वीत भिषक् तेषां प्रतिक्रियां अथ पथ्यापथ्यविधिः लेपो विरेको रक्तमोक्षः सर्पिः पानं च शा
लयः यवजांगलमांसानि मुद्गयूषकाठिल्लकः १ पटोलं शिग्रुककर्कोटपर्कर बालमूलकं वेत्राग्र माषाढकफलं दाडिमं सैंधवं वरा कु
पोदकं गंधसारः कस्तूरी हिमवालुका तिक्तकषायं तैलं च स्यात्पथ्यं शूकदोषिणां ३ मूत्रवेगं दिवानिद्रां व्यायामं मैथुनं गुडं विदाहि गुरु त
क्रं च शूकदोषामपि त्यजेत् ४ इति पथ्यापथ्यं इति शूकदोषचिकित्सा समाप्तः अथ कुष्ठनिदानं विरोधीन्यन्नपानानि द्रवस्निग्ध
गुरूणि च भजतामागतां छर्दिं वेगांश्चान्यान्प्रतिघ्नतां १ व्यायाममतिसंतापमतिभुक्तानि षेवणां १ घर्मश्रमभयार्तानां द्रुतं शीतांबुसेवि
नां अजीर्णाध्यशनानां चैव पंचकर्मानुचारिणां ३ नवान्नदधिमत्स्यादि लवणाम्लनिषेवणां माषमूलकपिष्टान्नतिलक्षीरगुडाशिनां ४
व्यायामं चाप्यजीर्णेऽन्ने निद्रां च भजतां दिवा विप्रान्गुरून्धर्षयतां पापकर्म च कुर्वतां ५ वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमंबु च दूष
यंती सकुष्ठानां सप्तकोद्रव्यसंग्रहः ६ अतः कुष्ठानि जायंते सप्त चैकादशैव तु कुष्ठानि सप्तधा दोषैः पृथक्द्वंद्वैः समागतैः से
वेष्वपि त्रिदोषेषु व्यपदेशोऽधिकत्वतः ८ अतिश्लक्ष्णः खरस्पर्शः स्वेदास्वेदो विवर्णता दाहकंडूत्वचि स्वापतोदः कोष्ठोन्नतिः
श्रमः ९ व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः रूढानामपि रूक्षत्वं निमित्तेऽल्पेऽपि कोपनं १० रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षण
मग्रजं ११ सप्तमहाकुष्ठानां क्रमेणाह तत्र कपालकुष्ठं कृष्णारुणकपालाभं यद्रूक्षं परुषं तनु कपालं तोदबहुलं तत्कुष्ठं विषमं स्मृतं
१२ उदुंबरमाह तत्दाहरागकंडूभिः परीतं रोमपिंजरं उदुंबरफलाभासं कुष्ठमौदुंबरं वदेत् १३ मंडलकुष्ठमाह श्वेतं रक्तं स्थि
रं स्त्यानं स्निग्धमुत्सन्नमंडलं उदुंबरफलाभासं कुष्ठमौदुंबरं वदेत् कृच्छ्रमन्योन्यसंसक्तं कुष्ठं मंडलमुच्यते १४ ऋक्षजिह्वमाह

कर्कशं रक्तपर्यंतं पुंडरीकदलोपमं सोत्सेधं च सरागं च पुंडरीकं तदुच्यते १६ सिध्मकुष्ठमाह श्वेतं ताम्रं तनु च यद्रजो घृष्टं विमुंचति प्रायश्चो
रसि तत्सिध्ममलाबुकुसुमोपमं १७ काकणतीमाह यत्काकणंतिकावर्णमपाकं तीव्रवेदनं त्रिदोषलिंगं तत्कुष्ठं काकणं नैव सिध्यति १८
इति सप्तमहाकुष्ठानि अतोनंतरमेकादशक्षुद्रकुष्ठान्युच्यते तत्र चर्मकुष्ठमाह अस्वेदनं महावास्तु यन्मत्स्यशकलोपमं तदेवकुष्ठं च
माख्यं बहुलं हस्तिचर्मवत् १ कीटिभमाह श्यावं किणखरस्पर्शं कीटिभं परुषं स्थिरं २ वैपादिकमाह वैपादिकं पाणिपादस्फुटनं तीव्रवेदनं
३ अलसकमाह कंडूमद्भिः सरागैश्च गंडैरलसकं चितं ४ कंडुमंडलमाह सकंडूरागपिडकं दद्रुमंडलमुद्गतं ५ चर्मदलमाह रक्तं सशूलं कंडू
चमत्स्यात्स्फोटं दलत्यपि तच्चर्मदलमाख्यातं अस्पर्शासहमुच्यते ६ पामामाह सूक्ष्मा बह्व्यः पिडिकाश्चाववंत्यः पामेत्युक्ता कंडुमत्यः स
दाहः सैव स्फोटैस्तीव्रदाहैरुपेता ज्ञेया पाण्योः कच्छुरुग्रा स्फिजोश्च ७ विस्फोटमाह स्फोटाः श्यावारुणाभासा विस्फोटास्युस्तनुत्वचः
श्यावारुणश्च भारूपा विस्फोटास्युस्तनुत्वचः ८ रकसमाह कंडूर्विनायाः पिडिकाः शरीरे संश्रावहीना रकसोच्यते च ९ शतारु
माह रक्तश्यावं सदाहार्तिः शतारुः स्याद्बहुव्रणं १० विचर्चिकामाह सकंडूः पिडिका श्यावा बहुश्रावा विचर्चिका ११ कुष्ठानां दोष
त्रयस्य नियतलिंगमाह खरं श्यावारुणं रूक्षं वातकुष्ठं सवेदनं पित्तात्प्रकथितं दाहरागश्रावान्वितं स्मृतं कफात्क्लेदि घनं स्निग्धं
सकंडुस्थैर्यगौरवं द्विलिंगं द्वंद्वजं कुष्ठं त्रिलिंगं सान्निपातिकं १२ इदानीमुत्तरोत्तरसप्तधातुगतकुष्ठलक्षणं क्रमेणोच्यते तत्र त्व
गगतमाह त्वक्स्थे वैवर्ण्यमंगेषु कुष्ठे रौक्ष्यं च जायते त्वक्स्वापो रोमहर्षश्च स्वेदस्यातिप्रवर्तनं १ रक्तगतमाह कंडूः प्रयकश्चैव कु
ष्ठे शोणितसंश्रये २ मांसगतमाह बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिडिकोद्गमः तोदः स्फोटाः स्थिरत्वं च कुष्ठे मांससमाश्रिते
३ मेदोगतमाह दौर्गंध्यं गात्रदेशे च पूयोऽथ क्रिमयस्तथा गात्राणां भेदनं चापि कुष्ठे मेदः समाश्रिते कौण्यं गतिक्षयोंऽगानां
संभेदः क्षतसर्पणं मेदःस्थानगते लिंगं प्रागुक्तानि तथैव च ४ अस्थिमज्जाद्ययगतमाह नासाभंगोऽक्षिरागश्च क्षतेषु कृमिसं
भवः स्वरोपघातश्च भवेदस्थिमज्जासमाश्रिते ५ शुक्रगतमाह दंपत्योः कुष्ठबाहुल्यात्दुष्टशोणितशुक्रयोः यद
पत्यं तयोर्जातं ज्ञेयं तदपि कुष्ठितं ७ इति सप्तधातुगतानि साध्यमाह साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकं च यत् कृच्छ्रं मेद

355
1936

मेस्वहंदजंजाप्यं असाध्यं वर्ज्यमज्जास्थिसंश्रितं १ पुनः असाध्यलक्षणं कृमिकृद्दाहमंदाग्निसंयुक्तंयत्त्रिदोषजं प्रभिन्नंप्रश्रुतांगंच
रक्तेत्रहतःस्वरं २ पंचकर्मगुणातीतंकुष्टंहंतिहमानवं कुष्टेषुचिकित्सार्थदोषप्राधान्यमाह वातेनकुष्टंकापालंपित्तेनौदुंबरंकफात्
 मंडलाख्यंविचर्चीचकृथाख्यंवातपित्तजं १ चर्मैककुष्टकिटिभंसिध्मालसविपादिकाः वातश्लेष्मोद्भवाश्लेष्मपित्ताद्दद्रुशतारुषी २
पुडरीकंसविस्फोटंपामाचर्मदलं तथा सर्वैस्यात्काकणंश्वेत्रिकंदद्रुसकाकणा २ पुंडरीकार्श्यजिह्वेचमहाकुष्टानिसप्त ४ अथ
श्वित्रमाह कुष्टैकसंभवंश्वित्रंकिलासंवारुणंभवेत् निर्दिष्टमपरिस्रावीत्रिधात्वुद्भवसंश्रयं १ वाताद्रूक्षारुणंपित्तात्ताम्रंकमलप
त्रवत् सदाहंरोमविध्वंसीकफाच्छ्वेतंघनंगुरु २ सकंडूवक्रमाद्रक्तंमांसमेदःसुचादिशेत् वर्णेनैवतदुभयंकृच्छ्रंतच्चोत्तरोत्तरं ३ तस्या
साध्यासाध्यत्वमाह अशुक्लरोमाबहुलं असंश्लिष्टमथोनवं अनग्निदग्धजंसाध्यंश्वित्रंवर्ज्यमथोन्यथा ४ गुह्यपाणितलोष्ठेषुजात
मप्यचिरंतनं वर्जनीयंविशेषेणकिलासंसिद्धिमिच्छता ५ कुष्टादिसंसर्गजान्रोगानाह प्रसंगाद्गात्रसंस्पर्शान्निःश्वासात्सहभोज
नात् सहशय्यासनाच्चापिवस्त्रमाल्यानुलेपनात् १ कुष्टंज्वरश्चशोषश्चनेत्राभिष्यंदएवच औपसर्गिकरोगाश्चसंक्रामंतिनरान्नरं
म्रियतेयदिकुष्टेनपुनर्जातोपिगच्छति तस्मात्कुष्टतरोरोगोयथाकुष्टंप्रकीर्तितं २ इतिकुष्टनिदानं अथकुष्टचिकित्साव्याख्यास्यामः
वातोत्तरेषुसर्पिर्वमनंश्लेष्मोत्तरेषुकुष्टेषु पित्तोत्तरेषुमोक्षोरक्तस्यविरेचनंविहितं प्रच्छनैर्वाजलौकाभिः शृगालाबुशिराव्यधैः स्नि
ग्धस्यमोक्षयेद्रक्तं दुष्टंकुष्टेपुनःपुनः २ स्नेहेरक्तेहृतेदोषेस्नेहैःसंशमितेनिले रसायनानिधात्राश्चप्रशस्ताःकुष्टिनांमताः ३
अथवमनं यवावासापटोलानांनिंबस्यफलिनीत्वचः कषायोमधुनापीतोवातिकृन्मदनान्वितः १ इतिवमनेपंचकषायः अथविरे
चनं विरेचनंप्रयोक्तव्यंत्रिवृद्दंतीफलत्रिकैः पक्षेमासिशिरामोक्षंप्रतिमासेविरेचनं प्रतिपक्षंचवमनंकुष्टेलेपंत्र्यहंचरेत् १ इतिवि
रेचनादि अथलेपाः पथ्याकरंजसिद्धार्थनिशावल्गुजसैंधवं विडंगसहितैःकुपिष्टैर्लेपमात्रेणकुष्टजित् १ दार्व्याकुष्टविडंगानि
शनाह्वाचित्रकंबला दंतीरसांजनंचेतिलेपःकुष्टविनाशनः १ मनःशिलालेमरिचानितैलमर्कःपयःकुष्टहरप्रदेहः करंज १८७
बीजैडगजंसकुष्टंगोमूत्रपिष्टंश्चपरःप्रदेहः १ बलिवेल्लाग्निभल्लातदंतीशाम्याकनिंबकैः कांजिकैःपेषितैर्लेपः श्वेतकुष्ट

विनाशकृत् १ श्वेतकरवीरमूलंकुटजकरंजत्वचोदार्व्याः सुमनःप्रवालयुक्तोलेपःकुष्टापहःसिद्धः १ शैलेयकंपिलुकयष्टिसाह्वसौराष्ट्रिकासर्ज 357/1936
रसोपलानि शिलचचूर्णौनवनीतयुक्तःकुष्टेष्ववत्यभ्यधिकःप्रदिष्टः १ रसगंधकयोःपिष्टिंकटुतैलेनभंगजैः द्रवैःसंमर्दनल्लेपात्सर्वकुष्टं
विनश्यति १ अथक्वाथः गुडूचीत्रिफलादर्वीक्वाथमुच्छेश्चवारिभिः त्वग्दोषव्रणशोफघ्नः पीतोमासंसगुग्गुलुः खदिरत्रिफलानिंबपटोला
मृतवासकैः अष्टकोड्पंजयेत्कोष्टानकंडुविस्फोटकानिच अथमहाकषायः शुंठीनिंबाकिरातातिक्तकणापाठाहरिद्राद्वयंचामृतात्रिफलाम्र
ताब्जकटुकावासावचावाकुची मंजिष्ठातिविषादुरालभमहानिंबाग्निपद्मग्रंथिकाव्याधिघातगजाचिभिंदासकुटजाभार्गीसमुस्तायवा मूर्वाचैवप
टोलपत्रसहितारक्तंतथाचंदनंश्यामापर्पटसारिवाकृमिहरागायत्रीसंयुता गोमूत्रेणमाह कषायमरुणोदितेपिबेद्यपुमान्रतस्याशुदाशयांति
नाशमपरान्कुष्टानिदुष्टान्यपि अथनवककषायः त्रिफलानिंबपटोलंमंजिष्ठारोहिणीवचारजनी एषकषायोभिस्तोनिहंतिकफपित्तजंकुष्टं
१ इतिक्वाथः अथखदिरोदकं प्रलेपोद्वर्तनोस्नानपानभोजनकर्मसु शीलितंखादिरंवारिसर्वत्वकदोषनाशनं दह्यमानःघृतःकुंभेसमूल
खदिरद्रवः साज्यधात्रीरसःक्षौद्रोहन्यात्कुष्टंरसायनं १ अथनिंबादिकल्कः निंबपत्रशतांपिष्ट्वानिंबामलकमेवच पंचैतानिचसूक्ष्मा
णिसमचूर्णानिकारयेत् अष्टभागावशेषेणखदिरासनवारिणा भावयित्वासंयोज्यद्रव्याण्येतानिदापयेत् चित्रकोथविडंगानिव्या
धिघातकशर्करा भल्लातकहरीतक्योशुंठ्यामलकगोक्षुराः चक्रदकवाकुचीपिप्पलीमरिचंनिशा लोहचूर्णसमायुक्तंसमभागप्रमाणतः
भावयेद्भृंगराजेनपुनःशुष्काणिकारयेत् निंबार्धचूर्णमेतेषांएकीकृत्यनिधापयेत् विडालपदमात्रंतुसर्पिषापिबा प्रातःप्रातनिषेवेतखदि
रासनवारिणा परिहारोनचित्रास्तिपंचानिंबेवतिष्ठति मासमात्रप्रयोगेनकुष्टंहंतिरसायणं त्वग्दोषनिखिलाव्यंगंतथैवतिलकालकान्
अष्टादशविधंकुष्टंसमंचैवमहाक्षयान् सर्वव्याधिविनिर्मुक्तोजीवेद्वर्षशतंसुखी १ अथउद्धूलनेसर्षपादिचूर्णं सर्षपकरंजरजनीदारु
निशादारुमंजिष्ठाः त्रिफलासटीपटीरश्चश्वेताम्रवाप्रियंगुकाः त्रिकटुत्रिगंधकेसरलाक्षाश्चैषांकृतंरजःश्लक्ष्णं उद्धूलनेनरक्तजपित्तज
वातोत्थितंवापि निर्सारभेदपिटिकंकायस्फुरनंविनाशयति अथविडंगादिचूर्णं विडंगत्रिफलाकृष्णाचूर्णंलीढंसमाक्षिकं हंतिकुष्टं
कृमीन्मेहान्नाडीदुष्टभगंदरान् १ इतिचूर्णानि अथगुटिका अथसर्वांगसुंदरीगुटिका भल्लातकसहस्रेकंत्रिफलावारिणीक्षिपेत्

श्री०२०

द्रोणमात्रेपचेत्तावद्यावत्पादावशेषितं शाकरामादशपलान्येकंवाकुचिकाफलं तथैवात्रेयदेयानिपलानिदशगुग्गुलुः खदिराशिष्टमंजिष्ठावी
जकंचेंद्रवारुणी चित्रकद्वेहरिद्रेचदेवदारुहरीतकी भार्गीवचेतिसर्वेषांप्रत्येकंचपलार्धकं प्रक्षिप्यगुटिकाकार्यानाम्नासर्वांगसुंदरी प्रत्यहंभ
क्षयेत्कुष्टी स्वेनांबदरमात्रया सर्वाण्येषोत्रकुष्टानिशीघ्रमेवव्यपोहति १ अथत्रिफलागुटिका त्रिफलारुष्करलोहैः सावल्गुजभृंगालांगली
व्योषैः सगुडैर्वराहकंदैःपलिकैरेकत्रसंमिश्रैः गुटिकाप्रकल्प्यखादेद्धरेकैकामभ्रसंभिनांभानः कुष्टदद्रुकिलासंजित्वावर्षैपसर्वथापलितं
जीवतिवर्षशतंवेदीमकुताशोयुवेवसोत्साहः १ अथैकविंशतिकोगुग्गुलुः चित्रकत्रिफलाव्योषमजाजीकारवीवचाः सैंधवातिविषा
कुष्टंचव्यैलायावश्कजं विडंगान्यजमोदंचमुस्तान्यमरदारुच यावत्येतानिसर्वाणितावन्मात्रंगुग्गुलुः संकुध्यसर्पिषासार्धंगुटिकांकारये
द्भिषक् प्रातर्भोजनकालेवाभक्षयेत्तुयथाबलं हंत्यष्टादशकुष्टानिकृमिदुष्टव्रणानपि ग्रहण्यर्शोविकारांश्चमुखामयगलग्रहान् गृध्रसी
मथभग्नंचगुल्मंचापिनियच्छति व्याधिकोष्टगतांश्चान्यान्जयेद्विष्णुरिवासुरान् १ अथत्रिफलामोदकः त्रैफलस्यतुचूर्णस्यपला
निदशपंचच समंचैवविडंगानांलोहचूर्णपलद्वयं शतंभल्लातकानांचपलानिदशवाकुची शिलाजतुपलार्धंतुद्वेपलेगुग्गुलोस्तथा प
लंपुष्करमूलस्यपलार्धंत्रिवृतस्यच सचित्रकंसमरिचंपिप्पलीविश्वभेषजं त्वक्पत्रंकुंकुमंमुस्ताकार्षिकानुपकल्पयेत् यावत्येतानिचू
र्णानियावत्खंडंप्रदापयेत् पलिकान्मोदकान्कृत्वाप्रातरुत्थायभित्यशः एकैकंभक्षयेत्प्राज्ञोयथेष्टंचात्रभोजनं कुष्टान्यष्टादशानीहप्लीह
गुल्मभगंदरान् अशीतिर्वातजान्रोगान्चत्वारिंशच्चपैत्तिकान् विंशतिश्लेष्मिकांश्चापिसंसृष्टान्सान्निपातकान् शालक्यगतरोगांश्चशि
रोक्षिस्त्रगतांस्तथा कंठतालुगतांश्चैवजिह्वास्यानुपजिह्वक ऊर्ध्वंजत्रुगतेरोगेभुक्तस्योपरिदापयेत् शारीरंदापयेत्सर्वंमोदरंमध्यभोजने
निर्दिष्टरोगान्शमयेत्क्रियमाणंरसायणं १ अथावलेहः अथभल्लातकावलेहः निंबगोपारुण्यावृद्धीत्रायंतीत्रिफलाघनं पर्पटा
वल्गुजानंतावचाखदिरचंदनं पाठाशुंठीभार्गीवासाभूनिंबवत्सकंतथा श्यामेंद्रवारुणीमूर्वाविडंगानिविषानलं हस्तिपर्णामृता
द्वेकापटोलरजनीद्वयं कृतमालधसमाह्वशिरीषंचोंचटाफलं मंजिष्टालांगलीरास्नानक्तमालः पुनर्नवा दंतीबीजकसारश्चभृंगराज
कुरंटकं एतान्द्विपलिकान्भागान्जलद्रोणेविपाचयेत् अष्टभागावशिष्टंचकषायमवतारयेत् भल्लातकसहस्राणिक्षिपेढित्वाग्नेणभ

359 / 1936

सा चतुर्भागावशिष्टंतुकषायमवतारयेत् तौकषायौसमादायवस्त्रपूतौतुकारयेत् एकीकृत्यकषायौतौपुनरग्नावधिश्रयेत् गुडस्यैकतुलां
दत्वालेहवत्साधयेद्भिषक् भल्लातकसहस्रस्यतत्रबीजानिदापयेत् त्रिकटुत्रिफलामुस्तंविडंगंचित्रकंतथा चंदनंसैंधवंकुष्टंदीप्यकंचपलंप
लं चातुर्जातंचसंचूर्ण्यघृतभांडेनिधापयेत् सौगंधिकस्यदातव्यंचूर्णंपलचतुष्टयं महाभल्लातकाख्योयंमहादेवेननिर्मितः प्राणिनांतु
हितार्थायनाशयेच्छीघ्रमेवच श्वित्रमौडुंबरंदद्रुकक्षाजिह्वंसकालकं पुंडरीकंचचर्माख्यंविस्फोटंरक्तमंडलं ऋक्षकापालिकंकुष्टंपामां
चापिविपादिकां वातरक्तमुदावर्तंपांडुरोगंचमीक्रिमीन् अर्शांसिषट्प्रकाराणिश्वासंकासंभगंदरं अनुपानेनदातव्यंछिन्नतोयेन
तंभिषक् भोजनेनसदापोन्यस्यछंचाम्लंविशोषनः अनन्यापिचकुष्टानिनाशयेन्नात्रसंशयः १ इतिमहाभल्लातकावलेहः अ
थशशांकलेखादिलेहः सशांकलेखासविडंगसारासपिप्पलीकासकृताशम्ला सायोमलासमलकासतैलसर्वाणिकुष्टानिनि
हंतिलीढा १ अथधात्र्यावलेहः धात्र्याक्षपथ्यासविडंगवह्निभल्लातकावल्गुजलोहभृंगाः भागाभिवृद्ध्यास्तिलतैलमिश्रैःसर्वा
णिकुष्टानिनिहंतिलेहः १ अथघृतानि अथतिक्तषट्पलघृतं निंबपटोलंदार्वीदुरालभातिक्तकरोहिणीत्रिफलाकुर्यादर्धपला
शान्पर्पटकंत्रायमाणांच सलिलाढकसिध्यानांरसेष्टभागस्थितेप्रते चंदनकिराततिक्तकमागधिकात्रायमाणांच मुस्तंवत्सक
बीजंकल्कीकृत्यार्धकार्षिकान्भागान् नवसर्पिषश्चषट्पलमेतात्सिद्धंघृतंपेयंकुष्टज्वरगुल्मार्शोग्रहणीपांड्वामयान्हंतिपामा
विसर्पपिटिकाकंडूगंडव्रणान्सद्यः १ अथपंचतिक्तकंघृतं निंबपटोलंव्याघ्रीचगुडूचीवासकंतथा कुर्याद्दशपलान्भागानेकक
स्यसुकुट्टितान् जलद्रोणेविपक्वंयावत्पादावशेषितं घृतप्रस्थंपचेत्तेनत्रिफलागर्भसंयुतं पंचतिक्तमितिख्यातंसर्पिःकुष्टविना
शनं अशीतिंवातजान्रोगान्चत्वारिंशच्चपैत्तिकान् विंशतिश्लेष्मकांश्चैवपानादेवापकर्षति दुष्टव्रणकृमीनर्शःपंचकासां
श्चनाशयेत् १ अथमहातिक्तकंघृतं सप्तच्छदप्रतिविषाशम्याकंतिक्तरोहिणीपाठां मुस्तामुशीरंत्रिफलांपटोलंपिचुमर्दपर्पटं
धन्वयवासकचंदनमुपकुल्यापद्मकरजन्यौच षड्ग्रंथासविशालांशतावर्यासारिवाचंभे वत्सकबीजंवासांमूर्वाममृतांकिरात
तिक्तकंच कल्कान्कुर्यान्मतिमान्यष्ट्याह्वंत्रायमाणांच कल्कस्यचतुर्भागोजलमष्टगुणंरसोमृतफलानां द्विगुणोघृतात्प्रदेयतस्म

र्पिः प्राज्ञायेत्सिध्यं कुष्ठानिरक्तपित्तंवलान्यर्शांसिरक्तावाहिनी विसर्पमम्लपित्तंवातास्रकपांडुरोगंच विस्फोटकान्सपामानुन्मादंकामृ
लांज्वरंकंडूंहृद्रोगगुल्मपिटिकांभगंदरंगंडमालांच छर्द्यादेनत्मद्यः पीतंकालेयथाबलंसर्पिः योगशतैरन्यैरणजितान्महाविकारान्महातिक्त
१ अथमहाखदिरघृतं खदिरस्यतुलाः पंचशिंशिपासनयोस्तुले तुलार्धंसर्वएवैतेकरंजारिष्टवेतसाः पर्पटःकुटजश्चैववृषःकृमिहर
स्तथा हरिद्रेकृतमालश्चगुडूचीत्रिफलात्रिवृत सप्तपर्णश्चसंक्षुण्णंदशद्रोणेषुवारिणा अष्टभागावशेषंतुकषायमवतारयेत धात्री
रसंचतुल्यांशंसर्पिषश्चाढकंपचेत महातिक्तककल्कैस्तुयथोक्तैःफलसंमितैः निहंतिसर्वकुष्ठानिपानाभ्यंगनिषेवणात महा
खादिरमित्येतत्परंकुष्ठविकारनुत १ अथतैलानि अथचित्रकादितैलं शुभ्रसाकरवीरस्यरसोरक्तंचचित्रकं निरभिःपाचितं
तैलंअभ्यंगात्कुष्ठनाशनुत १ अथवज्रतैलं सप्तपर्वकरंजार्कमालतीकरवीरजाःमूलजाः मूलंस्नुहीशिरीषाभ्यांचित्रकास्फो
टकोरपि करंजबीजंत्रिफलांत्रिकटुंरजनीद्वयं सिद्धार्थकंविडंगंचप्रपुन्नाटंसमंहरेत मूत्रपिष्टैःपचेत्तैलमेभिःकुष्ठविनाशनं अभ्यं
गाद्वज्रकंनामनाडीदुष्टव्रणापहं १ अथमंजिष्ठादितैलं मंजिष्ठारुग्निशाचक्रमदारग्वधपल्लवैः तृणकस्वरसेसिद्धंतैलं
कुष्ठहरःकटु १ इतितैलानि अथासवः अथखदिरासवः खदिरस्यतुलार्धंतुतत्तुल्योदेवदार्वपि वरायाविंशतिर्दार्व्या
पलानांपंचविंशतिः बाकुच्याद्वादशपलान्यष्टद्रोणेंभसःपचेत द्रोणशेषेकषायेतुप्रलशेषेविनिक्षिपेत धानक्याविंशति
पलंमाक्षिकस्यशतद्वयं शर्करायास्तुलामेकांचूर्णनीमानिदापयेत कंकोलकैलकगंधएलाजातिफलत्वचं केशरमरिचंपत्रं
पलिकान्युपकल्पयेत पिप्पलीनांतुकुडवंस्थापयेत्घृतभाजने मासार्द्धंपिबेन्मात्रामपेक्ष्यबलाबल सर्वकुष्ठहरोह्येषपांडुहृद्रो
गकासनुत कृमिग्रंथ्यर्बुदग्रंथिगुल्मप्लीहोदरांतकृत एवंखदिरारिष्टकृच्छत्रयेणप्रजितः १ अथकनकारिष्टः खदिरकषा
यंद्रोणंसर्पिःकुंभेनिधापयेन्मध्ये पलिकामात्राक्षिप्यांकृत्वातुनानंवस्त्रस्यचूर्णंत त्रिफलात्रिकटुककटुरजनीकनकत्वकबाकु
चीगुडूचीच सुविडंगमात्रमधुपलशतद्वयप्रक्षिपेत्सर्वं धानक्याश्चपलान्यष्टौकार्यंचास्मिन्प्रदेयानि प्रातःप्रातस्तुपिबेन्नाशा
यातिविरोस्थितंकुष्ठं मासेनसर्वरोगान्निहंतिचशोफमेहांश्च निर्जितकासश्वासोगुदकीलभगंदरैर्विमुक्तः कनकारिष्टंपिबन् १२२

361
1936

भवतिपुमान्कनककांतिश्च १ इत्यासवः अथदद्रुचिकित्सामाह कासमर्दकमूलानिसौवीरेणतुपेषयेत दद्रुकिटकुंभेष्टानिजवेदैतल्लेपनात
बीजानिवास्तेपमूलकानांलाजारजन्योप्रपुन्नाटबीजं श्रीवेष्टकव्योषविडंगकुष्ठंपिष्ट्वाथमूत्रेणविलेपनंस्यात १ दद्रुसिध्मांकिटिभानिपा
मांकपालकुष्ठंविषमंचहन्युः २ आरग्वधस्यपत्राणिआरनालेनपेषयेत दद्रुकिटिभकुष्ठानिहंतिसिध्मसंशयं प्रपुन्नाटस्यबीजानिधात्री
सर्जरसस्नुही सौवीरपिष्टंदद्रूणामेतदुद्वर्तनंपरं १ दूर्वाभयासैंधवचक्रमर्दकुष्ठेरकाकांजिकतक्रपिष्टैः त्रिभिर्विलेपैरपिबद्धमूलंदद्रूंचकंडूंचवि
नाशयंति १ विडंगैडगजाकुष्ठनिशासिंधवसर्षपैः धान्याम्लपिष्टैर्लेपोयंदद्रुकुष्ठविनाशनं १ अथलघुमरिचाद्यंतैलं मरिचारशिलादार्क
पयोश्मारिजटात्रिवृत शकृद्रसविशालारुनिशायुग्दारुचंदनैः कटुतैलपचेल्लस्थ्यक्षपविषपलान्विते सगोमूत्रंतदभ्यंगाद्दद्रुश्वित्रविनाशन
त १ अथदरदादिलेपः दरदगंधकपारदपिप्पलीविषविडंगनिशाग्निमरीचकं भमयसुंठिघनाब्धिकबाकुचीकुडनपद्मसमेडगजान्वितं सम
मिदंखलुनिंबुरसैर्युतंहरतिदद्रुजकंडुविसर्पनुत हारतिलस्तभगंदरमंडलंतनुविलिप्तमहोक्षणतोत्वणां १ अत्रअन्यान्यपीक्षमेलयेत गह्ले १
कचोरे १ आवंहलद १ आवलकाठी १ निरडमुत १ कृतजिवंमाणि १ करंजबीज १ वाहवाचामगज १ निंबावापात्याचारस १ इतिदरद
दिलेपः इतिदद्रुचिकित्सा अथचर्मारव्यचिकित्सा सतगंधकयोःपिष्ट्वाकज्जलींकांविभायच म्रक्षणेनविमर्द्याथकरित्वग्लेपनेहितां कवाव
गेरिगदत्तश्मजीरवलीभिवंकर्षमिदं पृथक शिलाबलातौरविकर्षसंस्थैःसार्धौविभागःकिलपारदस्य कर्षैश्चविंशत्प्रमितैर्घृतस्यसर्वंविमर्द्यकि
लताम्रपात्रे ततोगलेपात्रिदिनंचलीशंहरेज्वरोगीगजकर्णपामां गुंजाचित्रकशंखभस्मरजनीदूर्वाभयालांगलीस्नुकसिंधक्षकुमारिकाजल
धरार्कक्षीरधूमेशाजैः वल्गुरडगजाविडंगमरिचक्षौद्रैश्चसारीयुतैः कार्यंवेगजचर्मदद्रुकसाकंडूघ्नमुद्वर्तनं २ आरग्वधदलैःपिष्टैःले
पःकांजिकयुक्कृतः करोत्यदद्रुकुष्ठानिहंतिपामांविचर्चिकां २ इतिचर्मारव्यचिकित्सा अथकिटिभचि० चक्रांकबीजंस्नुकक्षीरभा
वितंमूत्रसंयुतं रविवर्त्तसकदंचलेपनंकिटिभापहं १ पिप्पलीप्रतिकायास्यात्कृष्णगोपित्तचित्रकैः लेपंसम्यक्प्रशांसंतिकिटिभघ्नंचिकि
त्सकः १ गोमूत्रवारिसंपिष्टैःशिवाकाशीसतुत्थकैः लेपःकुकिटिभवीसर्पकुष्ठनाशायप्रजितः १ अथसिध्मचिकित्सा धात्रीफलसंज
रसोयावश्कस्त्वित्रयं सौवीरपेषितंसर्वंसिध्मस्थलविदारणं सिरवरीरसेनसुपिष्टंमूलकबीजंप्रलेपनःसिध्मं क्षारेणकदल्यावारजनीमि

यो०र० श्रेणनाशयति १ कुष्टंमूलकबीजंप्रियंगवः सर्षपाश्चुरालंभं एतत्केरसपिष्टंनिहंतिचिरकालजंसिध्मं १ गंधपाषाणमिश्रेणयवक्षारेणलेपितं सि
ध्मंनाशमुपैत्याशुकटुतैलेयुतेनच १ कासमर्दकबीजानिमूलकानांतथैवच गंधपाषाणमिश्राणिसिध्मानांपरमौषधं १ बीजंमूलकजंनिंबपत्रा
णिसितसर्षपाः गृहधूमंचसंपिष्ट्वजलेनांगंप्रलेपयेत् १ उद्वर्तनंनवनीतेनक्षालयेदुष्णवारिणा महाध्नेनसिध्मानिसाम्यंत्याशुशरीरिणां १
लाक्षाश्रीवेष्टकंकुष्टंहरिद्रागौरसर्षपाः श्यामूलकबीजानिप्रपुन्नाटफलानिच एतान्यत्रप्रतिष्ठानिकुष्टेषुद्वर्तनंपरं सिध्मानांकिटिभानांच
दद्रूणांचविशेषतः कार्पासिकापत्रविमिश्रकाकजंघाकृतोमूलकबीजयुक्तः तक्रेणलेपः क्षितिपुत्रवारेसिध्मानिसद्योनयतिप्रणाशं गोमूत्रे
णाथतक्रेणजीर्णसौवीरकेणवा पिष्टमूलकबीजानालेपनात्सिध्मनाशनं १ इतिसिध्मानि अथविपादिका धत्तूरबीजकल्केनमाणकक्षा
रवारिणा कटुतैलंविपक्वंतुदहन्यादिपादिकं मुंडीरसेनसंसिक्तंघृतंहंतिविपादिकां १ अथपामाकंडूकच्छुविसर्पविस्फोटचर्मविचर्चिका
चिकित्सा सिंदूरजीरद्वयराजियुग्ममनःशिलावह्निजगंधकानां रसान्वितानांघृतयोजितानांपामाव्रजेन्नूनमिहप्रलेपात् १ सैंधवंचक्र
मर्दंचसर्षपांपिप्पलीतथा सेचमंदारनालेनपामाकंडूविनाशनं १ अथजीरकतैलं जीरकस्यपलंपिष्ट्वासिंदूरार्धपलंतथा कटुतैलंपचेत्ताभ्यां
सद्यःपामाहरंपरं रक्षवेधोपदंनेपाच्यंतैलंपलाष्टकं अथबृहत्सिंदूराद्यंतैलं सिंदूरंचंदनंमांसिविडंगंरजनीद्वयं प्रियंगुपद्मकंकुष्टं
मंजिष्ठाखदिरंवचा जात्यर्कत्रिवृतानिंबकरंजंविषमेवच कृष्णाचित्रकलोध्रंचप्रपुन्नाटंचसंहरेत् श्लक्ष्णपिष्टानिसर्वाणियोजयेत्तैलमात्र
या अभ्यंगेनप्रयोज्यंतद्दुर्णकुष्टनाशनं पामाविचर्चिकाकच्छुविसर्पविषमेवच रक्तपित्तोत्थितान्हंतिरोगानेवविधान्बहून् सिंदूराद्य
मिदंतैलंअश्विभ्यांनिर्मितंपुरा १ अथबृहन्मरीचाद्यंतैलं मरीचंत्रिवृतादंतीक्षीरमार्कंसकृद्रसः देवदारुहरिद्रेद्वेमांसिकुष्टंचंसदनं
विशालाकरवीरंचहरितालंमनःशिला चित्रकोलांगलाख्याचविडंगंचक्रमर्दकं शिरीषकुटजोनिंबसप्तपर्णास्नुहाम्रता शम्याकोनक्त
मालोब्दः खदिरःपिप्पलीवचा ज्योतिष्मतीचपलिकाविषस्यार्द्धपलंभवेत् आढकंकटुतैलस्यगोमूत्रंतुचतुर्गुणं मृत्पात्रेलोहपात्रेवाशनै
र्मृद्वग्निनापचेत् पक्वतैलवरंह्येतन्म्रक्षयेत्कौष्टिकाव्रणात् पामाविचर्चिकाकंडूदद्रुविस्फोटकानिच वलयःपलितंछायांनीलाव्यंगंतथै
वच अभ्यंगेनप्रणश्यंतिसौकुमार्यंचजायते १ अथमाहेश्वरघृतं कृत्वाकज्जलिकांरसेनमनःशिलाद्वेजीरकेद्वेनिशेगोनंदोषणनागपु

ष्पिकाचाकुचिकासर्पिषा लोहेलोहविमर्दितंदृढतरंमाहेश्वराख्यंघृतं कंडूकुष्टविचर्चिकादिशमनंपामाहरंलेपनात् मांसीचंदनशम्याककर
जारिष्टसर्षपं यष्टीकुटजदार्वीभिर्हंतिकंडूमयंगणः १ अथजीरादियोगनयनसुखग्रंथात् जीरान्मीरामनःशिलपारातुल्यंसगंधिकंसिंदू
रंतिला समितिलकरघीवसमानातिस्रेपाख जीरजाणा १ आवल्गुजंकासमर्दंचक्रमर्दंनिशायुतं मणिमंथेनतुल्यांशमस्तुकांजिकपेषितं कंडु
कच्छुजयत्युग्रांसिध्मएषप्रयोगराट् १ कोमलसिंहास्यदलंसनिशंसुरभिजलसंपिष्टं दिवसत्रयेणनियतंशमयतिकच्छुंविलेपनतः १ हरिद्राक
ल्कसंयुक्तंगोमूत्रस्यपलद्वयं पिबेन्नरःकमच्चारिकच्छूपामाविनाशनं १ गंधपाषाणचूर्णंतुकटुतैलेनयोजितं लेपनाद्दपनाद्वाकच्छूपामाविना
शनं १ अथसिंदूरादितैलं सिंदूरगुग्गुलुसारजनसिक्थतुत्थैकल्कीकृतैः कटुतैलमिदंसुपक्वं कच्छूश्ववत्सिटिकिकाकमापवादिशुक्लाभ्यंग
नेनकुष्टस्रवतिप्रसह्य १ अथार्कतैलं अर्कपत्ररसेपक्वंरजनीकल्कसंयुतं कटुतैलंहरेत्तूर्णंमामात्ककच्छूविचर्चिकां १ राजिकागुडयुक्तेनसे
धवेनप्रलेपितं विजलंचर्मणावध्नाशंचमर्दलंव्रजेत् १ अथरसः अथविजयेश्वरोरसः शुद्धतालंम्रतंस्तंतुल्यंताभ्यांचतुर्गुणं भर्जित्वा
विजयाभ्यांसर्वतुल्यंगुडंक्षिपेत् श्वेतकुष्टहरकुष्टरसोयंविजयेश्वरः दार्वीखदिरनिंबानांक्वाथंतदनुपाययेत् इत्यष्टादशकुष्टचिकित्सा
अथश्वित्राण्याह श्वित्रिणोहृतदोषस्यहृतरक्तस्यवासकृत् खदिरांबुयवान्नानांतभस्यमलपूरसः सगुडःशस्यतेपानेयवाग्मंडभोजनः
१ खदिरामलककषायंबाकुचिबीजान्वितंपिबेन्नित्यं शंखेंदुकुंदधवलांश्वित्रंहंतीहतन्नचित्रं १ शिलापामार्गभस्मानिलेपाच्छ्वित्रंविनाश
येत् किंपुनर्यदियुज्येतधनंजयजटात्वचा त्रिफलानीलिनीपत्रलोहचूर्णंस्सांजनं ज्वलंगुंजादितिदग्धभस्मतुल्यंचमार्कव मेषीदुग्धेनसंपि
ष्टंस्थापयेल्लोहभाजने दिनमेकंततोलिंपेन्मुहुःश्वित्रेषनुक्रमात् श्वित्राण्यनेनलेपेनभिजवर्णान्यजंति साधोरजः कुष्टतिलांजनानिसव
कुजान्यामलकानिजग्ध्वा पिष्टानिभृंगरसेनहन्यात्किलासपरिघ्नलेपात् १ अथविषतैलं नक्तमालहरिद्रे द्वे अर्कतगरमेवच कु
रवीरवचाकुष्टमास्फोतारक्तचंदनं मालतीसप्तपर्णंचमंजिष्ठासिंधुवारिका एषामर्धपलान्भागान्विषस्यार्द्धपलंभवेत् चतुर्गुणेगवांमूत्रे
तैलप्रस्थंविपाचयेत् श्वित्रविस्फोटकिटिभकीटलूताविचर्चिकाः कंडूकच्छूविकारस्ययंत्रणाविषदूषिताः विषतैलमिदंनामसर्वव्रणविशो
धनं अथज्योतिष्मतीतैलं मयूरकक्षारजलेसप्तकृत्वःपरिस्रुतं सिद्धंज्योतिष्मतीतैलंअभ्यंगाच्छ्वित्रनाशनं १ अथशाविलेरवावटि ॥

363/1936

यो०२

१८१

अथस्तंसमंगंधंतुल्यंचम्लताम्लकं मर्दितंबाकुचीकाथेर्दिनैकंवटकीलुतं निष्कमात्रंसदाखादेत्श्वित्रभिंशाशिलेखिकां बाकुचीतैलकर्षं कंसक्षौद्रमनुपाययेत् १ अथपथ्यापथ्यविधिः यक्षापक्षाच्छर्दनानिमासात्मासाद्विरेचनं नस्यंत्र्यहात्त्र्यहात्मासात्षट्पष्टेरक्तमोक्षणं १ सफिले पोविः शोसन्नायवगोधूमशालयः मुद्गाढकीमसराश्चमाक्षिकंजांगलामिषं २ आषाढफलवेत्राग्रंपटोलंबृहतीफलं काकमाचीनिंबपत्रं लक्ष्मनांहिलमाचका पुनर्नवामेषशृंगीचक्रमर्दक्लानिच भल्लातकंपक्कतालंखदिरश्चित्रकोवरा ४ जातीफलंनागपुष्पंकुंकुमंश्रत्ननंहविः क्रो शातकीकरंजौचातिलसर्षपनिवजं ५ तैलंतदुक्तमुदोलंवलपन्यनानियानिच सहसंरलदेवाह्वाशिशपागुरुसर्वदा ६ मूत्राणिगोखरोष्ट्र श्वमहिषीजनितानितानिच कस्तूरिकागंधसारातिकानिक्षारकर्मच ७ यथादोषंसमस्तानिपथ्यान्येतानिकुष्ठिनां ८ स्वेदव्यवायंवमि वेगभिक्षंव्यायाममम्लानितिलांश्चमाषान् अन्नपमांसंदधिदुग्धमद्यंगुडंचकुष्ठमापिनित्यंजेयुः ९ योगरत्ने अन्नपानंहितेकुष्टेन त्वम्ललवणोषणं दधिदुग्धगुडांश्चापितिलमाषांस्त्यजेन्नरः १ इतिपथ्यापथ्यं इतिकुष्ठश्वित्रचिकित्सासमाप्ता अथशीतपित्त निदानं तस्यदोषत्रयस्यजन्यत्वमाह शीतमारुतसंस्पर्शात्प्रदुष्टौकफमारुतौ पित्तेनसहसंभूयबहिरंतर्विसर्पतः १ तस्यरूपमाह पिपासारुचिहल्लासदाहोसुमांगगौरवं रक्तलोचनतातेषांपूर्वरूपमितिस्मृतं २ अस्योक्तेविदुर्दर्ददनितमाह वरटीदष्टसंस्थानः शोथःसंजायतेबहिः सकंडुतोदबहुलंछर्दिज्वरविदाहवान् ३ उदर्दइतितंविद्याच्छितपित्तमथापरं ४ अनयोःभेदमाह वाताधि कंशीतपित्तमुदर्दस्तुकफाधिकं ५ उदर्दस्यधर्मांतरमाह सोत्संगैश्चसरागैश्चकंडुमद्भिश्चमंडलैः शोशिरःकफजोव्याधिरुदर्दः परिकीर्तितः ६ त्वग्दोषसामान्यादत्रैवकोष्ठःप्रोच्यते असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः आरनालैश्चसक्तैश्चआसुरी लवणेनच वर्षाकालेप्रकुप्येततथादुष्टैश्चकारणैः ८ मंडलानिसकंडूनिरागवंतीबहूनिच उत्कोठःसानुबंधश्चकोठइत्यभिधीयते ९ इतिशीतपित्तनिदानं अथैषांचिकित्सा अभ्यंगःकटुतैलेनस्वेदश्चोष्णेनवारिणा तथाशुवमनंकार्यंपटोलारिष्टवासकैः १ १८१
त्रिफलापुरकृष्णाभिर्विरेकश्चप्रशस्यते सर्पिःपीत्वामहातिक्तंकार्यंशोणितमोक्षणं १ सक्षारसिंधुतैलैश्चगात्राभ्यंगंप्रकल्पयेत् १ गंभारिकाःफलंपक्कंशुष्कंतुस्वेदितंपुनः क्षीरेणशीतपित्तघ्नंखादितंपथ्यसेविना १ यष्टीमधुकपुष्पंचसरास्नाचंदनद्वयं निर्गुं

डीसकणाक्वाथंशीतपित्तहरंपिबेत् अमृतारजनीनिंबधनापासैः पृथक्शृतं प्राणिनांप्राणदंतेनशीतपित्तेसमाचरेत् सगुडंदीप्यकंयस्तु खादेत्पथ्यान्नभुङ्नरः तस्यनश्यतिसप्ताहादुदर्दःसर्वदेहजः १ यवानीपाययेद्वापिसव्योषांक्षीरसंयुतं पिप्पलीवर्धमानंवालक्षौनंवाप्रयोज 365/1736
येत् अग्निमंथभवंमूलंपिष्टंपीतंचसर्पिषा शीतपित्तोदर्दकुष्ठंसप्ताहादेव्नाशयेत् १ निंबस्यपत्राणिसदाघृतेनधात्रीविमिश्रान्यथवाप्र युंज्यात् विस्फोटकोष्ठक्षतशीतपित्तंकंडूस्रपित्तंसकलानिहंति १ कुष्ठंहरिद्रेसुरसंपटोलंनिंबाश्वगंधेसुरदारुशिग्रुः ससर्षपंतुंबरु धान्यकत्वंकंडवचूर्णानिसमानिकुर्यात् तैस्तक्रपिष्टैःप्रथमंशरीरंतैलाक्तमुद्वर्तनयेद्यनेन तथासकंडूःपिटिकासकोठाकुष्ठानिशोफ श्चशमंव्रजंति १ ससैंधवेनकोष्ठेनसार्षपेणाचरेत् सुरसास्वरसैर्वाथलेपयेत्परमौषधं सिद्धार्थरजनीकुष्ठप्रपुन्नाडतिलैःसह क टुतैलेनसंमिश्रमेतदुद्वर्तनंहितं शीतपित्तमुदर्दंचतथाकोष्ठाभिदंगदं कृमिदद्रुहरःकार्यःशीतपित्तेखिलक्रमः १ स्निग्धस्विन्नस्य संशुद्धिमादौकोष्ठेसमाचरेत् ततःकुष्ठहरःसर्वोविधेयोविधिरादरात् १ अथपथ्यापथ्यविधिः छर्दिविरेककालेपोस्रग्मोक्षोजी र्णशालयः जांगलेरामिषैमुद्गैःकुलत्थैर्वाकुलीरसः १ कर्कोटकंकारवेल्लंशिग्रुमुपोदकानिच शालिंचशाकंवेनाग्रंदाडिमंत्रिफ लामधु २ कटुतैलंतप्तनीरंपित्तश्लेष्महराणिच कटुतिक्तकषायाणिसर्वाणीतिगदःसदा ३ शीतपित्तोदर्दकोष्ठरोगिणांपथ्यमीरितं स्नानंविरुद्धाशनमातपश्चस्निग्धंतथाम्लंमधुरंव्यवायः गुर्वन्नपानानिचशीतपित्तेकोष्ठेशमयेद्दर्दवतांविषाणिः ४ इतिपथ्यापथ्यं इतिशीतपित्तादिचिकित्सासमाप्तः अथाम्लपित्तनिदानंतस्यसंप्राप्तिमाह विरुद्धदुष्टाम्लविदाहिपित्तप्रकोपपानान्नभुजोवि दग्धं पित्तंस्वहेतुपचितंपुरायत्तदम्लपित्तंप्रवदंतिसंतः १ तस्यलिंगमाह विपाकक्लमोत्क्लेशतिक्ताम्लोद्गारगौरवैः हृत्कंठदाहरु चिभिश्चाम्लपित्तंवदेद्भिषक् २ तस्यकदाचिदधोगतिमाह तृड्दाहमूर्छाभ्रममोहकारीप्रयात्यधोवाविविधप्रकारं हृल्लासकोठा नलसादहर्षस्वेदांगपीतत्वकरंकदाचित् विशेषेणोर्ध्वगतमाह वांतंहरित्पीतकनीलकृष्णमारक्तरक्ताभवतीवचाम्लं मत्स्योद काभंत्वतिपिच्छलाभंश्लेष्मानुयातंविविधंरसेन ४ भुक्तेअभुक्तेअवस्थामाह भुक्तेअभुक्तेप्यथवाप्यभुक्तेकरोतितिक्ताम्लवमिं कदाचित् उद्गारमेवंविधमेवकंठेहृत्कुक्षिदाहंशिरसोरुजंवा ५ तत्कफपित्तवत्सामान्यमाह करचरणदाहमुष्णसहनिमरुचिं

यो०र०

ज्वरंचकफपित्तं कंडूमंडलपिडिकाचितगात्ररोगचयं ६ साध्यासाध्यत्वमाह रोगोयमम्लपित्ताख्यो यत्नात्संसाध्यतेनवा चिरोत्थितोभवेद्या
प्य:कृच्छ्रसाध्य:सकस्यचित् ७ तस्मिन्ननिलकफसंसर्गमाह सानिलंसानिलकफंसकफंतच्चलक्षयेत् दोषलिंगेनमतिमान्भिषग्मोहकरं
हितत् ८ तत्र अनिलगतमाह कंपप्रलापमूर्छाभ्रमचिमिगात्रावसादशूलानि तमसोदर्शनमंधकारप्रविष्टस्येवासंविन्ति: ९ कफानुगतमा
ह कफनिष्ठीवनगौरवजडतारुचिशीतसादवमिलेपा: दहनबलसादकंडूनिद्राचिह्नंकफानुगतेभवति १ वातश्लेष्मानुगतमाह उभयमिद
मेवचिह्नंमारुतकफसंभवंत्वम्ले असाध्यमाह भ्रमोत्क्लेशारुचिच्छर्दिरालस्यंचशिरोरुजा प्रसकोमुखमाधुर्यमसाध्यंतद्वदेद्भिषक् ११ इतिअ
म्लपित्तनिदानं अथातोम्लपित्तचिकित्सांव्याख्यास्याम: आम्लपित्तेतुवमनंपटोलारिष्टवारिणा कारयेन्मदनक्षौद्रसैंधवयुक्तंततोभिषक्
विरेचनंत्रिवृच्चूर्णंमधुनात्रिफलद्रवै: १ कृतवमनविरेकस्यापिदोषोच्छ्रांतिर्भवतिनयदिकायेरक्तमोक्षस्थयुक्तया: कृतशिशिरविलेपस्याम्ल
पित्तप्रभस्योस्तिसमुदितत्संवर्णतरक्षाचकार्या १ अथलवणोत्सवात ज्वलंतमिवचात्मानंमन्यतेयोम्लपित्तवान् तस्यसंशोधनंपूर्वंकार्यं
पश्चाच्चभेषजं १ पूर्वंतुवमनंकार्यंपश्चान्मृदुविरेचनं कृतवांतिविरेकस्यसुस्निग्धस्यानुवासनं आस्थापनंचिरोत्थेस्मिन्देयंदोषाद्यपेक्षया
दोषसंसर्गकंकार्यमौषधाहारकल्पनं ऊर्ध्वंदेहाच्छिन्नंवांत्याप्यधश्चरेचनैर्हरेत् पाचनंतिक्तविहितंपथ्यंचपरिकल्पयेत् विकारान्यवगो
धूमकृतांस्तीक्ष्णविवर्जितान् भक्षयेल्लाजसक्तूंश्चसिताक्षौद्रयुतांपिबेत् १ अथवंदात आम्लपित्तेप्रयोक्तव्य:कफपित्तहरोविधि: गुडकू
ष्मांडकंचैवतथाखंडामलक्यपि गुडक्षीरकणासिद्धंसर्पिस्त्रप्रयोजयेत् सवातेसविबंधेस्मिन्हिताकंसहरीतकी १ अथक्वाथ: यवकृष्णा
पटोलानांक्वाथंक्षौद्रयुतंपिबेत् नाशयेदम्लपित्तंच अरुचिंचवमिंतथा १ निस्तुषयववृषधात्रीक्वाथंत्रिसुगंधिमधुयुतंपीत्वा अपहरति
म्लपित्तंयदिभुंक्ते मुद्गयूषेण भृङ्गदूर्वीचित्रकारिष्टपटोलै:क्वथितंपिबेत् क्षौद्रयुक्तंनिहंत्येतच्छर्दिपित्ताम्लसंभवं १ अनिंबनिंबत्रिफलापटोल
साम्रतापर्पटमार्कवाणां क्वाथोहरेत्क्षौद्रयुतोम्लपित्तंचित्तंयथावारवधूकटाक्ष: १ पटोलत्रिफलानिंबक्वाथंक्षौद्रयुतंपिबेत् आम्लपित्तज्वरच्छर्दि
दाहशूलकफान्वितं १ कंटारिकाम्रतावासाकषायंमधुसंयुतं आम्लपित्तंजयेत्पीत्वाश्वासकासवमिज्वरं १ चित्रकेरंडमूलानियवाश्चसयवास
का:जलेनक्वथितंपीतंकोष्ठदाहाम्लपित्तजित् १ इतिक्वाथा: अथएलादिचूर्णं एलातुगाचोचशिवाभयानांत्वग्ग्रंथिपाटीरदलालुकानां चूर्णं

सितातुल्यंकुप्याकरोतिप्रौढाम्लपित्तंदिवसस्यभुक्तं १ अथत्रिकटुकाद्यं चूर्णं लेह्यं त्रिकटुकसकंटकारीपर्पटवारिकुटजबीजानां सौराष्ट्रिकाप 367/1936
टोलीत्रायंतिदारुमूर्वाणां तिक्तामृणालमलयजकलिंगकेलाकिराततिक्तानां सवचातिविषाकेसरदीप्यकमधुशिग्रुबीजानां चूर्णंपटघृष्ट
मिदंपीतंशिशिरेणवारिणाप्रात: क्षौद्रेणचाथलीढंप्रायेणाथोगतंहंति अतिविषमम्लपित्तंपथ्यभुजोवासरै:कैश्चित् १ अथद्राक्षादिगुटि
द्राक्षापथ्येसमेकृत्वातयोस्तुल्यांसितांक्षिपेत् संकुट्यकारयेत्कर्षमितांनाम्लिंडिकारयेद्भिषक् तास्वादेदम्लपित्तार्त्तोहृत्कंठदहनापहं तद्वन्मूर्छा
भ्रममंदाग्निनाशिनीमामवाहृतां १ अथअभयाद्यवलेह: अभयापिप्पलीद्राक्षासिताधन्वयवासकं मधुनाकंठहृद्दाहतृट्छर्द्यम्लेभाम्लपित्तनु
त् १ अथखंडपिप्पल्यावलेह: योगरत्नावल्या: पिप्पल्या:कुडवंचूर्णंघृतस्यकुडवद्वयं पलंषोडशकंखंडाछतावर्यापलाष्टकं शिवाया:स्व
रसस्यापिपलषोडशकंमतं क्षीरप्रस्थद्वयंसाध्यंलेहीभूतेत्रनिक्षिपेत् त्रिजातकाभयाजाजीधान्यमुस्ताशिवातुगा एतेषांकार्षिकंचूर्णंकर्षार्धंकृ
ष्णजीरकं नागरंनागकंजानीफलंसमरिचंहिमं दत्वापलत्रयंक्षौद्रंस्निग्धभांडेविनिक्षिपेत् प्रातर्यथाबलंलिह्यादम्लपित्तप्रशांतये हृल्लासारोच
कछर्दिपिपासादाहनाशनं शूलहृद्रोगशमनंहृद्यंचैवरसायनं १ अथनारिकेलखंडपाक:योगरत्नावल्या: कुडवमितिमिहस्यान्नारिकेलंक
पिष्टंपलपरिमितसर्पि:पाचितंतुल्यखंडं निजपयसितदेतत्प्रस्थमात्रेविपक्वंगुडवदथसुशीतेशाणमात्रांक्षिपेच्च धान्याकपिप्पलिप
योदतुगाद्विजीरै:साकंत्रिजातमिभकेसरवद्विचूर्णं हंत्यम्लपित्तमरुचिंक्षयमस्रपित्तंशूलंवमिंसकलपौरुषकारिपुंसां १ अथगुडाद्योमोदक:
गुडपिप्पलिपथ्याभिस्तुल्याभिर्मोदक:कृत: पित्तश्लेष्महर:प्रोक्तोमंदाग्निंचनाशयेत् १ अथखंडकूष्मांड: कूष्मांडस्यरसग्राह्यंपलानांश
तमात्रकं रसतुल्यंगवांक्षीरंधात्रीचूर्णंपलाष्टकं सध्यग्निनापचेत्तावद्यावद्भवतिपिंडितं धात्रीतुल्यासिताभोज्याफलार्धंलेहयेदनु खंडकू
ष्मांडकंख्यातमम्लपित्तविपच्छकं १ अथमधुपिप्पलीयोग: पिप्पलीमधुसंयुक्ताम्लपित्तविनाशिनी जंबीरसरस:पीतोसायंहंत्यम्लपित्त
कं अथपिप्पलीघृतं पिप्पलीक्वाथकल्केनघृतंसिद्धंमधुप्लुतं पिबेत्प्रात:समुत्थायआम्लपित्तनिवृत्तये १ अथद्राक्षादिघृतं द्राक्षाभयाश
कपटोलपत्रै: सोशीरधात्रीयवचंदनैश्च त्रायंतिकापद्मकिराततिक्तै: कल्कै:पचेत्सर्पिरुपैतमेभि: भुंजीतमात्रांसहभोजनेनसर्व
गुणातेष्वम्लोपमंच १ अथशतावरीघृतं शतावरीमूलकल्कैर्घृतप्रस्थंपय:समं पचेन्मृद्वग्निनासम्यक्क्षीरंदत्वाचतुर्गुणं नाशयेदम्ल
पित्तंचवातपित्तोद्भवान्गदान् रक्तपित्तंतृषांमूर्छांश्वाससंतापमेवच १ अथनारायणघृतं जलेद्रोणेगुणेक्वाथापिप्पलीपलमष्टकं पाद

यो॰२० शोषंहरेत्काथंकाथतुल्यंघृतंक्षिपेत् अम्लपित्तहरंश्रेष्ठंघृतंनारायणंमहत् गुणक्षीरकणासिद्धंसर्पिश्चात्रापियोजयेत् १ अथरसः अथलीलाविला
सोरसः शुद्धसूतंसमंगंधंमृतताम्राभ्ररोचनं तुल्यांशंमर्दयेद्यामंरुध्वालघुपुटेपचेत् अक्षधात्रीहरीतक्याः क्रमवृध्याविपाचयेत् जलेनाष्ट
गुणेनैवयावदष्टावशेषकं अनेनभावयेत्पूर्वंपक्वंसूतंपुनः पुनः पुनः पंचविंशतिवारंचतावनाभृंगजद्रवैः शुष्कंतच्चूर्णितंखादेत्संचगुंजाम
१८३ धुप्लुतं रसोलीलाविलासोयमम्लपित्तंनियच्छति १ इतिलीलाविलासोरसवृंदात् अथरसाम्लनंवृंदात् त्रिकटुत्रिफलामुस्ताविडंगाश्चित्रकंत
था एषांसंचूर्णितानांतुप्रत्येकंतुपलंभवेत् कर्षद्वयंगंधकस्यतदर्धंपारदस्यच विडालपदमात्रंतुलिह्यात्तन्मधुसर्पिषा शीतोदकंचानुपि
बेत्क्रमात्वर्ज्यंपयस्तथा अम्लपित्तमग्निमांद्यंपरिणामरुजंतथा कामलांपांडुरोगंचहन्यादेतद्रसाम्लनं १ अथसूतशेखररसः सारसं
ग्रहात् शुद्धसूतंमृतंस्वर्णंटंकणंवत्सनागकं व्योषधुन्मत्तबीजंचगंधकंताम्रभस्मकं चातुर्जातंशंखभस्मबिल्वमज्जाकचोरकं सर्वंसमंवि
पेत्खल्वेमर्द्यंभृंगरसैर्दिनं गुंजामात्रंवटीकृत्वाद्विगुंजंतुमधुघृते भक्षयेदम्लपित्तघ्नंश्वासमंदाग्निनाशनः उग्रहिक्कामुदावर्तंदेहपाण्डुग
दः मंडलान्नात्रसंदेहः सर्वरोगहरः परः राजयक्ष्माहरःसाक्षाद्रसोयंसूतशेखरः १ अथपथ्यापथ्यविधिः ऊर्ध्वगेवमनंपूर्वमधोगेच्चवि
रेचनं सर्वत्रचाशनंपथ्यंनिरूहःआपिशालयः यवागोधूममुद्गाश्चपुराणारक्तशालयः जलानिनप्रशीतानिशर्करामधुसक्तवः क
र्कोटकंकारवेल्लंरंभापुष्पंचवास्तुकं वेत्राग्रंवृद्धकूष्मांडंपटोलंदाडिमंतथा २ पानान्नानिसमस्तानिकफपित्तहराणिच आम्लपित्तामये
निहन्यात् १ अथ रक्तजाचि० रक्तजे पित्तवत्सर्वं भोजनालेपसेवनं शीतोष्णोष्ण विन्यासो विशेषाद्रक्तमोक्षणं १ अथ क्षय
जाचि० क्षयजे क्षयनाशाय कर्तव्यो बृंहणो विधिः पानं नस्ये च सर्पिःस्याद्वातघ्नैर्मधुरैः शृतं योजयेत्सगुडं सर्पिर्घृतपुरांश्च
भक्षयेत् नावनं क्षीरसर्पिःश्चापनं च क्षीरसर्पिषोः क्षीरपिष्टैस्तिलैः स्वेदो जीवनीयैश्च शस्यते १ अथ कृमिजाचि० कृमिजे
तु शिरोरोगे व्योनकाह्वशिग्रुजैः अजामूत्रेण संपिष्टैर्नस्यं कृमिहरं परं अथ विडंगादितैलं विडंगस्वर्जिकादंतीहिंगुगोमू
त्रसंयुतं विपक्वं सार्षपं तैलं कृमिघ्नं नस्यतः स्मृतं १ अथ सूर्यावर्तार्धावभेदकयोश्चि० सूर्यावर्ते शिरोवेधो नावनं क्षीरस
र्पिषोः हितः क्षीरघृताभ्यासस्ताभ्यां सह विरेचनं १ भृंगराजरसश्छागक्षीरतुल्योर्कतापितः सूर्यावर्तं निहंत्याशु नस्येनैव प्रयो
गरार् १ शिरीषमूलकफलैरवपीडं प्रयोजयेत् अवपीडो हितो वा स्यादृचापिप्पलिभिः कृतः १ जांगलानि च मांसानि कार
येदुपनाहनं तेनास्य शाम्यते व्याधिः सूर्यावर्तः सुदारुणः एष एव विधिः कार्यो कृत्स्नचार्धावभेदके १ अर्धावभेदके प्रोक्तं
दस्वेदो हि भेषजं विरेकः कायशुद्धिश्च धूपः स्निग्धोष्णभोजनं १ विडंगानि तिलान्कृष्णान्समानपिष्ट्वा विलेपयेत् नस्यं
चाथाचरेत्तस्मादर्धभेदं व्यपोहति १ गिरिकर्णिफलं मूलं सजलं नस्यमाचरेत् मूलं वा रंधयेत्कर्णे निहंत्यर्धशिरोरुजं १ मरिचं

भृंगजैर्द्राक्षा मरिचं शालितंदुलैः अर्धशीर्षव्यथां हंति लेपो वा शुंठिचारिणा १ पिबेत्सर्कशर्करं क्षीरं नीरं वा नारिकेलजं सुशीतं वापि पानी
यं सर्पिर्वा नस्यतस्तयोः १ नासिकया पिबेदित्यन्वयः तयोः सूर्यावर्तार्धावभेदकयोः सारिवाकुष्ठमधुकवचाकृष्णोत्पलैस्तथा ले
पः सकांजिकस्नेहः सूर्यावर्तार्धभेदयोः १ सितोपलायुतं घृष्टं मदनं गोपयान्वितं नस्यतो नुदिते सूर्ये निहंत्येवार्धभेदकं १ पीताशश
मुंडरसं मरिचैरवचूर्णितं भोजनाद्यनुसमाहारः सूर्यावर्तार्धभेदकौ हंति सर्वात्मकौ शीघ्रं रुः स्वरौ शंखशदारुणौ १ अथानंतवात
शंखकयोश्चिकि० अनंतवाते कर्तव्यः सूर्यावर्तहितो विधिः शिराव्यधश्च कर्तव्योनंतवातप्रशांतये १ आहारश्च प्रदातव्यो वातपि
त्तविनाशनः मधुमस्तुकसंयावघृतपूरैर्विशेषतः १ संयावः पक्वान्नविशेषः मधु मधुमस्तकः मधुनोपलिप्तः घृतपूरः पूपः दार्वी
हरिद्रामांजिष्ठसानिंबोशीरपद्मकं एतल्लेपनं कुर्यात्शंखकस्य प्रशांतये १ शीततोयनिषेकश्च शीतलक्षीरसेवनं कंकश्च क्षीर
वृक्षाणां शंखके लेपनं हितं १ कालिनीलोत्पलं दूर्वा तिलाः कृष्णा पुनर्नवा शंखके नं च वाते च लेपः सर्वशिरोर्तिनुत् १ अथ सामान्यप
नीकारमाह अथ षड्बिंदुतैलं एरंडमूलं तगरं शताह्वा जीवंति रास्ना सह सैंधवं च भृंगं विडंगं मधुयष्टिका च विश्वौषधं कृष्णतिल
स्य तैलं अजापयस्तैलविमिश्रितं तु चतुर्गुणे भृंगरसे विपक्वं षड्बिंदवो नासिकया प्रदेयाः सर्वान्निहन्युः शिरसो विकारान् कु
तांश्च केशांश्च लितांश्च केशान् निवृत्तमूलान्सुदृढं करोति सुपर्णदृष्टिप्रतिमं च चक्षुः कुर्वीत वाहोराधिकं बलं च १ जीवंतिकात्र
हरीतकी शाकविशेषश्च सशर्करं कुंकुममाज्यभृष्टं नस्यं विधेयं पवनासृगुत्थे भ्रूशंखकर्णाक्षिशिरोर्धशूले दिनाभिवृद्धिप्रभवे
च रोगे १ पथ्याक्षधात्रीरजनीगुडूचीभूनिंबनिंबैः सगुडः कषायः भ्रूशंखकर्णाक्षिशिरोर्धशूलं निहंति नानासानिहितः क्षणे
न १ किंतु मस्तकस्थेषु सर्वेषु नाधिनसंमतं गुडनागरकल्कस्य तस्य मस्तकशूलनुत् १ नागरकल्कविमिश्रं क्षीरं नस्येन योजितं नृ
णां नानादोषोद्भवां शिरोरुजं हंति तीव्रतरां १ शनाह्वैरंडमूलाभ्यां चक्रव्याघ्रीफलैः शृतं तैलं नस्यान्मरुत्कृतां तिमिरोर्ध्वग
दापहं १ इति शनाह्वातैलं अथ मयूराद्यं घृतं मयूरपक्षपादांत्रसकृल्लिनास्यवर्जितं जलेपक्काघृतप्रस्थं तस्मिन्क्षीरसमं

415
1936

यो०२० पचेत् दशमूलबलारास्नामधुकैस्त्रिफलैः सह मधुकैः कार्षिकैः कल्कैः शिरोरोगार्दितापहं कर्णनासास्यजिह्वाक्षिगलरोगविना
शनं मयूराद्यमितिख्यातमूर्ध्वजत्रुगदापहं १ इतिमयूराद्यं नस्येनकलिकाचूर्णनवसागरजंरसः वातश्लेष्मभवांपीडांशिरसो
२०७ हंतिसर्वथा १ करंजशिग्रुबीजानिपत्रकंसर्षपभत्लवा सर्वेषांशीर्षरोगाणामेतच्छीर्षविरेचनं १ त्रिकटुपुष्कररजनीरास्नासुरदा
रुउग्रगंधानां क्वाथःशिरोर्तिनालंनासापीतोनिवारयति १ अथपथ्यापथ्यविधिः तत्रभावप्रकाशाच्छिरोवस्तिविधौपथ्यमु
च्यते आमिषंजांगलंपथ्यंतत्रशाल्यादयोपिच मुद्गान्माषान्कुलित्थांश्चखादेद्वानिशिकेवलान् कटुकोष्णान्नसर्पिष्कां
नुष्णंक्षीरंपिबेत्तथा १ अथपथ्यापथ्यसंहितायां स्वेदोनस्यंधूमपानंविरेकोलेपः सेकोलंघनंशीर्षबस्तिः रक्तोन्मुक्तिर्व
ह्निकर्मोपनाहोजीर्णसर्पिः शालयः षष्टिकाश्च १ यूषोदुग्धंधन्वमांसंपटोलंशिग्रुद्राक्षावास्तुकंकारवेल्लं आम्रंधात्रीदाडि
मंमातुलिंगंतैलंतक्रंकांजिकंनारिकेलं २ पथ्याकुष्टंभृंगराजः कुमारीमुस्तोशीरंचंद्रिकागंधसारः कर्पूरंचख्यातिमानेषव
र्गःसेव्योमर्त्यैःशीर्षरोगेयथास्वं ३ क्षवजृंभामूत्रबाष्पांनिद्राविड्वेगमंजनं दुष्टनीरंविरुद्धान्नंविरूक्षंजलमज्जनं दंतकाष्टं
दिवानिद्रांशिरोरोगीपरित्यजेत् ५ इतिपथ्यापथ्यविधिः इतिशिरोरोगचिकित्सासमाप्ता अथनेत्ररोगाणांनिदानं
तत्रनेत्रस्यप्रमाणमाह विद्याद्ध्यंगुलबाहुल्यंस्वांगुष्ठोदरसंमितं द्व्यंगुलंसर्वतःसार्धंभिषङ्नयनमंडलं १ द्व्यंगुलबाहुल्यं
द्व्यंगुलप्रमाणंस्थौल्यंयस्यतत् स्वांगुष्ठोदरसंमितंस्वांगुष्ठस्थौल्यपरिमितं द्व्यंगुलंसर्वतःसार्धंदैर्घ्येण अथनेत्रस्यांगानाह
पक्ष्मवर्त्मश्वेतकृष्णदृष्टीनांमंडलानितु अनुपूर्वंतुतेमध्याश्चत्वारोंत्यायथोत्तरं २ तेपक्ष्मादयोदृष्ट्यंताःअनुपूर्वंयथापूर्वं
मध्याश्चत्वारःदृष्ट्यादयःयथोत्तरंअंत्याः अथनेत्रमंडलेव्याधयोभवंतितेषांस्थानविशेषेणसंख्यामाह द्वादशव्याधयो
दृष्टावर्त्मन्येवदशोभौ कृष्णभागेतुचत्वारोदशैकःशुक्लभागजः वर्त्मन्येकविंशतिश्चपक्ष्मजोद्वौप्रकीर्तितौ नवसंधि २०७
ष्वसर्वस्मिन्नेत्रेसप्तदशोदिताः एवंनेत्रेसमस्तास्युरष्टसप्ततिरामयाः ३ इतिचरकोक्तोपक्ष्मजोद्वौ अधिकोइतिविशेषः

अथश्रुतोक्तानाह वाताद्दशतथापित्तात्कफाच्चैवत्रयोदश रक्तात्षोडशविज्ञेयाःसर्वजाःपंचविंशतिः बाह्यौपुनर्द्वौनयनेरोगाः 417/1936
षट्सप्ततिस्मृताः १ तेषांस्थानानि नवसंध्याश्रयास्तेषुवर्त्मजास्त्वेकविंशतिः शुक्लभागेदशैकश्चचत्वारःकृष्णभागजाः सर्वाश्रयाः
सप्तदशदृष्टिजाद्वादशैवतु द्वौचबाह्यावाख्यातावन्यावनिमित्तनिमित्तजौ षट्सप्ततिनेत्ररोगाःसंग्रहेणप्रकीर्तिताः २ अथनयनरोगहेतुमा
ह उष्णाभितप्तस्यजलप्रवेशाद्दूरेक्षणात्स्वप्नविपर्ययाच्च स्वेदार्द्ररजोधूमनिषेवणाच्च छर्दिविघाताद्वमनातियोगात् द्रवान्नपानातिनिषे
वणाच्चविण्मूत्रवातक्रमनिग्रहाच्च प्रसक्तसंरोदनशोकतापाच्छिरोभिघातादतिमद्यपानात् तथाकृतानांचविपर्ययेणक्लेशाभितापा
दतिमैथुनाच्च बाष्पग्रहात्सूक्ष्मनिरीक्षणाच्चनेत्रेविकारान्जनयंतिदोषाः ३ उष्णाभितप्तस्यजलप्रवेशात् आतपादिःजनितोष्मणा
सहबाहिर्भूतस्यनयनतेजसोजलस्वगाहनेनाभिभवात् छर्दिविघातात् वांतिवेगविधारणात् वातिवांतेः प्रसक्तनिरंतरंकृतसंरोद
नादेः शिरोभिघातात्शिरसिप्रहरात् कृतानांविपर्ययेणकृतक्रोचरणानांविपरीताचरणेनक्लेशोभितापात्क्लिश्यते अनेनेतिक्ले
शः क्रमकोपादिदुःखंतेनाभितापः पीडानतः इत्यादिहेतुनासंप्राप्तिः अथसामान्यंस्वरूपं शिरानुसारिभिर्दोषैर्विगुणैरूर्ध्वमा
श्रितैः जायंतेनेत्रभागेषुरोगाःपरमदारुणाः नेत्रभागेषुनेत्रस्यदृष्ट्याद्यवयवेषु अथआदौदृष्टिरोगानाह तत्रदृष्टिलक्षं मसूर
दलमात्रंतुपंचभूतप्रसादजां खद्योतविस्फुलिंगाभ्यांसिद्धांतेजोभिरव्ययैः १ आवृतांपटलेनाक्ष्णोबाह्येनविवराकृतिं शी
तसात्म्यान्नृणांदृष्टिमाहुर्नयनचिंतकाः २ मसूरदलमात्रांनेत्रगतकृष्णमंडलमध्यस्थांमसूरविदलप्रमाणां निमेषैःकदाचित्
विद्योताभावात्खद्योतवत्निमेषाभावेविद्योतमानत्वाद्विस्फुलिंगवत् अव्ययैः चिरस्थायिभिः तेजोभिः सिद्धांउत्पन्नांवि
वराकृतिंसच्छिद्रां अक्ष्णोबाह्येनपटलेनरसरक्ताधारस्तनयात्वचा आवृतां तत्रचत्वारिमंडलानिभवंतितान्याह तेजोजला
श्रितंबाह्यंतेष्वन्यत्पिशिताश्रितं मेदस्तृतीयंपटलंआश्रितंत्वस्थिचापरं पंचमांशसमंदृष्टेस्तेषांबाहुल्यमिष्यते १ अत्रतेजोरक्तं
जलंशब्देनरसः तेनरसरक्ताधारमित्यर्थः पटलंत्वक् अपरंचतुर्थंदृष्टेस्वांगुष्ठोदरस्थूलस्यनेत्रस्य पंचमांशसमं तेषांचतु

यो०२० णांपटलानांनिमीलितानां बाहुल्यंसंज्ञेत्युंद्रप्यते अथप्रथमपटलगतस्यदोषस्यस्वभावमाह प्रथमेपटलेदोषोयस्यदृष्ट्याव्यवस्थिः
अव्यक्तानिचरूपाणिकदाचिदथपश्यति १ प्रथमेप्रवाभ्यांतरेनतुबाह्येदृष्टेरभ्यंतरेदोषाः पटलेसमाधिष्ठलाः एकैकं अनुपधाने
स्त्रीयात्पटलांतरमितिविदेहवचनात् अवस्थितःस्थिनः अव्यक्तानिदुर्पश्यकानि रूपाणिअरुणवर्णादियुक्तानिवातेन पित्तेना
दित्यखद्योतादिपित्तनीलवर्णानि कफेनस्वेतचामरगौराणिवर्णानिरक्तेनरक्तवर्णानि सांनिपातेनविविचित्राणीति एवंद्वितीयत्वती
यचतुर्थपटलेष्वपिव्याख्येयं अथकदाचित्पश्यति व्यक्तान्येवेतिदोषः दोषाल्पतया अथद्वितीयपटलतस्याह दृष्टिर्भृशंवि
कलतिद्वितीयंपटलंगते मक्षिकामशकानकेशान् जालकानिवपश्यति मंडलानिपताकाश्चमरीचीन्कुंडलानिच परिप्लवांश्चवि
विधान्वर्षमभ्रंतमांसिच दूरस्थानिचरूपाणिमन्यतेचसमीपतः समीपस्थानिदूरेचदृष्टेर्गोचरविभ्रमात् यत्नवानपिचात्यर्थंस
चिपाशंनपश्यति २ विह्वलतीतिरूपंसम्यकनयाग्रहीतुंनशक्नोतिनमेवविवृणोति मक्षिकादीन्जालकानिवमर्कटकरचितजाल
नीवपश्यति मंडलादीनिअसंत्यपिसंतीवपश्यति कुंडलानिकुंडलानीवावर्तमानानिकिंचित्पश्यति वर्षदृष्टिं अभ्रंमेघवर्षादी
निअसंत्यपिसंतीवपश्यतिगोचरविभ्रमात् गोचरोरूपंतत्रविभ्रमः अयथाग्रहणंतस्मात् अथतृतीयपटलगतस्याचि० आह
ऊर्ध्वंपश्यतिनाधस्तात्तृतीयंपटलंगते महांत्यपिचरूपाणिछादितानिवचांबरैः कर्णनासाक्षिरूपाणिविकृतानिचपश्यति ३
अत्ररागप्राप्तिमाह यथादोषंचरज्येतदृष्टिर्दोषेबलीयसी यथायथंदोषवर्णेनारुणपीतश्वेतनीलादिभुज्यते दृष्टिर्दोषेबलीय
सीरक्तमांसभेदः सहायेवभवति तृतीयपटलगतस्यदोषस्यतथास्वभावाद्दारागोपलब्धिः तृतीयपटलादारभ्यरागोदयइ
त्यर्थः अथदृष्टिदोषाधिष्ठान्याह अधस्थेतुसमीपस्थंदूरस्थंचोपरिस्थिते पार्श्वस्थितेपुनर्दोषेपार्श्वस्थानिनपश्यति समंततः
स्थितेदोषेसंकुलानीवपश्यति दृष्टिमध्यस्थितेदोषेमहत्ह्रस्वंप्रपश्यति दोषेदृष्टिस्थितेतिर्यगेकेवमन्यतेद्विधा द्विधास्थि
तेत्रिधापश्येद्बहुधाचानवस्थिते १ अधस्थेतुदोषेचउपरिस्थितेदोषेसमीपस्थंदूरस्थंनपश्यतीत्यन्वयः समंततः उपर्यधः

पार्श्वेषुसंकुलानिभिन्नान्यपिरूपाणिमिश्रितानीवपश्यति अनवस्थितेअनियतावस्थानेबहुधानिपश्येत् अथचतुर्थपटलगतदोषस्वभावमाह 419
तिमिराख्यः संवेदोषश्चतुर्थपटलंगतः रुणाधिसर्वतोदृष्टिंलिंगनाशइतिकचित अस्मिन्नपितमोभूतेनातिरूढेमहागदे चंद्रादित्यौस 1936
नक्षत्रौअंतरिक्षेचविद्युतः निर्मलानिचतेजांसिभ्राजिष्णूनिचपश्यति सएवलिंगनाशस्तुनीलिकाकाचसंज्ञितः ४ तत्रांतरे काचइ
त्येषविज्ञेयोपाल्पस्त्रिपटलस्थितः चतुर्थपटलोयोमौलिंगनाशः सउच्यते १ दोषोत्ररोगः रोगोपिदोषाख्यातेनेदुत्यागमाचतुर्थं
पटलं वाह्यंपटलंगतः सतिमिराख्यः तिमिरंतमिस्रंअस्यास्तीतितिमिरः तस्यलक्षणंरुणधीत्यादि सर्वतः सर्वत्रलिंगनाशः लिंगइ
द्रियशक्तिस्तस्यनाशोस्मिन्नितिलिंगनाशः सएवतिमिराख्यः अस्मिन्नपितिमिरेतमोभूतेतमस्तुल्ये अत्रभूतशब्दस्तुल्यार्थः नाति
रूढेअप्रौढे नवे चंद्रादित्यौनक्षत्राणिचपश्यतिभ्राजिष्णूनिसुवर्णादीनिच अस्मिन्प्रौढेचिरजेचंद्रादीन्यपिनपश्यतीत्याशयः तस्यैव
लिंगनाशस्यनामांतरं अथदृष्टिरोगाणांसंख्यानामानिचाह द्वादशअथषट्चषडेवरोगाः षट्लिंगनाशाःहिभवंतितत्र वातेनपित्ते
नकफेनसर्वैरक्तात्परिम्लायभिधश्चषष्ठः १ दृष्ट्याश्रयारोगाषट्षट्द्वादशेत्यर्थः तत्रलिंगनाशाः षट् तान्विवृणोति वातेनेत्यादि
तथानरः पित्तविदग्धदृष्टिःकफेनचान्यस्तुथधूमदर्शी योह्रस्वजात्योनकुलांधसंज्ञोगंभीरसंज्ञाचतथैवदृष्टिः १ पित्तविदग्धदृष्ट्या
दयश्चषट्एवंदृष्ट्याश्रयाद्वादशरोगाः तत्रैवभेदान्याह तत्रैवान्यौगदौचसन्निमित्तानिमित्तकौतेषुवातजस्यलिंगस्यलक्ष
णमाह वातेनखलुरूपाणिभ्रमंतीवसपश्यति आविलान्यरुणाभानियाविद्धानीवमानवः १ आविलानिकलुषाणि अरुणानि
अव्यक्तलोहितयुक्तानिव्याविद्धानीवकुटिलानीव अथपैत्तिकमाह पित्तेनादित्यखद्योतशक्रचापतडिद्गुणान् नृत्यतश्चैवशिखिनः
सर्वंनीलंचपश्यति २ आदित्यादीनांगुणान्रूपाणि अथश्लेष्मिकमाह कफेनपश्येद्रूपाणिस्निग्धानिचसितानिच सलिलप्लावि
तानीवपरिजाड्यानिमानवः ३ सलिलप्लावितानीवपरिजाड्यानीति सलिलप्लावितानीवक्लिन्नानीत्यर्थः अथसांनिपातजमाह
सन्निपातेनचित्राणिविप्लुतानिचपश्यति बहुधापिद्विधावापिसर्वाण्येवसमंततः हीनाधिकांगान्यथवाज्योतींष्यपिचभूयसा ४

यो०र० चित्राणिनानावर्णानि विकृतानिविपरीतानिविपरीतत्वमेवाविष्करोति बहुभेत्यादिना अथरक्तजमाह पश्येद्रक्तेनरक्तानितमांसि
विधाविनिच हरितान्यथकृष्णानिपीतान्यपिचमानवः ५ रक्तेनकृष्णपीतदर्शनंकथंनादृष्टपित्तसाधकधर्मकत्वाद्रक्तस्य अथप
२०१ रिम्लायिनमाह रक्तेनमूर्छितंपित्तंपरिम्लायिनमावृत्य तेनपीतादिशः पश्येतउद्यंतमिवभास्करं विकीर्यमानानखद्योतैर्वृक्षांस्ते
जोभिसंवैनाहि दं विकीर्यमानानव्याप्यमानान् तेजांसि अग्न्यादेरिव अथनेत्रवर्णैः षाड्विधलिंगनाशमाह वातादिजानि
नेत्रवर्णैरपिचषाड्विधः लिंगनाशोनिगदितोवर्णोवातात्प्रजायते रागोरुजोमारुतः प्रदिष्टोम्लायीचनीलश्चतथैवपित्तात्
कफात्सितः शोणितजः सरक्तः समस्तदोषप्रभवोविचित्रः १अथवातादिनाहेतुभूतेनजनितेनेत्रविषयेमंडलेरूपविशे
षमाह अरुणंमंडलंवाताच्चंचलंपुरुषंतथा पित्तान्मंडलमानीलंकांस्याभंपीतमेवच श्लेष्मणाबहलंस्निग्धंशंखकुंदेंदुपांडुरं
चलत्पद्मपलाशस्थः शुक्लोबिंदुरिवांभसः मृद्यमानेतुनयनेमंडलंतद्विसर्पति मंडलंतुभवेच्चित्रंलिंगनाशेत्रिदोषजे प्रवा
लपद्मपत्राभंमंडलंशोणितात्मकं रक्तजंमंडलंदृष्टौस्थूलकाचारुणप्रभं परिम्लायिनिरोगेस्यान्म्लायिनीलंचमंडलं दो
षक्षयात्स्वयंतत्रकदाचित्स्यात्तुदर्शनं पित्तान्मंडलमिति पित्तमेवआनीलमिषन्नीलंतेनपीतनीलंरक्तसंबंधेसतिकांस्या
भंपीतमेवच रक्तसंचयेपीतमेव कांस्याभंपाडुः आपांडुपीतमित्यर्थः श्लेष्मणेति बहलंस्थूलं त्रिदोषजेचित्रंइत्यत्रयथा
स्वंवातादिवर्णाविचित्रत्वंबोध्यं शोणितजेप्रवालेत्यादिप्रवालस्वनामाख्यातंतदाभंच रक्तपद्मपुष्पदलाभं रक्तजमिति
परिम्लायिनिरोगेरक्तजं पित्तानुगानुरक्तजं स्थूलकाचारुणप्रभमिति स्थूलकाचस्येवारुणाप्रभायस्यतत् एतेनरक्तेल्पमरु
णत्वंचबोध्यते तथाकदाचिद्दोषक्षयान्मंडलंवाम्लानंनीलंदर्शनंचस्यात् १अनुक्तमथाहगौरवादिदोषलिंगसंग्र
हार्थमाह तथास्वंदोषलिंगानिसर्वेष्वेवभवंतिहि १अथपित्तविदग्धदृष्टेर्लक्षणमाह पित्तेनदुष्टेनगतेनदृष्टिंपीताभवेद्य २००
स्यनरस्यदृष्टिः पित्तानिरूपाणिचतेनपश्येत्सवैनरः पित्तविदग्धदृष्टिः पित्तेनगतेनदृष्टिःदृष्टावपिप्रथमादितीयपटलगते

नेतिबोध्यंतेनव्याधिना यस्मिन्नेवपित्तेदृष्टेतृतीयंपटलंगतेरूपविशेषणादिबोधलक्षणमाह प्राप्तेतृतीयंपटलंतुदोषेदिवानपश्येन्निशि 421/1936
वीक्षितेसः रात्रौसशीतानुगृहीतदृष्टिः पित्ताल्पभावादपिकानिपश्येत् १दोषेत्रपित्ते अथश्लेष्मविदग्धदृष्टिलिंगमाह तथानरः श्ले
ष्मविदग्धदृष्टिस्तान्येवशुक्लानिहिमन्यतेतु १अत्रापिश्लेष्मणादृष्टेप्रथमादितीयप्रथमपटलगतस्यैवंलिंगंबोध्यं सएवश्लेष्मदृष्टेतृती
यपटलंगतोनक्तांध्यमापादयतीत्याह त्रिषुस्थितोयः पटलेषुदोषोनक्तांध्यमापादयतिप्रसह्य दिवासमूर्यानुगृहीतदृष्टिः पश्यत्तुरूपाणि
कफाल्पभावात् १दोषोत्रकफतस्यापकांतत्वात् नक्तांधस्यश्लेष्मविदग्धदृष्टावंतर्भूतत्वात्पृथक्गणना अथधूमदर्शनमाह शोक
ज्वरायासशिरोभितापैरभ्याहतायस्यनरस्यदृष्टिः धूम्रांस्तुयः पश्यतिसर्वभावांसधूमदर्शीतिनरः प्रदिष्टः १शिरोभितापः शिरसि
घर्मादिनासंतापः एतस्यापित्तदोषोबोध्यः अथह्रस्वजात्यमाह योवासरेपश्यतिकृच्छ्रतोथरूपंमहच्चापिनिरीक्षितेल्पं रात्रौपुनर्यः प्र
कृतानुपश्येत्सह्रस्वजात्योमुनिभिः प्रदिष्टः तंत्रांतरं दृष्टिमध्यस्थितेदोषेमहद्भस्वंचपश्यति रात्रौपित्ताल्पभावाच्चतानिरूपाणि
पश्यति १अथनकुलांध्यमाह विद्योततेयस्यनरस्यदृष्टिर्दोषाभिपन्नानकुलस्यदव चित्राणिरूपाणिदिवासपश्येत्सवैविकारो
नकुलांध्यसंज्ञः १एतौह्रस्वजात्यनकुलांध्याख्यौचतुर्थपटलाश्रितदोषजन्यौसरागौचासाध्यौ तथाविदेहः नक्तांध्यश्चत्वारः पुर
स्तात्परिकीर्तिताः तेषामसाध्यानकुलांध्यह्रस्वजात्यास्तथैवच विशेषेणभवंत्येतातौचतुः पटलाश्रितौ तौचसंभाव्यरागत्वात्तस्मा
देतौनसिध्यतः १अथगंभीरकामाह दृष्टिर्विरूपाश्वसनोपसृष्टासंकोचमभ्यंतरतस्तुयाति रुजावगाढाचतमाक्षिरोगंगंभीरकेति
प्रवदंतितज्ज्ञाः १ दृष्टिर्विरूपेत्यादिनागंभीरकालिंगंविरूपाविकृताश्वसनोपसृष्टावातोपगतासंकोचमभ्यंतरतस्तुयातीति अंतः सं
कोचमेतिनिमज्जतीत्यर्थः इत्यादिसकलपटलगतावातजाभसाध्याः एवंदृष्टिगताः गदाः द्वादशकथिताः अथबाह्यौनिमित्ताति
मित्तानिमित्तसंज्ञौलिंगनाशावाह बाह्यौपुनर्द्वाविहसंप्रदिष्टौनिमित्ततश्चाप्यनिमित्ततश्च निमित्ततस्तत्रशिरोभितापाज्ज्ञेयस्त्व
भिष्यंदनिदर्शनः सः १बाह्यौस्फुटौकद्वादशसंख्येभ्योधिकौ तत्रनिमित्तजमाह विदीर्यतेशीतदतिहीयतेवान्नणामभिघा

पो०४० नहतावद्दृष्टिः १ तत्रनिमित्तत: शिरोभितापात्शिरोभितप्यतेयेनविषकुसुमगंधवहपवनस्पर्शेनसशिरोभितापः तस्मात् अभिष्यं
दाभिदर्शनः रक्ताभिष्यंदलिंगइतिगदाधरः सन्निपाताभिष्यंदलिंगइतिकार्तिकः अनिमित्तमाह सुरर्षिगंधर्वमहोरगाणांसंद
र्शनेनापिचभास्करस्य हन्येतदृष्टिर्मनुजस्यतस्यसालिंगनाशस्त्वनिमित्तसंज्ञः १ अनुपलभ्यमानानांसुरादीनांदर्शननिमित्तमप्य
निमित्तमन्यते अनिमित्ततोलिंगनाशस्यलक्षणमाह तत्राक्षिविस्पष्टमिवावभातिवैडूर्यवर्णाविमलाचदृष्टिः १ विस्पष्टंज्योतिर्यु
क्तं वैडूर्यवर्णाश्यामाविमलानिर्मलाएवंचतुर्दशदृष्टिरोगाः तेयथावातिकः पैत्तिकः श्लैष्मिकः सांनिपातिकः रक्तजः म्लायी
एवंषड्लिंगनाशाः दिवांधः रात्र्यंधः धूमदर्शीह्रस्वजात्यः नकुलांधः गंभीरिका एवंषड्अपरेदृष्टिरोगाः एवंद्वादशबाह्याव
परौद्वौसनिमित्तानिमित्तजौ एवंचतुर्दशदृष्टिरोगाः अथदृष्टिमंडलप्रत्यासन्नितया चत्वारएवनयनामयास्तुकृष्णप्रदेशोत्प
द्यन्तेभवंति तत्रसव्रणशुक्रलिंगमाह निमग्नरूपंतुभवेत्धिकृष्णेसूच्येवविद्धंप्रतिभातियद्वै स्रावंस्रवेदुष्णमतीवयच्चतत्सव्रणं
शुक्रमुदाहरंति १ निमग्नरूपमिति रूपग्रहणमासमंतात्प्रतिषेधार्थं तेननिमग्नरूपमेवयत् सूच्येवविद्धं सूचीविद्धवेदना स्रावंस्र
वेदुष्णमिति स्रावंदुष्णमेतावतैवलब्धेस्रावेस्रावग्रहणंनिरंतरव्यापनार्थं अतिशब्दस्तेनसंबध्यते विदेहप्युक्तं रक्तराजीनिभं
कृष्णेछिन्नाभंयत्रलभ्यते सूच्याग्रेणेवतच्छुक्रंदुःखास्रुस्रावितद्व्रणं १ अस्यसाध्यासाध्यलक्षणमाह दृष्टेःसमीपेनभवेत्तुय
च्चनचावगाढंनचसंस्रवेच्च अवेदनंवानचयुग्मशुक्रंतत्सिद्धिमायातिकदाचिदेव १ नचावगाढं एकत्वगतं नसंस्रवेत्
अत्यर्थमित्यर्थः अवेदनंइपहेदनं नचयुग्मशुक्रं युग्मशुक्रमितिक्षतशुक्रं एकमित्यर्थः एवंविधंसव्रणंकदाचित्सिध्य
ति एतद्विपरीतंनसिध्यति अथअव्रणशुक्रमाह स्यंदात्मकंकृष्णगततुशुक्रंशंखेंदुकुंदप्रतिमावभासं वैहायसाभ्रप्रतनु
प्रकाशंचाव्रणंसाध्यतमंवदंति १ स्यंदात्मकं अभिष्यंदहेतुकं सर्वेषामक्षिरोगाणामभिष्यंदहेतुकत्वेसत्यस्यानियमबोधनार्थं
स्यंदात्मकमिति शंखेंदुकुंदप्रतिमावभासंशंखेंदुकुंदसदृशमवभासनंएतेनशुक्लत्वंबोधितं वैहायसाभ्रप्रतनुप्रकाशमिति

आकाशस्थमेघवत्तनुयथास्यादेवंप्रकाशतेयत् शुक्लत्वंतुशंखेंदुकुंदप्रतिमावभासत्वेनैवलब्धं वैहायसाभ्रग्रहणंतुसजलाशंकाव्य ५८३ / १९३८
वच्छेदार्थं साध्यतमस्याप्यस्यावेदनकष्टसाध्यतामाह गंभीरजातंबहलंचशुक्रंचिरोत्थितंचापिवदंतिकृच्छ्रं १ गंभीरजातंद्वित्रित्वगतं
बहलंपुष्टं असाध्यतांचाह विच्छिन्नमध्यंपिशितावृतंवाचलंशिरासूक्ष्ममदृष्टिकृच्च द्वित्वग्गतंलोहितमंततश्चचिरोत्थितंचापिविवर्ज
नीयं १ विच्छिन्नमध्यंविशीर्णमांसत्वान्निम्नमध्यं पिशितावृतं उन्नतमांसं चलमितिअनवस्थितं शिरासूक्ष्ममिति शिराद्यन्तसूक्
ष्मतं अदृष्टिकृत् दर्शनाभावकृत् द्वित्वग्गतंपटलद्वयगतंस्यात्छिन्नमध्यत्वादिलिंगसहितं असाध्यंनतुकेवलगंभीरजातस्यकष्ट
साध्यत्वाभिधानात् एवंचिरोत्थितमपि अपरंअसाध्यलक्षणमाह उष्णाश्रुपातःपिडिकाचनेत्रेयस्मिन्भवेन्मुद्गनिभंचशुक्रं तदप्य
साध्यंप्रवदंतिकेचिदन्यच्चयत्तित्तिरपक्षतुल्यं १ मुद्गनिभंचशुक्रं तदप्यसाध्यं आकारेणवर्णेन तित्तिरपक्षतुल्यंतित्तिरपक्षतुल्य
मितिशबलं अथअक्षिपाकात्ययमाह श्वेतःसमाक्रामतिसर्वतोहिदोषेणयस्यासितमंडलंतु तमक्षिपाकात्ययमक्षिकोपंसर्वा
त्मकंवर्जइतव्यमाहुः १ यःश्वेतःदोषेणकृतःकृष्णमंडलंसर्वतःसमाक्रामतिसर्वात्मकोत्रिदोषजंतमक्षिकोपं अक्षिणकात्यय
माहुः अत्रपाकोपिस्यात् अतएवशुश्रुतःशोफाश्रुपाकार्तियुतंचनेत्रइति अथाजकाजातमाह अजापुरीषप्रतिमोरुजावान्स
लोहितोपिच्छलाश्रुः विगृह्यकृष्णंप्रचयोभ्युपैतितंचाजकाजातमितिव्यवस्येत् १ अजकाजातमिति अजापुरीषप्रतिमः शुष्कपुरीषे
तुल्यः सलोहितइतिइषल्लोहितः विगृह्यकृष्णमितिस्वोद्धपेणकृष्णमंडलंमहत्वाद्विछाद्य प्रचयइतिविवृद्धश्चसउन्नमइतियावत्
अजकायांभेदस्तृतीयत्वग्गतत्वेनमेदसःप्रचयोवाधयः तथाहविदेहः कृष्णेक्षणोद्भवेच्छुक्रछागलीविट्समप्रभं सांद्रपिच्छ
लरक्तास्रंद्वित्वग्गतनयाजिका १ इतिकृष्णजाः रोगाश्चत्वारः अथशुक्लभागजारोगाः तेषांनामानिसंख्यांचाह प्रस्तारिशु
क्लक्षतजाधिमांसस्नायुर्मसंज्ञाःखलुपंचरोगाः स्याच्छुक्तिकाअर्जुनपिष्टकाख्याजालांशिराणांपिटिकाश्चनाम्ना रोगाबलास
ग्रथितेनसार्धंएकादशोक्ताःखलुशुक्लभागे १ तत्रप्रस्तारिलक्षणमाह प्रस्तारितनुविस्तीर्णंश्यावरक्तंनिभंसिते १ तनुपतलं

यो०र० विस्तीर्णंप्रसारिशुक्लामित्यर्थः श्यावरक्तनिभंइत्यत्रविकल्पोबोध्यः अथशुक्लार्ममाह सश्वेतंमृदुशुक्लार्मशुक्लेतद्वर्धतेचिरात् २
अथरक्तार्मलक्षणमाह पद्माभंमृदुरक्तार्मयन्मांसंचीयतेसिते ३ पद्माभंवर्णेनरक्तमित्यर्थः चीयतेउपचीयते अथाधिमांसमाह
२११ पृथुमृद्वधिमांसार्मबहलंचयकृन्निभं ४ पृथुविस्तीर्णंबहलंपुष्टं यकृन्निभंईषन्नीललोहितमित्यर्थः एतत्त्रिदोषजं अथास्नाय
र्ममाह स्थिरंप्रस्तारिमांसाढ्यंशुष्कंस्नायर्मपंचमं ५ स्थिरंकठिणं शुष्कंश्रावरहितं इदंचप्रस्तार्यर्मोद्भवं तथाहिविदेहः प्रस्तारिणां
मनःश्रावंनिरूपाद्भिवदानिलः विनाश्रावंविशुष्कंचयत्स्नायर्मेतिताद्विदुः १ अथशुक्तिकामाह श्यावाःस्युःपिशितनिभास्तुबिंद
वोयेशुक्तिकाभास्त्वसितासिताःसशुक्तिसंज्ञः ६ श्यावाःपांडुःश्यामाःपिशितनिभाःपिशितस्येवनियमेनभादीप्तिर्येषांतेतथा
शुक्त्याभाःजलशुक्तिनिभाःतस्मात्स्यादसितसिता असिताश्चअसितसिताः अयंपित्तजाः अथार्जुनमाह एकोयःशशरुधि
रोपमस्तुबिंदुःशुक्लस्थोभवतितदर्जुनंवदंति ७ एकोयइत्यादिनाअर्जुनं इदंशोणितजं अथापिष्टकमाह श्लेष्ममारुतकोपेनशु
क्लेमांसंसमुन्नतं पिष्टवत्पिष्टकंविद्धिमलाक्तादर्शसन्निभं ८ पिष्टवत्श्वेतमलाक्तादर्शसन्निभमिति भस्मादिप्रक्षिप्तदर्पण
तुल्यं अयंवातकफजः अथशिराजालमाह जालाभःकठिणशिरोमहान्सरक्तःसंतानःस्मृतइहजालसंज्ञितस्तु ९ जाला
भइत्यादिनाशिराजाललक्षणंजलाभइति अनुलोमजविलोमस्थितशिरावितानंभत्वेनजालस्येवभायस्यसतथा कठिणाशिरा
इत्यनेनशिराणामेवनानांपंविकारस्यतिदर्शयाति सरक्तइतिदरक्तोहितःसंतानइतिसंतानोतिअच्छादयतीतिसंतानःबहु
लक्तनात्कर्तरिलिट् बिंदुरत्रानुवर्ततेयः सर्वत्रविशेष्यः जालसंज्ञितइतिशिराप्रबंद्धइतिविशेषः तेनशिराजालसंज्ञित
इत्यर्थः अथशिरापिटकामाह शुक्लस्थासितापिडकाःशिराघ्रतायास्ताश्चपादासितसमीपजाः १० शिराजाःशिराद्घ्रतइति
शिराभितावावृतास्तुस्थिताशिरापरिवृतत्वेनशिराजाःनतुसाक्षात्शिराजाइतिकृष्णभासात्यंतत्यंतशुक्लजाः अथबलास २११
ग्रथितमाह कांस्याभोमृदुरथवारिबिंदुकल्पोविज्ञेयोनयनसितेबलाससंज्ञः ११ कांस्याभःश्वेतइत्यर्थः अमृदुंकठिणःवा

425/1936

रिबिंदुकल्पः एतेनघनागुरुत्वबोध्यतेबलाससंज्ञोबलासग्रथितसंज्ञःक्वचिदनिर्दिष्टवान् अयंचकफजः तथाचविदेहः मारुता
पीडितःश्लेष्माशुक्लभागव्यवस्थितः जालबिंदुरिवोच्छूनोमृदुःशोफःसमुद्भवेत् बलासग्रथितंनामनीरुजंवृत्तमंडलं १ इत्येकाद
शशुक्लभागजारोगाः अथवर्त्मयक्ष्मजाः तत्रवर्त्मनिरुक्तं यदाह वर्त्मनिनयनछदादुत्यमरः तत्रस्थानांरोगाणांनामानिसंख्याचाह
उत्संगिन्यथकुंभीकापोथकीवर्त्मशर्करा तथार्शोवर्त्मशुष्कार्शतथैवांजननामिका बहलंवर्त्मयच्चापितथोक्तोवर्त्मबंधकः क्लिष्टव
र्त्मतथावर्त्मकर्दमःश्याववर्त्मच प्रक्लिन्नवर्त्मचाक्लिन्नवर्त्मवातहतंचतत् वर्त्मार्बुदंनिमेषश्चशोणितार्शस्तथैवच लगणोबिस
वर्त्मापिकुंचनंनामतत्परं एकविंशतिरित्येतेविकारावर्त्मसंश्रयाः १ तेषूत्संगपिटकामाह अभ्यंतरमुखीताम्राबाह्यतोवर्त्मनश्च
या सोत्संगोत्संगपिटिकासर्वजास्थूलकंडुरा १ अभ्यंतरमुखीतिवर्त्मभ्यंतरेमुखंयस्याःसा वर्त्मतोबाह्यतस्ताम्रासोत्संगःअंतःप्र
याउत्संगपिटिका उत्संगःक्रोडेवस्थापिटकायस्याःसा सर्वजेतिसंनिपातभवा स्थूलकंडूराअत्रकर्मधारयःकंडूराकंडुमती एषाअ
रवर्त्मांतस्थाबोध्या यदाहविदेहः वर्त्मोत्संगादधोजंतोसंनिपातात्प्रजायतेइति अथकुंभिकामाह वर्त्मांतःपिटिकाध्माता
भिद्यंतेचस्रवंतिच कुंभीकबीजसदृशाःकुंभिकासंनिपातजाः २ ध्माताउच्छूनाःस्वयमेवप्रणोदराभवतीत्यर्थःकुंभिकाबीजस
दृशाःकुभांडलतातद्बीजतुल्याः अथपोथिकामाह स्राविण्यःकंडुरागुर्व्योरक्तसर्षपसंनिभाः रुजावंत्यश्चपिटिकाःपोथिकाइतिसं
ज्ञिताः ३ कफजापिवेदनान्विताः अथवर्त्मशर्करामाह पिटिकाभिश्चसूक्ष्माभिःघनाभिरतिसंवृताः पिडिकायाःखरास्थूलासाजे
यावर्त्मशर्करा ४ अथअर्शोवर्त्मलक्षणमाह एर्वारुबीजप्रतिमापिटिकामंदवेदनाः श्लक्ष्णाःखराश्चवर्त्मस्थास्तदर्शोवर्त्मकीर्तितं
५ एर्वारुग्रीष्मककर्कटिका श्लक्ष्णाअकर्कशा खरातीक्ष्णाग्राः तथाचनिमिः नीरुजाकठिनावर्त्मपक्ष्मांतर्बाह्यगापिवा पिडिकासं
निपातेनतदर्शोवर्त्मकीर्तयेत् १ अथशुष्कार्शमाह दीर्घांकुरःखरस्तब्धोदारुणोभ्यंतरोद्भवः व्याधिरेषोतिविख्यातःशुष्कार्शोना
मनामतः ६ अथांजननामिकामाह दाहतोदवतीताम्रापिटिकावर्त्मसंभवा मृद्वीमंदरुजासूक्ष्माज्ञेयासांजननामिका ७

अथवहलवर्त्ममाह वर्त्मोपचीयतेतस्यापिटिकाभिः समंततः सवर्णाभिः छिराभिश्चविंद्याद्बहलवर्त्मंतत् ८ अथवर्त्मबंधकमाह
कंडूमत्यल्पतोदेनवर्त्मश्रोफेनमानवः असमंछादयेदक्षिपत्रासौबंधवर्त्मकः ९ अथक्लिष्टवर्त्ममाह मद्बल्पवेदनंताम्रंयद्वर्त्मस
मंमेवच अकस्माच्चभवेद्रक्तंक्लिष्टवर्त्मेतितंविदुः १०सममेवकालंरक्तंलोहितंभवति एतत्कफदुष्टरक्तजं तथानिमिः श्लेष्मादुष्टे
नरक्तेनाक्लिष्टमांसमतः समं बंधुजीवनिभंवर्त्मक्लिष्टमांसतदुच्यते १अथवर्त्मकर्दममाह क्लिष्टंपुनः पित्तयुतंशोणितंविदहेद्यदा
तदाक्लिन्नत्वमापन्नमुच्यतेवर्त्मकर्दमः ११ क्लिष्टमितिप्रागुक्तलक्षणमेववर्त्म पित्तमीलितंशोणितंकर्तृभूतंयदाविदहेत्तदापित्तम
धिकंतद्रूतक्लिन्नत्वमापन्नमिति आर्द्रतांगतंवर्त्मकर्दमसउच्यते अथश्यावर्त्मलक्षणमाह वर्त्मयद्बाह्यतोंतश्चश्यावंशूनंयज्जायते
तदाडुःश्याववर्त्मेतिवर्त्मरोगविशारदाः १२ अत्रश्याववर्त्मनवाताधिकंबोध्यं तथाचनिमिः दुष्टश्लेष्मानिलासित्तंवर्त्मनोश्रीयते
यदा आग्निदग्धनिभंश्यावंश्याववर्त्मेतितद्विदुः १ अथप्रक्लिन्नवर्त्ममाह अरुजंबाह्यतःशूनंवर्त्मयस्यनरस्यच प्रक्लिन्नवर्त्मत
[illegible]
सन्निपातजः १अथअक्लिन्नवर्त्ममाह यस्यधौतान्यधौतानिसंबध्यंतेपुनः पुनः वर्त्मान्यपरिपक्कानिविंद्यादक्लिन्नवर्त्मतत्
१४ अथवातहतवर्त्ममाह विमुक्तसंधिनिश्चेष्टवर्त्मयस्यनमील्यते तद्वातनिहतंवर्त्मजानीयादक्षिचिंतकः १५ विमुक्तसंधि
बत्थनाश्चुतसंधिनिश्चेष्टंनिष्क्रियंनिमिषोन्मेषरहितमितियावत् अएतेवोक्तंनिमील्यइति निमीलतेसंकुचति एतद्वातज्ञमसा
ध्यंच अथवर्त्मार्बुदमाह वर्त्मांतरस्थंविषमंग्रंथिभूतमवेदनं अचक्षतेर्बुदमितिसरक्तमवलंबितं १६ विषमंअवर्तुलंग्रंथिभ
तंग्रंथिरूपेणास्थितं अवेदनंअल्पवेदनं सरक्तईषल्लोहितंअवालंबितंअस्रस्तं अथनिमेषमाह निमेषणीःशिरावायुःप्रविष्टोसं
धिसंश्रयः संचालयतिवर्त्मानिनिमेषःसनिसिध्यति १७ निमेषणीः निमेषकारिकाःशिराःप्रविष्टस्तानोवायुर्वर्त्मानिचालय
ति अथशोणितार्शोलक्षणमाह वर्त्मस्थोयोविवर्धंतलोहितोम्रदुरंकुरः तद्रक्तजंशोणितार्शछिन्नंवापिप्रवर्धते १८ एतद्रक्तज

427/1936

मसाध्यं तथाचविदेहः वायुःशोणितमासाद्यशिराणांप्रसुरवृरस्थितः जनयत्यंकुरंताम्रंवर्त्मान्निछिन्नरोहिणं तच्छोणितार्शः साध्यंस्यात्
रक्तस्राव्यमरक्तजं १अथलगणमाह अपाकीकठिनःस्थूलोग्रंथिवर्त्मभवोरुजः सकंडूपिछलःकोलःप्रमाणोलगणःस्मृतः १९ अपा
कीत्यादिनालगणःश्लेष्मजनितः अरुजः पीडारहितः अथाविसवर्त्ममाह त्रयोदोषवाहिःशोथंकुर्युश्छिद्राणिवर्त्मना प्रस्रवंत्यंतरुदकं
बिसवद्बिसवर्त्मतत् २० छिद्राणि अंतःछिद्राणिकुर्युरित्यन्वयः बिसवदितिबिसम्रणालंयथातछिद्रैः अभ्यंतरैस्थितैः वहुछिद्रत्वात्
अथकुंचनमाह वाताद्यावर्त्मसंकोचंजनयंतिमलायदा तदाद्रष्टुनशक्नोतिकुंचनंनामतद्विदुः २१ मलाइत्यस्यदुष्टप्रतिपादनार्थं
मिलिनीकरणाद्वातायमलाउच्यंते कुंचनत्वंविकृतिकरणत्वं इतिएकविंशतिवर्त्मरोगाः अथपक्ष्मरोगौ पक्ष्मकोपपक्ष्मशा
तोरोगौद्वौपक्ष्मसंमयौ १ पक्ष्माणिअक्षिलोमानि तत्रपक्ष्मकोपमाह प्रचालितानिवातेनपक्ष्माण्यक्षिविशांतिहि असितेसित
भागेचमूलकोशात्पतंत्यपि घर्षंत्यक्षिनुकुस्तानिसरंभंजनयंतिच मूलकोशात्पक्ष्मकोपोविज्ञेयोव्याधिदारुणः १ प्रचालितानि
तिप्रतिनीतानिपक्ष्माणीतिनेत्ररोमाणि असितेसितभागेचजयंति मूलकोशातमूलस्थनात पतंत्यपीतिपक्ष्माणीतिशेषः
अपिशब्दान्नपतंत्यपिसरंभमितिशोफं अयंसान्निपातजोसाध्यः अथपक्ष्मशातमाह वर्त्मपक्ष्माशयगतापित्तरोमाणिशातयेत्
कंडूदाहंचकुरुतेपक्ष्मशातंतमादिशेत २ इतिपक्ष्मरोगौ अथसंधिजारोगाः तत्रसंधयःषट्तानाह पक्ष्मवर्त्मगतःसं
धिवर्त्मशुक्लगतोपरः शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोपिच ततःकनीनिकागताः षष्ठश्चअपांगसंश्रितः तेषांनामानिसंख्या
चाह पूयालसोसोपनाहःस्रावाश्चत्वारएवच पर्वणीकालजीजंतुग्रंथिःसंधौनवामया तत्रपूयालसमाह पक्वःशोथःसं
धिजोयःस्रतोदःस्रावेत्पूयंपूतिपूयालसाख्यः १ संधिजःकर्मानिकसंधिजोबोध्यःकनीनसंधिश्चनासामनुनेत्रांतेः तथाच
निमिः शोथःक्लेदसमाविष्टंतोदभेदसमाकुलं पूयालसंतुतंविंद्यात्संधौकानिनिकेव्रणं १अथोपनाहमाह ग्रंथिर्नाल्पोद
ष्टिसंधावपाकीकंडूप्रायोनीरुजस्त्वोपनाहः २ नाल्पमहान् अपाकीईषत्पाकी नीरुजाईषद्वेदनः उक्तंविदेहे वायुःश्लेष्माण

यो०२० मादायदृष्टिसंधावाश्रितः अरुजंकठिनंग्रंथिंजनयत्यल्पवेदनं श्लेष्मोपनाहंतंविद्यात्कृष्णांबंक्षाम्यतःपरं १ अथस्रावाणांसंप्राप्तिमा
ह गत्वासंधीनश्रुमार्गेणदोषाः कुर्युःस्रावान्रुक्षणेःस्वैरुपेतान् तांहिस्रावंनेत्रनाडीतिचैकेतस्यालिंगंकीर्तयिष्येचतुर्धा १ अश्रु
२९२ मार्गेणेति अश्रुवाहिन्योधमन्यस्त्वश्रुमार्गः संधीनितिकनीनसंधीन् कनीनसंधिश्चनासासमनुनेत्रांतः संधीनितिबहुवचनेन
सर्वएवसंधयोगृह्यंते एकवदंतीतिदोषः वातिकःस्रावोनभवति केवलेनवातेनतदसंभवात् अथपैत्तिकंस्रावमाह हरिद्राभं
पीतमुष्णंजलंवापित्तस्रावःसंस्रवेत्संधिमध्यात् २ हरिद्राभंपीतरक्तंभवतः पीतशब्दप्रयोगात् जलंवाइतिवाशब्दोहरिद्राभं
पीतंवेत्यत्रसंबध्यतेपित्तस्रावात्पित्तस्रवः एवंश्लेष्मस्रावादयः अथश्लेष्मस्रावमाह श्वेतंसांद्रंपिच्छिलंयःस्रवेत्तुश्लेष्मस्रा
वोसौविकारःप्रदिष्टः ४ अथसांनिपातस्रावमाह शोथःसंधौसंस्रवेद्यस्तुपक्वः पूयंस्रावोनैकरूपःप्रदिष्टः ५ अथरक्तस्रा
वमाह रक्तःस्रावःशोणितात्योविकारोगच्छेदुष्णंतत्ररक्तंप्रभूतं ६ उक्तंविदेहे संनिपातात्कफाद्रक्तात्पित्तात्स्रावोक्षिसंधिषु
इति अथपर्वणिकामाह ताम्रातन्वीदाहपाकोपपन्नारक्ताज्ञेयापर्वणीवृत्तशोफा जातासंधौकृष्णशुक्ले ७ अथअलजी
माह अलजीस्यात्तस्मिन्नेवख्यापिताप्रवलिंगैः ८ अलजीस्यादित्यादितस्मिन्नेवकृष्णशुक्लयोरेवसंधौ भेदार्थमाह पूर्वलिं
गैःप्रमेहाधिकारलिखितैः रक्त तोसिस्फोटयुतादारुणात्तलजीभवेदितिवचनैः ख्यापिताकथिता अथजंतुग्रंथिकमाह जंतु
ग्रंथिवर्त्मनःपक्ष्मणश्चकंडूंकुर्युर्जंतवःसंधिजाताः नानारूपावर्त्मशुक्लांतसंधौचरंत्यंतर्लोचनंदूषयंतः ९ वर्त्मनःपक्ष्मणश्च
संधिजाताइत्यन्वयः उक्तंविदेहे ततःप्रयमस्रकरूक्षःपतंतिकृमयस्तथा लक्षणैर्विविधैर्युक्ताःसांनिपातसमुच्छिताः कृ
मिग्रंथिंतुतांविद्यात्तद्धिनाचक्षुदूषकं इतिसंधिजारोगाःनव अथसमस्तनेत्रजारोगास्तेषांनामानिसंख्यांचाह स्यंदा
श्चतुष्काइहसंप्रदिष्टाश्चत्वारएवेहतथाधिमंथाः पाकःसशोथःसवशोथहीनोहताधिमंथोनिलपर्ययश्च शुष्काक्षिपाकस्त्वि २९२
हकीर्तितश्चतथान्यतोवातउदीरतश्च दृष्टिस्तथाम्लाध्युषिताशिराणामुत्पातहर्षौचसमस्तनेत्रे एवंसमस्तनेत्रेस्युरामया

429 / 1936

द्वादशमतंतेषामिहपृथक्वक्ष्येयथावल्लक्षणान्यपि १ तथाभिष्यंदाश्चत्वारइत्याह वातात्पित्तात्कफाद्रक्तादभिष्यंदश्चतुर्विधः प्राये
णजायतेघोरःसर्वनेत्रामयाकरः १ घोरइतिदुःखसहवेदनःसर्वत्रमयोनेत्राकरइति सर्वेषामेवनेत्ररोगाणामाधिमंथादीनामाकारःस्था
नंउत्पत्तिकरत्वादत्रस्वाह सुश्रुतः प्रायेणसर्वेनयनामयास्तुभवंत्यभिष्यंदनिमित्तमूलाइति अथतेषुवातिकमभिष्यंदमाह निस्तोदनस्तं
भनरोमहर्षसंघर्षपारुष्यशिरोभितापः विशुष्कभावःशिशिराश्रुताचवाताभिपन्नेनयनेभवंति १ संघर्षःकर्करिकावालुकाभिःपू
रितइव शिरोभितापःशिरोव्यथा विशुष्कभावःदूषिकाराहित्यं वाताभिपन्नेवातेनोपप्लुते अथपैत्तिकमभिष्यंदमाह दाहप्रपाकौशि
शिराभिनंदाधूमायनंबाष्पसमुद्भवश्च उष्णाश्रुतापीतकनेत्रताचपित्ताभिपन्नेनयनेभवंति २ प्रपाकःप्रकृष्टपाकःशिशिराभिनंदाशि
शिरेच्छा धूमायनंनेत्राच्छूनोद्गमइति बाष्पसमुद्भवःअश्रुभावः अथश्लैष्मिकमभिष्यंदमाह उष्णाभिनंदागुरुताक्षिशोथःकंडूपदेहौ
चातिशीततात्र स्रावोमुहुःपिच्छिलएवचापिकफाभिपन्नेनयनेभवंति ३ उपदेहः दूषिकयालिप्तता अथरक्तजमभिष्यंदमाह ताम्राश्रु
ताल्लोहितनेत्रताचराजीःसमंतादतिलोहिताश्च पित्तस्यलिंगानिचयानितानिरक्ताभिपन्नेनयनेभवंति ४ रक्ताभिष्यंदलक्षणे पित्तस्य
लिंगानिपैत्तिकाभिष्यंदसमानानि अथअधिमंथाश्चत्वारइत्याह तेषामभिष्यंदजनित्वमाह वृद्धैरेतैरभिष्यंदैर्नराणामक्रियावतां
तावंतस्त्वधिमंथाःस्युर्नयनेतीव्रवेदनाः १ वृद्धैरितिवृद्धिंगतैः अक्रियमाणत्वात् अभिष्यंदैःवातपित्तकफरक्तजैश्चत्वारोधि
मंथाःप्रणेतव्याः अथसामान्यलक्षणमाह उत्पाट्यतइवात्यर्थंतथानिर्मथ्यतेपिच शिरसोर्धंतुतंविद्यादधिमंथस्वलक्षणैः १
स्वलक्षणैःयथोक्तवातादिभिष्यंदलक्षणैः अधिमंथंविद्यात् अभिष्यंदेभ्योधिमंथानांभेदार्थमाह शिरसोर्धमुत्पाट्यतइवतथा
निर्मथ्यतेपिचेतितथैवाधिमंथेपुर्वोधव्यं शिरसोर्धवेदनाव्याधिप्रभावात् सचाधिमंथोयथात्मकोयावताकालेनमिथ्याचारात्
दृष्टिंहंतितदाह हन्याद्दृष्टिंश्लैष्मिकःसप्तरात्रात्व्याधिर्घोरोरक्तजःपंचरात्रात् षड्रात्राद्वावातिकोवैनिहन्यान्मिथ्याचारात्पै
त्तिकःसद्यएव १ अत्रसद्यःशब्देनत्रिरात्रमुच्यते तंत्रांतरेत्रिरात्रवचनात् अथसशोथपाकमाह कंडूपदेहाश्रुयुतःपक्वोदुंबरसं

यो०२० निभः संरंभात्स्यतेयस्तुनेत्रपाकः सशोथकः १ शौहित्येनसोरंभीशोथवान् अथअशोथपाकमाह शोथहीनानिलिंगानिनें
त्रपाकेत्वशोथके २ लिंगानिकंडवादीनिशौहित्यानिशोथरहितानि अथहतानाधिमंथमाह उपेक्षणादक्षियदाधिमंथोवाताधि
कः शोषयतिप्रसह्य रुजाभिरुग्राभिरसाध्यएषहताधिमंथः खलुनामरोगः २ शोषयतिशोषाक्षिवानाशयति अतएवविदेहः
तत्सद्मानिवर्संशरुफुमवसीदतिलोचनमिति अथवातपर्ययमाह वारंवारंचपर्येतिभ्रुवौनेत्रेचमारुतः रुजाभिःसहतीव्राभिःसज्ञे
योवातपर्ययः ४ पर्येतिपर्यायेणक्रमेणाऽपातिकदाचिद्भ्रुवौकदाचिन्नेत्रे अथशुष्काक्षिपाकमाह यत्कूणितंदारुणरुक्षवर्त्मसंद
ह्यतेचाविलदर्शनंयत् सुदारुणंयत्प्रतिबोधनेचशुष्काक्षिपाकोपहतंतदक्षि ५ कूणितंसंकोचितं मुद्रितमितियावत् दारुणरूक्ष
वर्त्मदारुणवल्कतरूक्षवर्त्मयस्यतत् दूरमक्ष्णोर्विशोषणं सदह्यतेसदाहं सुदारुणंअतिशयेनविकृतं प्रतिबोधनेउद्घाटने
उक्तंकरालः कूणितःरुक्षवर्त्माक्षिकृच्छोन्मीलाविलेक्षणं सदाहंसास्रजोवातात्शुष्कपाकान्वितंवदेत् १ अथान्यतोवातमाह यस्या
वटूकर्णशिरोहनुस्थेमन्यागतोवाप्यनिलोन्यतोवा कुर्याद्रुजंवैभ्रुविलोचनेनतमन्यतोवातमुदाहरंति ६ अवटूर्घाटामन्येग्रीवापा
र्श्वशिरे अन्यतोवापृष्ठादिदेशंवागतः अन्यतोवातः अन्यत्रस्थितोऽन्यत्ररुजंकरोति उक्तंविदेहेन मन्यानामंतरेवायुरुस्थितः
पृष्ठतोपिवा करोतिभेदंशोषंचशंखेचाक्ष्णोभ्रुवोस्तथा तमाहुरन्यतोवातंरोगंदृष्टिविरोजनाः १ अथाम्लाध्युषितमाह श्या
वलोहितपर्यंतंसर्वमाक्षिप्रपच्यते सदाहशोथंसंस्रावमम्लाध्युषितमम्लतः ७ अम्लतः आम्लभोजनात् अथाशिरोत्पातमाह
अवेदनावापिसवेदनावायस्याक्षिराजिोहिभवंतिताम्राः मुहुर्विरज्यंतिचयस्यतादृक्व्याधिःशिरोत्पातइतिप्रदिष्टः ८ अक्षि
राज्यः अक्षिशिराः विरज्यंतिविकृतवर्णाभवंति रक्तजोयंविकारः अथशिराप्रहर्षमाह मोहाच्छिरोत्पातउपेक्षितस्तुजायेतरो
गःसशिराप्रहर्षः ताम्राच्छगच्छंस्रवतिप्रगाढंतथानशक्नोत्यभिवीक्षितंच ९ अथनेत्रस्यसामान्यलक्षणं उदीर्णवेदननेत्रं
रोगशोफसमन्वितं घर्षनिस्तोदशूलाश्रुयुक्तमामान्वितंविदुः १ उदीर्णवेदनंउत्कटवेदनं घर्षः करकरिका एतच्छंघनादिविधा

नार्थमंजनादिनिषेधार्थंवोक्तं तंत्रांतरे सेकादिनातथत्वारिलंघनंभोजसेरसः स्वादुतिक्तश्चलेपाश्चबाष्पस्वेदनमेवच १ अथनेत्रस्य
निरामतालक्षणमाह मंदवेदनताकंडुःसंरंभाश्रुप्रशांतता प्रसन्नवर्णताचाक्ष्णोनिरामस्यचलक्षणं १ संरंभः शोथः इतिसमस्तनेत्रा
मयः इतिसमस्तनेत्रामयः दृष्टिरोग १४ कृष्णप्रदेशे ४ शुक्लभागजाः ११ वर्त्मनि २१ पक्ष्मजौ २ संधिषु ९ सर्वाश्रयः १७ सर्वसं
कलना ७८ अथनेत्ररोगाणांचिकित्सा सेकादिनानिचत्वारिलंघनंभोजनंरसः स्वादुस्तिक्तश्चलेपाश्चबाष्पस्वेदनमेवच
एतानिनेत्ररोगाणांसमानांपाचनानिहि १ अंजनंसर्पिषापानंकषायंगुरुभोजनं नेत्ररोगेषुसामेषुस्नानंचपरिवर्जयेत् २ अक्षिकुक्षिभवा
रोगाप्रतिश्यायव्रणज्वराः पंचैतेपंचरात्रेणरोगानश्यंतिलंघनात् ३ षट्समतिलोचनजाविकारास्तेषामभिष्यंदसमुद्भवानां श्लेष्माश्रय
त्वादिहलंघनंप्राक्प्रशस्यतेसुद्धसोदनंच ४ अंजनंप्रणरंकाथपानमामेनशस्यते आचतुर्थोद्दिनादामसमभिष्यंदेपिलोचनं ५ गंडूषां
जननस्यादिहिप्तानांकफकोपतः षट्समतिर्नेत्ररोगाद्रुःसहीस्युरुपेक्षिताः ६ सेकआश्चोतनंपीडीबिडालस्तर्पणंतथा पुटपाकोंजनं
चैभिःकल्पैर्नेत्रमुपाचरेत् ७ कल्पविधिः अथदृष्टिगतरोगचिकित्सामाह वर्जयेद्दुपसर्गाख्यांगंभीरांह्रस्वसंज्ञितां काचांस्तुया
पयेत्सर्वानकुलांध्यंतथैवच तिमिरंनेत्ररोगेषुकष्टंतद्यत्नतोहरेत् यत्तंदृष्टिविनाशस्यतिमिरंसमुदाहृतं ऋषिभिस्तुमिदंतस्मात्त
स्यकुर्याच्चिकित्सितं १ अथवातिकतिमिरचि० स्निग्धानिनस्यांजनशोधनानिपाकाःपुटानामथतर्पणंच घृतस्यपानान्यथवस्ति
कर्मकुर्यादभीक्ष्णंतिमिरेनिलोत्थे दशाम्लजंजनापक्वंघृतंदुग्धंचतुर्गुणं त्रिफलाकल्कसंयुक्तंतिमिरेवातजेपिबेत् शस्ताफलत्रयका
थेदशाम्लरसेघृतं कल्केनजीवनीयानांघृतंतिमिरनाशनं वातिकेतिमिरेपक्वंदशाम्लीरसेघृतं त्रिवृच्चूर्णसमायुक्तंविरेकार्थंप्रयो
जयेत् त्रिफलादशाम्लानांनिर्यूहंदुग्धमिश्रितं गंधर्वतैलसंयुक्तंप्रयुंजीतविरेचनं १ अथपैत्तिकतिमिरचि० शीतांजनाश्चोत
नतर्पणैश्चनस्यैर्विरेकैर्मृदुभिर्घृतैश्च तिक्तप्रधानैस्तिमिरंनिहन्यात्पित्तात्मकंशोणितमोक्षणैश्च तिमिरेपित्तजेसर्पिर्जीवनीयत
राश्रुतं पाययित्वाशिरांविध्यात्स्निग्धैलाकुंभसैंधवैः चूर्णैर्माक्षिकसंयुक्तैरंजनंकारयेन्नरः बलाशतावरीवीरासिताशैलेयकैःपचेद्

431/1936

यो०र० त्रिफलासहितंसर्पिर्जीर्वनीयवरास्तुतस्तिमिरघ्नमुत्तमं सारिवात्रिफलोशीरमुक्ताचंदनपद्मकैः पिष्टंवर्तिकृतंहंतिपित्तोत्थंतिमिरंनृणां
२ अथश्लेष्मिकमाह तीक्ष्णाग्निरसांजनशोधनानिपाकःपुटानामवतर्पणंच घृतानिवासात्रिफलापटोलसंज्ञानिकुर्यात्तिमिरेकफो
२१५ त्थे कफोद्भवेवरात्वमश्रुतंक्वाथश्रुतंहविः पाययित्वाशिरांविध्येद्भवेतिमिरेभिषक् पृथ्वीपथ्याकणाशुंठीकुसुंभस्यांबुनिर्झराः गोमू
त्रक्वथिताशुंठीत्रिफलामिश्रावरेखनं नस्यंमरिचयष्ट्याह्वाविडंगामरदारुभिः नेपालत्रिफलाशंखकांताभ्योषंचपेषिता वर्तीकृतावरा
सोत्तमंजनंतिमिरापहं ३ अथसांनिपातिकतिमिराचि० संसर्गेसंनिपातेचयथादोषोदयाक्रिया धात्रीरसांजनक्षौद्रसर्पिर्भिस्तु
रसक्रिया पित्तानिलाक्षिरोगघ्नीतैमिर्यपटलापहा दद्यादुशीरनिर्यूहे चूर्णितंकणसैंधवं सत्त्वंतत्सघृतंभ्यः पिबेत्क्षौद्रेघने
ततः शीतेचास्मिन्हितमिदंसर्वजेतिमिरेहितं वातपित्तकफसंनिपातजांनेत्रयोर्बहुविधामपिव्यथां शीघ्रमेवजयतिप्रयोजितः
शिग्रुपल्लवरसः समाक्षिकः ४ अथतिमिरसामान्यचि० अथअंजनविधिः अथसंपक्वदोषस्यप्राप्तमंजनमाचरेत् अंजनाकि
यतेयेनतद्द्रव्यंचांजनंमतं तद्यथा गुटिकारसचूर्णानित्रिविधान्यंजनानितु कुर्याच्छलाकयांगुल्याहीनानिस्वयथोत्तरं लेखनंरोप
णंचापिलेखनंतत्त्रिधापृथक् मधुरंस्नेहसंपन्नमंजनंस्नेहनंमतं कषायतिक्तरसयुक्तसस्नेहरोपणंस्मृतं अंजनंक्षारतीक्ष्णाम्ल
रसैर्लेखनमुच्यते टीका त्रिधापृथगिति तत्रगुटिकारसचूर्णरूपंपृथक्प्रत्येकंत्रिधास्नेहनरोपणलेखनंचेति हरेणुमात्रां
कुर्यात्वर्तिंतीक्ष्णांजनेभिषक् प्रमाणंमध्यमेसार्धांद्विगुणंतुमृदौभवेत् रसक्रियातुतन्मात्रास्यात्त्रिविडंगमिताहिता मध्यमादि
विडंगासाहीनात्वेकविडंगिका शलाकास्नेहनेचूर्णेवत्सः प्राकुरंजने रोपणेतास्तुतिस्रस्यस्तुभेलेखनेस्मृतं मुखयोः कुं
चिताश्लक्ष्णाशलाकाष्टांगुलोन्मिता अश्मजाधातुजावास्यात्कलायपरिमंडला स्वर्णेरजतोद्भताशलाकास्नेहनेस्मृता ता
म्रलोहाश्मसंज्ञाताशलाकालेखनेमता अंगुलीतुमृदुत्वेनरोपणेकथिताबुधैः अंजनेकेवलमपिशलाकाविशेषमाह त्रिफ २१५
लाभृंगशुंठीनांरसेस्तद्वत्सर्पिषा गोमूत्रमध्वजाक्षीरैः सिक्तोनागः प्रतापितः तच्छलाकाहरत्येवसकलान्नयनामयान्

433/1986

इतिदृष्टिप्रसादनिशलाका कृष्णभागादधः कुर्यादपांगंयावदंजनं प्रथमंसव्यमंजीयात्पश्चाद्दक्षिणमंजयेत् शलाकयासांजनयानच
नेत्रयनंस्पृशेत् हेमंतेशिशिरेवापिमध्याह्नेंजनमिष्यते पूर्वाह्णेवापराह्णेवाग्रीष्मेशरदिचेष्यते वर्षास्वनभ्रेनात्युष्णेवसंतेचसदैवहि
प्रातःसायंचनकुर्यान्नचकुर्यात्सदैवहि श्रांतेप्ररुदितेभीतेपीतमद्येनवज्वरे अजीर्णेवेगघातेचनांजनंसंप्रशस्यते सौवीरमंजनंनित्यंहि
ममक्ष्णोः प्रयोजयेत् पंचरात्रेष्टरात्रेवास्रावणार्थेरसांजनं १ इतिवंगसेनात् अथमुक्तादिमहांजनभावप्रकाशात् मुक्ताकर्परकाचाःगरु
मरिचकणासैंधवंसैलवालं शुंठीकंकोलकांस्यत्रपुरजनिशिलाशंखनाभ्यभ्रतुत्थं दक्षांडत्वक्चसाक्षिनजयुतशिवाह्वीनकंराजवर्त
जातीपुष्पंतुलस्याः कुसुममभिनवंबीजमस्यास्तथैव शंखिनीबांजनभद्रमुस्तंसताम्रसारंरसगर्भयुक्तं प्रत्येकमेषांखलुमाषकैकंख
लेनपिष्यात्मधुनातिसूक्ष्मं नवांनिरोगानयनाश्विनायेनितांतमत्रोपचिताश्चतेषां विध्यापतेशांतिरवश्यमेवंमुक्तादिनानेनमहांजनेन
१ टीका कंकोलंसुगंधद्रव्यंनदलाभेजातीपुष्पं अथवालकंग्राह्यं त्रपुवंगंतच्चमारितंग्राह्यंशिलामनःशिला अभ्रंअभ्रकंतच्चमारितं
दक्षांडत्वक्दक्षकुक्कुटस्तस्यांडस्यत्वक् अक्षांविभीतकफलं क्षनजमनुकुंकुमं शिवाह्वेनेरीकी क्लीनकंजेष्टीमद राजावर्तंरेवठीतिलोके
अंजनंसुरमाइतिलोके ताम्रसारंचमारितंग्राह्यं रसगर्भंरसांजनं इतिमुक्तादि अथनयनशाणनाम अंजनं कणासलवणोषणास
हरसांजनाभिस्तथासरित्पतिकफः शिफासितपुनर्नवासंभवा रजन्यरुणचंदनंमथचतुष्पथ्याशिला अरिष्टदलशावरस्फटिकशंख
नाभिद्रवः इमानितुविचूर्णयांनिविडवाससाशोधयेत्ततोपिसिविमर्दयेत्स्तनधुनाध्वखंडेनतत् इदंमुनिभिरीरितंनयनशाणनामां
जनंकरोतितिमिरक्षयंपटलपुष्पनाशंबलात् १ टीका लवणंसैंधवं अंजनंसुरमा सरित्पतिकफः समुद्रफेन शावरःलोध्रः स्फटि
कः फटकि इंदुःकर्पूरः नयनशाणंतिमिरंतत्तनकुसुमंतत्पटलंच अथचंद्रोदयवटी शंखनाभिविभीतस्यमज्जापथ्यामनःशिला
पिप्पलीमरिचंकुष्ठंवचाचेतिसमांशकं छागक्षीरेणसंपिष्यवटींकुर्याद्यवोन्मितां हरेणुमात्रांसंघृष्यजलेनांजनमाचरेत् तिमिरंमां
सवृद्धिंचकाचंपटलमर्बुदं रात्र्यंधंवार्षिकंपुष्पंवटीचंद्रोदयाहरेत् १ अथचंद्रप्रभावर्तिः रजनीनिंबपत्राणिपिप्पलीमरिचानिच

विडंगंभद्रमुस्तंचसमभीत्वभयास्मृता अजामूत्रेणसंपिष्यछायायांशोषयेद्वटी वारिणातिमिरंहंतिगोमूत्रेणतुपिष्टका मधुनापट
लंहंतिनारीक्षीरेणशुक्र एषकं स्थचंद्रप्रभावर्तिः स्वयंरुद्रेणनिर्मिता १ अथनागिफलावर्तिः रसकज्जलजनाभिपीरतुथसमांशं
वसनगालितमेतान्निंबुनीरेणपिष्टं हरतिनागिफलैतद्वर्तिरभ्योजिताक्ष्णोस्तिमिरकुसुमकंडूस्रावरागार्मपिल्लान् १ अथचंद्रोद
यावर्तिः हरीतकीवचाकुष्टंपिप्पलीमरिचानिच विभीतकस्यमज्जाचशंखनाभीर्मनःशिला सर्वमेतत्समंकृत्वागव्यक्षीरेणपेष
येत् नाशयेत्तिमिरंकंडूपटलान्यर्बुदानिच अपित्रिवार्षिकंशुक्रंमासेनैकेननाशयेत् अधिकानिचमांसानिरात्र्यंधत्वंतथैवच
वर्तिश्चंद्रोदयानामनृणांदृष्टिविशोधिनी १ अथनयनामृतं रसेंद्रभुजगौतुल्यौ तयोर्द्विगुणमंजनं सतस्यांशकर्पूरमंजनंनयनामृ
तं तिमिरंपटलंकाचंशुक्रमर्मार्जुनानिच क्रमात्सर्वाशिनोहंतितथान्यानपिदृग्गदान् १ अथकुसुमिकावर्तिः रोपणी तिलपुष्पा
ण्यशीतिःस्युः षष्टिःपिप्पलितंदुलाः जात्याःकुसुमपंचाशन्मरीचानिचषोडश सूक्ष्मपिष्टाजलैर्वर्तिःकुनाकुसुमिकाभिधा
तिमिरार्जुनशुक्राणांनाशनीमांसवृद्धिहृत् एतस्यांश्वांजनेमात्राप्रोक्तासार्धहरेणुका १ अथदार्व्याद्यंजनं दार्वीपरामधुकमं
भसिनारिकेलंपक्त्वाष्टभागपरिशिष्टरसंपुनस्तात् सांद्रंविपाच्यशशिसैंधवमाक्षिकाद्यंयुंज्यात्ततोतितिमिरार्तिषुपित्तजेषु १
अथशंखादिवर्ती शंखस्यभागश्चत्वारस्तदर्धेनमनःशिला मनःशिलार्धंमरिचंमरिचार्धेनपिप्पली सर्वमेकत्रसंमर्द्यगुटि
कांकारयेत्ततः वारिणातिमिरंहंतिअर्बुदंहंतिमस्तुना पिच्चटंमधुनाहंतिस्त्रीक्षीरेणतथार्जुनं १अथपुनर्नवाद्यंजनं दुग्धेन
कंडुंक्षौद्रेणनेत्रास्रावंचसर्पिषा पुष्पंतैलेनतिमिरंकांजिकेननिशांधतां पुनर्नवाहरेत्त्वाशुभास्करस्तिमिरंयथा १अथ
गुडूच्याद्यंजनं गुडूचीस्वरसःकर्षः क्षौद्रस्यान्माषकोन्मितं सैंधवंक्षौद्रतुल्यंस्यात्सर्वमेकत्रमर्दयेत् अंजनेनयनेतेनपि
ल्लार्मतिमिरंजयेत् काचकंडूलिंगनाशंशुक्लरुग्गतान्गदान् १अथकतकफलादि कतकस्यफलंघृष्टंमधुनानेत्रमंज
येत् इयत्कर्पूरसहितंतत्स्यान्नेत्रप्रसादनं अन्यच्च कतकस्यफलंशंखंसैंधवंत्र्यूषणंसिता फेनोरसांजनंक्षौद्रंविडंगानि

मनःशिला सर्वमेतत्समंकृत्वानारीक्षीरेणपेषयेत् तिमिरंपटलंकाचमर्मंशुक्रंव्यपोहति कंडूक्लेदार्बुदंहंतिमलंचासुसुरवावली इति 435/1935
शार्ङ्गधरात् अथपिप्पल्याद्यंजनं पिप्पलीत्रिफलाद्राक्षालोध्रकंचससैंधवं भृंगराजरसंघृष्टंगुटिकांजनमिष्यते अभ्रंसतिमिरंकाचं
कंडूंशुक्रंतथार्जुनं अंजनंनेत्रजान्रोगान्निहंत्येवनसंशयः १इत्यश्विनीकुमारसंहितायां अथगुंजामूलाद्यंजनं गुंजामूलंबस्तमू
त्रेणपिष्टंनिघृष्टंवावारिणाभद्रमुस्ता सार्धंसद्यस्तिमिरंसर्वपुंसामंधुद्धादनेत्रयोरंजनेन १अथतुलस्यादि तुलस्याबिल्वपत्रस्यरसोग्राह्यः
समांशकः ताभ्यांतुल्यपयोनार्यास्त्रितयंकांस्यपात्रके गजवल्याद्दृढंमर्धतास्त्रेणप्रहरःपुनः कज्जलत्वंसमुत्पाद्यतेनांजितविलोचनः सद्योने
त्ररुजंहंतिसम्यक्पाकसंभवां इतियोगप्रदीपात् इत्यंजनानि अथक्वाथाः वासानिंबनिंबपटोलपत्रंतिक्तामृताचंदनवत्सकत्वक् कलिंग
दार्वीदहनंसनागरंनिंबधात्रीह्यभयाविभीतकं तथायवक्वाथमथाष्टमांशापिबेदिमंप्रत्यहिनेकषायं तैमिर्यकंडूपटलार्बुदंचशुक्रंत
थाशोणसंव्रणंच दाहंसरोगंसरुजंसपिप्पलुंहन्यात्समस्तानपिनेत्ररोगान् १ इतिमहावासादिक्वाथः अथत्रिफलाक्वाथः अथ
स्तत्रिफलाक्वाथंसर्पिषासहयोजितं भुक्त्वापरिपिबेत्सायंमासेनांधोपिपश्यति १अथचित्रकादिक्वाथः चित्रकमूलत्रिफलापटोलव
सासाधितंपिबेदंभः नयनगतंनिशिचक्षुर्भ्रांतिमिरंचाविशोषतोहंति १इतिक्वाथः अथचूर्णानि अथत्रिफलादिचूर्णं त्रिफलात्वसमा
यसंचचूर्णंसमयष्टिमधुकंत्रिसप्तरात्रं मधुनासहसर्पिषादिनांतेपुरुषोनित्यविहारमाददीत तिमिरक्षतमाशतोदकंडूक्षणदांध्य
धुंदहादशूलतोदान् तिमिरंचसशुक्लपिनकाचंशमयत्येवनिषेवितःप्रयोगः नचकेवलमेवलोचनानांविहितोरेणविबर्हणायपथ्यो
गः दशनश्रवणोर्ध्वजत्रुजानांप्रशमोतुरयतथामयाना प्रमदाभिरयंजराधिरूढःस्फुरचंद्राभरणासुपाशुनीपु सुरतानिपदेपदे
निषेवंपुरुषायोगमिमंनिषेवमाणः स्मृतिविक्रमबुद्धिशक्तियुक्तःशरदांजीवतिविंशतिसमग्र्यं १अथशतावर्यादिचूर्णं शताव
रीसर्पसमप्रदेयाएलास्तथातवगार्धतुल्या देयाविडंगफलभिःसमानंक्रतोःसमंचालेर्मकस्यबीजं विशेभुजेस्तुल्यगुणंमरीचं
तद्विकर्मपंगांगाधिकाप्रदेया चूर्णंमधुमध्वांजननर्धकर्षमक्षाप्तयाणांविनिवारणार्थं कंडूसधूमंतिमिरंसुघोरंसमांपिकाचंपटलांत्रिदोषं

यो०र०

२३८

येचान्येरक्तभवाविकारास्तेषामयंचूर्णवरोनिहंता १ अथद्वितीयं त्रिफलादिचूर्णंवंगसेनात् लिह्यात्सरावत्रिफलांसचूर्णितांघृतम
गाढांतिमिरेथपित्ते समीरणेतैलयुतांकफात्मकेनमधुप्रगाढांविदधीतबुद्धिमान् १ अथघृतानि अथषडंगघृतंवंगसेनात् बिभी
तकाशिवाधात्रीपटोलारिष्टवासकैः पक्वमेभिर्घृतंसर्वान्अक्षिरोगान्व्यपोहति १ अथत्रिफलाद्यंमहाघृतं त्रिफलायारसप्र
स्थंप्रस्थंभृंगरसस्यच वृषस्यचरसप्रस्थंशतावर्याश्चतत्समः अजाक्षीरंगुडूच्याश्चआमलक्यारसस्तथा प्रस्थंप्रस्थंसमादृत्यसर्वै
रेभिर्घृतंपचेत् कल्कः कणासिताद्राक्षात्रिफलानीलमुत्पलं मधुकंक्षीरकाकोलीमधुपर्णीनिदग्धिका तत्साधुसिद्धंविज्ञेय
शुभेभांडेनिधापयेत् ऊर्ध्वपानमधःपानंमध्येपानंचशस्यते यावंतोनेत्रजान्रोगान्तन्नाशयत्यपकर्षति सरक्तेरक्तदुष्टेचरक्ते
चाभिश्रुतेतथा नक्तांध्येतिमिरेकाचेनीलिकापटलार्बुदे अभिष्यंदेधिमंथेचपक्ष्मकोपेसुदारुणे नेत्ररोगेषुसर्वेषुदोषत्रयक
तेष्वपि परंहितमिदंप्रोक्तंत्रिफलाद्यंमहाघृतं १ टीका क्षीरकाकोल्याः अभावेअश्वगंधामूलंग्राह्यं मधुपर्ण्यालाभेसाम्या
न्यष्टीमधुग्राह्यंतुल्यगुणत्वात् अथद्वितीयत्रिफलाद्यंघृतं ग्रानमेकंहरीतक्याद्विगुणंचविभीतकं चतुर्गुणंचामलकं वृषमार्क
वयोःसमं चतुर्गुणोदकंदत्वाशनैर्मृद्वग्निनापचेत् भागैश्चतुर्थंसंरक्ष्यक्वाथंतमवतारयेत् शर्करामधुकंद्राक्षामधुयष्टीनिद
ग्धिका काकोलीक्षीरकाकोलीत्रिफलानागकेशरं पिप्पलीचंदनंमुस्तंत्रायमाणातथोत्पलं समक्षीरंप्रदातव्यंकल्कैरेतैःशनैः
पचेत् हन्यात्सतिमिरंकाचंनक्तांध्यंशुक्रमेवच तथास्रावंचकंडूंचश्वयथुंचकषायतां कलुषत्वंचनेत्रस्यविड्वर्त्मपटलानिच
बहुनात्रकिमुक्तेनसर्वान्नेत्रामयान्हरेत् यस्यचोपहतादृष्टिः सर्वाणिश्चापपश्यतः तस्मैतद्भेषजंप्रोक्तंमुनिभिः परमंहितं
मार्जितंदर्पणंतद्वत्सर्वनिर्मलतांव्रजेत् तद्वदेतेनपीतेननेत्रंनिर्मलतामियात् वारिद्रोणद्वयंचात्रवृषमार्कवयोस्तुले १ टीका
काकोल्यभावेअश्वगंधामूलादिग्राह्यं अथलघुत्रिफलाघृतं त्रिफलाक्वाथकल्काभ्यांसपयस्कंघृतंशृतं तिमि २९७
राण्यचिराद्धन्यात्पीतमेतन्निशामुखे १ इतिघृतानि अथभृंगराजतैलं भृंगराजतैलात्कुडवंतथापलंचमधुकस्य क्षीर

437/1936

प्रस्थेविपक्वंगनमपिचक्षुर्निवर्तयेत् १ अथधावनं स्नावंरुक्ष्मांतिहितंश्चापिचक्षुष्यमनिलापहं मधुकामलकस्नानंपित्तभ्रांतितिमिरापहं
वचार्धैःस्नानमिष्टंनिशंभ्रमभ्रांतितिमिरापहं आमलैःसततंस्नानं परिदृष्टिबलावहं त्रिफलायाःकषायस्तुधावनान्नेत्ररोगजित् कच
लाम्बुरवरोगघ्नःपातनःकामलापहः मुक्तापाणितलंघृष्ट्वाचक्षुषोर्यदिदीयते अचिरेणैवनश्यन्ति तिमिराणिव्यपोहति १ इतितिमिर
चिकित्सासमाप्ता अथकाचोपक्रमः काचेरक्तेजलौकाभिर्हृत्वाशृंगैकमाचरेत् शाणार्धंमरिचद्वौचपिप्पल्यार्णवफेनयोः शाणार्ध
सैंधवाच्छाणंनवसौवीरिकांजनात् पिष्टंसम्यक्शिलायांचचूर्णांजनमिदंशुभं कंडूकाचकफार्तानांमलानांचविशोधनं इतिशारंगधरा
त् समंचषस्रंगांजनभागसम्मितैः शंखांजनात्काचमलंव्यपोहति १ शिलासैंधवकासीसशंखव्योषरसांजनैः सक्षौद्रैःकाचयुक्तानां
तिमिरघ्नीरसक्रिया १ इतिकाचोपक्रमः अथपित्तविदग्धदृष्टेश्चिकित्सामाह रसांजनघृतक्षौद्रतालीसस्वर्णगैरिकैः गोशकृ
द्रससंयुक्तंपित्तोपहतदृष्टये १ काश्मरीपुष्पमधुकदार्वीलोध्ररसांजनैः सक्षौद्रमंजनंकुर्यात्पित्तव्याधिप्रशांतये १ अथश्लेष्मवि
दग्धदृष्टेश्चि० हरेणुमगधाबीजमज्जायाःपक्वदन्वितं शकृद्रसेनांजनंवाश्लेष्मोपहतदृष्टये १ अथदिवांधरात्र्यांधयोश्चि० नलि
नोत्पलकिंजल्कंगैरिकंसयकृद्रसं गुटिकांजनमेतस्याद्दिनरात्र्यंधयोर्हितं १ नदीजशंखत्रिकटून्रसांजनमनःशिलाहेचनिशे
गवांशकृत् सचंदनेयंगुटिकाप्रयुक्ताभृशास्यतेरात्रिदिनेनपश्यतां १ सर्पादिदृशेनेदग्धेलवशीनंप्रयोजयेत् हंसघ्नघृतोपेतं
मंजनंचोपशस्यते १ अथकेवलरात्र्यांधश्चि० रसांजनंहरिद्रेद्वेमालतीनिंबपल्लवाः गोशकृद्रससंयुक्तावर्तिनक्तांध्यना
शिनी एतस्याश्चांजनेमात्राप्रोक्तासार्धहरेणुका कणाछागयकृन्मध्येपक्वातद्रसपेषिता आचिरान्नाशयेन्नक्तांध्यंतद्वत्सक्षौद्रम
पणं करंजपद्मकिंजल्कंचंदनोत्पलगैरिकैः गोशकृद्रससंपिष्टंनक्तांध्याहितमंजनं रसांजनंशिलादारुमालतीपत्ररसोमधुनक्तां
ध्यतांजयेदेतदंजनंसाधुयोजितं मालतीपत्रक्षौद्रंचनिशाद्वयरांजनैः नक्तांध्यमंजनंहन्यात्कृष्णवागोमयान्विता दध्नाघृष्टंमरी
चंवारात्र्यंधांजनमुत्तमं इतिदिवांधरात्र्यंधयोश्चि० अथनकुलांधरोगस्यरागरहितस्यचि० वचात्रिरचंदनकुंडलीचरन्निंबानि

यो०र० बरजनीसवासा प्रस्थंजलस्यक्वथिताष्टभागंपिबेत्क्षीणेनकुलांध्यरोगे १ इतिवंगसेनात् इतिदृष्टिगतरोगचि०समाप्ता अथक
ष्णगतरोगचि० तत्रसव्रणशुक्रप्रतीकारमाह व्रणशुक्रपश्चात्स्यथविडंगंगुग्गुलंपचेत शिरसोचाहरेद्रक्तंजलौकाभिश्चलोचनात्
ससैंधवंत्रिवृत्क्वाथेस्त्रिचारान्याचपरस्थतं पीत्वासर्वेषुशुक्रेषुशीघ्रंकुर्याच्छिराव्यधं इतिवंगसेनात् अथपक्ष्मादादिआश्चोतनं प
क्ष्माद्दार्वीसलपद्मलाक्षाप्रपौंडरीकंनरोलेवुनाच आश्चोतनंस्त्रीपयसाविपक्वंनिहंतितत्सव्रणदाहशुक्रं १ अथलामज्जकाद्यं
जनं लामज्जकोत्पलसितासारिवाचंदनद्वयोः कार्षिकैःसारिवाप्रस्थंक्वाथयेत्सलिलाढके पादशेषंपरिस्राव्यपचेदादर्विलेप
नात भाजनेलोहचेलिप्राभानस्तत्क्षायमंजनं प्रधानमेतच्छुक्रघ्नं व्रणशुक्रंशमंनयेत् श्यामामलकषायंवामधुनाव्रणशुक्रिणां
१ अथचंदनादिवर्त्तिः चंदनंगैरिकंलाक्षामालतीकालिकान्विता व्रणशुक्रहरीवर्त्तिः शोणितस्यप्रसादनी १ अथाऽव्रण
शुक्रचि० अथाश्चोतनं जात्याप्रवालंमधुकंचसार्पिर्भृष्टंसुरवोष्णंकुसुमशीलिलंच आश्चोतनंशुक्रहरंप्रदिष्टंशुक्रापहंस्त्रीपय
सामहाहं १ अथधात्रीफलादिसेचनं धात्रीफलंनिंबकपित्थपत्रंयष्ट्याह्वलोध्रंखदिरंतिलाश्च क्वाथःसुशीतोनयनेभिषि
क्तः सर्वप्रकारांविनिहंतिशुक्रं १ अथवर्त्तयः पलाशपुष्पस्वरसेबहुशःपरिभाविता करंजबीजवर्त्तिस्तुदृष्टःपुष्पंव्यपोहति १
समुद्रफेनंसिंधूत्थंशंखदक्षांडवल्कलैः शिग्रुबीजयुतैर्वर्त्तिःशुक्रादीनशस्त्रवल्लिखेत् १ अथचंद्रोदयवर्त्तिः रसांजनंसशो
लेयंकुमंसमनःशिला शंखसप्भेनमरिचंशर्कराचेतिसप्तमं एषाचंद्रोदयोनामवर्त्तिर्वैदेहनिर्मिता हन्यात्सिध्मंचकंडूंचशुक्रंसति
मिरार्बुदं १ अथांजनं वटक्षीरेणसंयुक्तंमुखंकर्पूरजैरसः क्षिप्रमंजननोहंतिकुसुमंतुद्विमासकं सघृष्यपिप्पलीचूर्णंसफेनं
कांस्यभाजने सक्षौद्रंसैंधवोपेतमंजनंशुक्रनाशनं नाप्यंमधुकसारोवाबीजंचाक्षस्यसैंधवं मधुनांजनयोगाःस्युश्चत्वारःशुक्र
नाशनः कुक्कुटांडकपालानिशंखकाचोथचंदनं सैंधवाभ्यांसमयुक्तमंजनंशुक्रलेखनं १ अथलोहादिगुग्गुलुः अयःस
पथ्यात्रिफलाकणानांचूर्णानितुल्यानिपुरेणनित्यं सर्पिर्मधुभ्यांसहभक्षितानिसर्वाणिशुक्राणिनिहंतिशीघ्रं १ अथपटोला

द्यंघृतं पटोलंकटुकादार्वीनिंबवासाफलत्रिकैः दुरालभांपर्पटकंत्रायंतीचफलान्वितं प्रस्थामलकानांचक्वाथयेनत्वर्णेभसि तेनपा
दावशेषेणघृतप्रस्थंविपाचयेत कल्कैर्भूनिंबकुटजमुस्तयष्ट्याह्वचंदनैः सपिप्पलीकैस्तत्सिद्धंचक्षुष्यंशक्रयोजितं घ्राणकर्णाक्षिव
र्त्मकत्वमुखरोगव्रणापहं कामलाज्वरवीसर्पगंडमालाहरंपरं १ अथकृष्णाद्यंतैलं कृष्णाविडंगमधुयष्टिकासिंधुजन्मविश्वौषधैःप
यसिसिद्धिमिदंक्वगल्या तैलंनृणांतिमिरशुक्रशिरोक्षिवर्त्मपाकामयांजयतितस्यविधौप्रयुक्तं १ अथाक्षिपाकात्ययचि० यंवा
पुंडरीकंचगवांक्षीरावशोषितं रागाश्रुवेदनांहन्यादाक्षिणेकात्ययंतथा १ अथअजकाचि० मूर्धाक्षिकर्णभ्रूगंडशंखसमाश्रिताजका
जायतेव्यथतेनेत्रंमथ्यमानमिवांतरा उष्णमश्रुश्रवत्यक्षिदृषतोक्लिद्यतेभृशं असाध्यरोगसंभूतांदृष्टिजांचविवर्जयेत सर्पपत्वक्षा
कृष्णांचिरकालोत्थितानामपि साध्यरोगसमुत्पन्नांकृच्छ्रांतजकांजयेत अजकायांशिरांमुक्त्वात्रिवृच्चूर्णैर्विरेचयेत घृतंवातहरैः
सिद्धंमजकायांप्रयोजयेत सेकैःपानेनथाभ्यंगैर्भोज्यैर्दृष्टिविदांवरः पक्ववटपत्रपुटकैर्विधायमांसंधवल्लकर्कटकान् पुटवद्दह
बध्वानद्रससंकोटयेदजकां गवामस्थित्वचंकांस्येविनिघृष्यसुखांबुना प्रपयेदक्षिनेनाशुप्रशाम्यत्यजकामय अंगारपक्वरांव
करसेनाश्चोतनांजनं कर्पूरस्वर्णयुक्तेनशाम्यतेत्वाजकामयः सैंधवंवाजिपादंचगोरोचनसमायुतं शंखुलत्वससंयुक्तंप्ररणंचा
जकापहं १ अथद्राक्षादिकंघृतं द्राक्षाकस्यकषायेतुघृतप्रस्थंविपाचयेत कल्कंदद्यात्तुसक्षीरंयथोक्तान्कर्षसंमितान् सारिवा
मधुकंलाक्षाचंदनंनीलमुत्पलं बलाचातिबलाचैवमृणालंपद्मकंतथा कार्षिकंसविलोध्रंचजीवनीयगणान्वितं घृतमेतत्त्रयो
कर्पपानेनस्येचपूरणं अजकामर्जुनंकाचंपटलंशुक्रमेवच तथाक्षिरोगान्सकलान्वातपित्तोदरानजयेत १ इतिकृष्णभागा
निवेदयेत अर्मवाथंदधिनिभंनीलरक्तमथापिवा धूसरंतनुयच्चापिशुक्रवत्समुपाचरेत् अथकृष्णादिपुटपाकः कृष्णलोह
रजस्ताम्रशंखविद्रुमसिंधुजैः समुद्रफेनकासीसश्रोतोजदधिमस्तुभिः लेखनेवाकृतेनस्यपरंधारणमिष्यते १ अथपिप्प
ल्यादिगुटिकांजनं पिप्पलीगुटिकाद्राक्षालोहचूर्णससैंधवं भृंगराजरसेपिष्टंगुटिकांजनमिष्यते १ अर्मंसतिमिरंकाचंकंडूंशुक्र

439/1936

मथार्जुनं अजकां नेत्ररोगांश्च हन्यानिर वणोषत: १ अथमरिचादिलेप: संचूर्ण्यमरिचाक्षे च राजन्यारसमर्दितं लेपनार्दमेणांना
त्रांकरोत्येष:प्रयोगराट् १ अथपुष्पाक्षादिरसक्रिया पुष्पाक्षनार्क्षजासिनोदाधिफेनशंखसिंधूत्थगौरिकशिलामरिचै: समांशै:
२१२ पिष्टैस्तुमाक्षिकरसेनरसाक्रियेयंहंत्यर्मकाचतिमिरार्जुनवर्त्मरोगान् क्रियांभुक्तामयेकुर्यात्तिन्नाभिष्यंदजित्वछूभां बसोलोद्धृत्य
पिष्टैनुकार्यंशोणितमोक्षणं कफाभिष्यंदजित्सर्वंकर्मकुर्याद्विचक्षण: अंजनंकट्फलत्वोषबीजपूरसोरंजनै: अर्जुनेशर्करामस्तु
क्षौद्रैरस्योतनंहितं शंख:क्षौद्रेणसंयुक्त: कतक:सैंधवेनवा सितयार्णवफेनोवापृथगंजनमर्जुने १ इतिशुक्लगतरोगचि० अथ
वर्त्मपक्ष्मजा: उत्संगिनीवहलकर्दमवर्त्मनीचश्यावंचयच्चपाष्ठिनान्विहवच्चवर्त्म क्लिष्टंचपोथकियुतंखलुवर्त्मयच्चकुंभीकिनीचसहश
र्करयाचलेख्य: स्वेभ्योपनाहलगणंचविषंचभेद्याग्रंथिश्चयत्कृमिकृतोजनानामिकाच स्विन्नांभित्वाविनिष्पीड्यभिन्नामंजनना
मिकां शिलैलानतसिंधूत्थै: सक्षौद्रै: प्रतिसारयेत् रसांजनमधुभ्यांवाभित्वाशस्त्रेणवर्त्मवित् प्रतिसार्यांजनैर्युंज्यादुष्णैर्दीपशि
खोद्भवै: स्वेदयेत्घृष्यांगुल्याहरेद्रक्तंजलौकसा कारंसघृष्यदुर्वर्ण्यंमंजयेल्लोचनंमुहु: द्वित्रिवारान्शमयतिकंडुदोषान्विशे
जनं १ दुर्वर्ण्यंनत्रकुष्टं रसांजनंत्वोषयुतंसपीतंभवत्कीकृतं कंडूपाकान्वितंहंतिनत्नमंजननामिकां रोचनाक्षारतुत्थानिपिप्पल्य:
क्षौद्रमेवच प्रतिसारणमेकैकांभिन्नेगलपाडूयते निमेषं नाशमायातिसर्पिस्तैनचपूरणं स्वेदयित्वाविसग्रंथिछिद्राण्यस्यानिरा
श्रयेत् पक्वंभित्वातुशस्त्रेणसैंधवेनप्रपूरयेत् १ इतिनिमेषविसग्रंथि अलदारुवचापिष्टाम्लरसापत्रवारिणा छायाशुष्का
कृतावर्तिक्लिन्नवर्त्मनिवारणी रसांजनंसर्जरसोजाती पुष्पंमन:शिला समुद्रफेनोलवणंगौरिकंमरिचानिच एतत्समांशंमधु
नापिष्टंप्रक्लिन्नवर्त्मनि अंजनंक्लेदकंडूघ्नंपक्ष्मणांप्रवरोहणं १ अथपिल्लं पित्तश्लेष्मप्रकोपेणवर्त्मान:संप्रकुप्यते नाम्नाति
लोमनेत्रंवापिविक्लिष्टंपिल्लमेवच वर्त्मावलेखंबहुशस्तद्वच्छोणितमोक्षणं पुन:पुनर्विरेकंचपिल्लरोगातुरोभवेत् पिल्लिस्निग्धोव २१०.
मेत्सर्वंक्रियाव्यवस्तनेमाति शिखारसांजनंत्वोषंगोपितैर्वर्तिरंजनं पिल्लघ्नंछागमूत्रेणभावितंदेवदारुच हरितालवचादारु

५५१/१९३६

करसारसपेषितं अभयारससंपिष्टंनगरंपिल्लनाशनं ताम्रपात्रेशुद्धाम्लंसिंधुस्यमरिचान्वितं आरनालेनसंघृष्टमंजनंपिल्लनाशनं तुषकस्य
फलंश्वेतमरिचानिचविंशति त्रिंशानिकांजिकफलै:पिष्ट्वातास्तेनिधापयेत् पिल्लानापिल्लान्कुरुतेबहुवर्षोत्थितानापि उत्सेकेनोपदेहनकंडूशोथो
श्चनाशयेत् १ अथपक्ष्मरोगयोश्चिकित्सा रक्षनसिद्दहंतस्मात्पक्ष्मलोहशलाकया पक्ष्मकोपोपुनर्नैवंकदाचिद्रोमसंभव: पुष्पंकासीसचूर्णंवा
सुरसारसभावितं ताम्रेदग्घाहंतचोत्यंमक्ष्मशातनलेपनं १ इतिवर्त्मपक्ष्मजा: अथसंधिजानांचिकित्सा तत्रप्रथालसेचिकित्सा प्रथालसे
शिरांभित्वालेपोपनाहकर्मभि: नेत्रपाकविधि:कुर्याहारसुक्तांजनंहितं अद्रकस्वरसैर्घृष्टंसिंधुकासीससंमितं छायाशुष्कंवर्तीकुर्यात्स्यारव्योहि
तमंजनं १ अयोपनाहा:अनियोश्च हितोपनाहंत्वनलेपिप्पलीमधुसैंधवै: विलेरवेन्मंडलाग्रेणप्रयच्छेदासमंतत: १ अथस्रावा: स्रावेषु
त्रिफलाक्काथंयथादोषंप्रयोजयेत् क्षौद्रेणाज्येनपिप्पल्या: मिश्रंविधेछिरांतथा पथ्याक्षधात्रीफलमध्यबीजैस्त्रिद्वेकभागैर्विदधीतवर्ति
नयांजयेदस्तमतिप्रवृक्षमश्रुणोहरेत्कृष्णमपिप्रकोपं कार्पासीफलजंवाम्लंजलैर्घृष्टंरसांजनं मधुयुक्तंविरोधंचचक्षुस्रावमपोहति १
अथपर्वणिका पर्वणीपिटिकासंधिभागेछित्पादशेषं हिमांश्चोतनंतत्रयांजयेन्मधुसैंधवै: १ अथजंतुग्रंथि: त्रिफलाम्लकासीच
सैंधवै:सरसांजनै: रसाक्रियांकृमिग्रंथोभिन्नेस्यात्प्रतिसारणं १ इतिसंधिजा: अथसमस्तनेत्ररोगाणांतेषांचिकित्सामाह तत्रसे
कविधि: सेकस्तुसूक्ष्मधाराभि:सर्वस्मिन्नयनेहित: मीलिताक्षस्यमर्त्यस्यप्रदेयश्चतुरंगुल: सर्वोपिस्नेहनेवातेरक्तपित्तेमरोचने ले
खनेश्लेष्मकार्यस्तुचमात्रधुनोच्यते षट्शतैःस्नेहनेपुचतुर्भिश्चरोपणे शतैस्त्रिभि: कार्योसेकोलेखनकर्मणि कार्यस्तु
दिवसेसेकोरात्रौवात्याधिकेगदे अथाश्चोतनविधि: अथआश्चोतनंकार्यंनिशायांनकथंचन उन्मीलितेक्षिणिद्दग्मध्येविंदुभिर्द्व्यं
